# mInarAja shrIvRiddhayavanajAtaka pUrvakhaNDa

# મીનરાજ શ્રીવૃદ્ધયવનજાતક પૂર્વખણ્ડ

## Document Information

Text title : vriddhayavanajataka part 1

File name : vriddhayavanajataka1.itx

Category : jyotisha, sociology_astrology

Location : doc_z_misc_sociology_astrology

Transliterated by : Radu Canahai clradu at yahoo.com

Proofread by : Radu Canahai clradu at yahoo.com

Latest update : August 11, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# મીનરાજ શ્રીવૃદ્ધયવનજાતક પૂર્વખણ્ડ

પૂર્વખણ્ડ


૦૧. રાશિપ્રભેદાધ્યાયઃ ૫૦

૦૨. ગ્રહયોનિભેદાધ્યાયઃ ૩૨

૦૩. આધાનાધ્યાયઃ ૪૦

૦૪. જન્માધ્યાયઃ ૨૬

૦૫. આયુર્દયાધ્યાયઃ ૧૫

૦૬. દશાધ્યાયઃ ૪૩

૦૭. અન્તર્દશાધ્યાયઃ ૭૦

૦૮. અષ્ટકવર્ગફલાધ્યાયઃ ૧૨૯

૦૯. સૂર્યદર્શનચારફલાધ્યાયઃ ૭૨

૧૦. ચન્દ્રદર્શચારાધ્યાયઃ ૭૨

૧૧. ભૌમદર્શનચારાધ્યાયઃ ૭૨

૧૨. બુધદર્શનચારધ્યાયઃ ૭૨

૧૩. ગુરુદર્શનચારધ્યાયઃ ૭૨

૧૪. શુક્રદર્શનચારધ્યાયઃ ૭૨

૧૫. શનૈશ્ચરદર્શનચારધ્યાયઃ ૭૨

૧૬. ગ્રહાણાં ભાવાધ્યાયઃ ૮૪

૧૭. સૂર્યચારાધ્યાયઃ ૬૮

૧૮. ચન્દ્રચારાધ્યાયઃ ૬૬

૧૯. ભૌમ્ચારાધ્યાયઃ ૬૮

૨૦. બુધચારાધ્યાયઃ ૬૮

૨૧. ગુરુચારાધ્યાયઃ ૬૮

૨૨. શુક્રચારાધ્યાયઃ ૬૮

૨૩. શનૈશ્ચરચારાધ્યાયઃ ૬૮

૨૪. તનુસ્થાનચિન્તાધ્યાયઃ ૭૮

૨૪અ. તનુસ્થાનચિન્તાધ્યાયઃ ૩૧
૨૫. ધનસ્થાનચિન્તાધ્યાયઃ ૩૧
૨૬. સહજસ્થાનચિન્તાધ્યાયઃ ૩૦
૨૭. સુખસ્થાનચિન્તાધ્યાયઃ ૩૦
૨૮. સુતસ્થાનચિન્તાધ્યાયઃ ૩૦
૨૯. રિપુસ્થાનચિન્તાધ્યાયઃ ૨૯
૩૦. કલત્રસ્થાનચિન્તાધ્યાયઃ ૨૯
૩૧. મૃત્યુસ્થાનચિન્તાધ્યાયઃ ૨૮
૩૨. ધર્મસ્થાનચિન્તાધ્યાયઃ ૨૮
૩૩. કર્મસ્થાનચિન્તાધ્યાયઃ ૨૮
૩૪. લાભસ્થાનચિન્તાધ્યાયઃ ૨૮
૩૫. વ્યાયસ્થાનચિન્તાધ્યાયઃ ૨૮
૩૬. લગ્નદર્શનચારાધ્યાયઃ ૭
૩૭. અનફાયોગાધ્યાયઃ ૩૧
૩૮. સુનફાયોગાધ્યાયઃ ૩૧
૩૯. દુર્ધારાયોગાધ્યાયઃ ૧૮૧

---

ઉત્તરખણ્ડ

૪૦. લગ્નાશ્રયોગાધ્યાયઃ ૧૪૩
૪૧. ધનાશ્રયોગાધ્યાયઃ ૧૨૦
૪૨. સહજાશ્રયોગાધ્યાયઃ ૧૨૦
૪૩. સુખાશ્રયોગાધ્યાયઃ ૧૨૦
૪૪. સુતાશ્રયોગાધ્યાયઃ ૧૨૦
૪૫. શત્રુભવાશ્રયોગાધ્યાયઃ ૧૨૦
૪૬. કામાશ્રયોગાધ્યાયઃ ૧૨૦
૪૭. મૃત્યુસ્થાનાશ્રયોગાધ્યાયઃ ૭૪
૪૮. ધર્માશ્રયોગાધ્યાયઃ ૧૨૦
૪૯. કર્માશ્રયોગાધ્યાયઃ ૧૨૦
૫૦. લાભાશ્રયોગાધ્યાયઃ ૧૨૦
૫૧. વ્યયાશ્રયોગાધ્યાયઃ ૧૨૦
૫૨. સઙ્ખ્યાશ્રયોગાધ્યાયઃ ૬

૫૩. વજ઼્નાદિયોગાધ્યાયઃ ૫

૫૪. તન્વાદિદ્વાદશભાવધીશફલાધ્યાયઃ ૧૪૪

૫૫. દ્વાદશભાવથાનચિન્તાધ્યાયઃ ૧૪૫

૫૬. રશ્મિચિન્તાધ્યાયઃ ૫૬

૫૭. રાજયોગાધ્યાયઃ ૬૬

૫૮. સ્ત્રીજાતક લગ્નફલાધ્યાયઃ ૧૨

૫૯. સ્ત્રીજાતક ચન્દ્રરાશિગુણાધ્યાયઃ ૧૨

૬૦. સ્ત્રીજાતક નક્ષત્રગુણાધ્યાયઃ ૨૭

૬૧. સ્ત્રીજાતક ભાવફલાધ્યાયઃ ૮૪

૬૨. સ્ત્રીજાતક રાજયોગાધ્યાયઃ ૧૪

૬૩. નક્ષત્રગુણાધ્યાયઃ ૨૭

૬૩અ. લગ્નદર્શનચારાધ્યાયઃ ૯

૬૩।બ્ લગ્નચારાધ્યાયઃ ૨૭

૬૪. મૃત્યુજ્ઞાનાધ્યાયઃ ૪૫

૬૫. અનિષ્ટસૂચનાધ્યાયઃ ૩૧

૬૬. શુભસ્વપ્નાધ્યાયઃ ૪૧

૬૭. મિશ્રિકાધ્યાયઃ ૩૦

૬૮. કાકરુતાધ્યાયઃ ૨૯

૬૯. શ્યામાચેષ્ટાધ્યાયઃ ૮

૭૦. શ્વાચેષ્ટાધ્યાયઃ ૧૫

૭૧. ગોચેષ્ટાધ્યાયઃ ૫

---

પૂર્વખણ્ડ

આધ્યાય ૦૧

રાશિપ્રભેદાધ્યાયઃ ૫૦

સૃષ્ટૌ વિધાત્રે જગતાં શિવાય
સંહારકાલે સ્થિતયેઽચ્યુનાય ।
તુભ્યં નમઃ સર્વગતાય નીત્યં
ત્રયીમયાયામલભાસ્કરાય ॥ ૧॥

યદુક્તવાન્ પૂર્વમનીસ્તુ શાસ્ત્રં
હોરામય લક્ષ્મીતં મયાય ।

તન્મીનરાજો નીપુણં સ્વબુદ્ધા
વીચીન્ત્ય ચક્રેઽષ્ટસહનમાત્રમ્ ॥ ૨॥

યા પૂર્વકર્મપ્રભવસ્ય ધાત્રી
ધાત્રા લલાટે લીખીતા પ્રશસ્તીઃ ।
તાં શાસ્ત્રમેતત્ પ્રકટં વિધત્તે
દિમો યથા વસ્તુઘનેઽન્ધકારે ॥ ૩॥

આદ્યઃ સ્મૃતો મેષસમાનમૂર્તિઃ
કાલસ્ય મૂર્ઢા ગતીતઃ પુરાણૈઃ ।
સોઽજાવિકાસંધરકન્દરાદ્રી-
સ્તેનાગ્નીધાત્વાકરરત્નભૂમીઃ ॥ ૪॥

વૃષાકૃતિસ્તૂ પ્રથીતો દ્વીતીયઃ
સાવક્ત્રકભૂયતનં વિધાતુઃ ।
..........દ્રસાનુદ્વયગાકુ નાનાં
કૃષીબલાનાં ચ વીદારભૂમીઃ ॥ ૫॥

વીણાગદાભૃન્મીથુનસ્તૃતીયઃ
પ્રજાપતેઃ સ્કન્ધભુતપ્રદેશઃ ।
પ્રનર્તકીગાયનશિન્મિકસ્ત્રા
ક્રીડારનિધૂતવિહારભૂમિઃ ॥ ૬॥

કર્કી કુલીરકૃતિરમ્બુસંસ્થો
વક્ષઃપ્રદેશો ..........
કેદારવાપીપુનિનાની રત્ન
દેવાઙ્ગનાનાં ન વિહાર .......... ॥ ૭॥

સિંહસુ શૈલે દ્વદયપ્રદેશઃ
પ્રજાપતેઃ પંચમમહુરાદ્યાઃ ।
તસ્યાતંચીદગગુહાબનાદ્રિ-
બ્રહ્મા વનિભૂમિવનપ્રદેશાઃ ॥ ૮॥

પ્રદીપકાં ગૃધ્ધ કરેણે કન્યા
નૌસ્થા લલે ષષ્ઠમીતિ બ્રુવન્તિ ।
કાન્તાર્ધધારા જઠરે વિધાતુઃ
સ શાદ્વલસ્ત્રીરંતિશિલ્પભૂમીઃ ॥ ૯॥

વીષ્યાં તુલાપણ્યધરો મનુષ્યઃ
સ્થિતઃ સનાભીકાર્ટિવસ્તિદેશઃ ।
શુધ્દ્ધાર્ધવીણાપણપન્તનાય-
સર્વાની વાસોન્નતસસ્યભૂમિઃ ॥ ૧૦॥

શ્વભ્રેઽષ્ટમે વૃશ્ચિકવિગ્રહસ્તુ
પ્રોક્તઃ પ્રભોર્મેદ્રગુદપ્રદેશઃ ।
ગુહાવિલશ્વભ્રવિણાશ્મગુપ્તિ
વલ્મીકકીદાજગરાહિભૂમિઃ ॥ ૧૧॥

ધન્વી મનુષ્યો હયપશ્ચિમાર્ધ-
સમાહુરુરુ ભુવનપ્રણેતુઃ ।
સમસ્થિતવ્યસસમસ્તવાજી-
કૃતાસ્ત્રૌભૃદ્વજ્નરથાશ્વભૂમિઃ ॥ ૧૨॥

મૃગાર્ધપૂર્વો મકરોઽમ્બુમધ્યે
જાનુપ્રદેશં તમુશન્તિ ધાતુઃ ।
નદીવનારણ્યસરોજરૂપ-
શ્વભ્રાધિવાસો દશમઃ પ્રદિષ્ટઃ ॥ ૧૩॥

સ્કન્ધે ..........ઉરિત્કઃ પુરુષસ્ય કુમ્ભો
જંઘોરુમેકાદશમાહુરાદ્યાઃ ।
..........ઓદકાધારકુસસ્યપક્ષી-
સ્ત્રીશૌણિક પૂતનિવેશદેશાઃ ॥ ૧૪॥

જતે તુ મીનદયમન્ચરાશિઃ
કાલસ્ય પાદૌ કથિતૌ વરિશ્ચૈઃ ।
સ પુણ્યદેવદ્વિજ ..........આર્થભૂમિ-
..........વાસઃ ॥ ૧૫॥

..........સ્યાવરજઙ્ગમાખ્ય
સર્વં રવિન્દ્રાન્મકમાહુરાદ્યાઃ ।
તસ્યોદ્ભોઽત્રાપ..........શ્ચ દૃષ્ટો
..........તદાત્મકં તત્ ॥ ૧૬॥

તસ્યાર્ધમાર્કં વિદિનં મઘાદિ

સાર્પાદિ ચાન્દ્રં વિહિતં પરાર્ધમ્ ।
ક્રમેણ સૂર્યઃ પ્રદદૌ ગ્રહાણાં
વ્યસ્તેન નારાધિપતિસ્તથૈશ્ચ ॥ ૧૭॥

બુધસ્ય શુક્રસ્ય ધરાસુતસ્ય
બૃહસ્પતેર્ભાસ્કરનન્દનસ્ય ।
દે..........ગૃહે તેષુ યથાનુરૂપં
ફલં વિધેયં નિપુણં વિદગ્ધૈઃ ॥ ૧૮॥

એષાં પુમાંસો વિષમાઃ પ્રદિષ્ટાઃ
સમા યુવત્યઃ ફલદાસ્તથૈવ ।
ક્રૂરસ્વભાવાઃ શુભમૂર્તયશ્ચ
ચરાગમિશ્રાઃ ક્રમશશ્ચ સર્વે
ક્ષેયાઃ સ્વભાવેન શુભાશુભેષ ॥ ૧૯॥

મેષો હરિઃ પ્રાગ્ નવમશ્ચ નાથા
યામ્યાધિપો ગોપ્રમદામૃગાશ્ચ ।
નૃયુક્તુલાકુમ્ભધરાપરાસ્યાઃ
કર્કાલિમીનાસ્ત્વથ ચોત્તરાયાઃ ॥ ૨૦॥

એવાં નવાંશાઃ પ્રભવન્તિ સૂર્યાત્
સૂર્યાંશકાસ્યાશ્ચ નિજાલયસ્થાત્ ।
આદ્યેષુનન્દાગૃહપાલકાનાં
દ્રેષ્કાણસંજ્ઞાઃ ક્રમશો વિચિન્ત્યાઃ ॥ ૨૧॥

હોરાદ્વયં ભાનુનિશાકરાભ્યા-
મોજે સમે વ્યસ્તમુશન્તિ તજ્જ્ઞાઃ ।
કુજસ્ય બાણા હ્ષવશ્ચ સૌરે-
નષ્ટૌ ગુરોઃ સપ્ત શશાઙ્કજસ્ય ॥ ૨૨॥

ભૃગોઃ શરા પુંભવને પ્રદિષ્ટા-
સ્ત્રિંશાંશકાઃ સ્ત્રીભવને વિલોમમ્ ।
સપ્તાંશકાઃ સપ્તમરાશિપૂર્વાઃ
ષષ્ટીર્વિભાગા ભવનસ્ય મેષાત્ ॥ ૨૩॥

ચૂડાપદં દ્વિસ્વરસપ્તલિપ્ત-
માદ્યં પુરાણા ગૃહલિપ્તિકાનામ્ ।

નૃરાશિસંજ્ઞાઃ પુરતો વરિષ્ઠા-
શ્ચતુષ્પદાશ્ચૈવ તુ દક્ષિણસ્થામ્ ॥ ૨૪॥

તથાપસ્યાં પ્રભવન્તિ કીટા
જલોદ્‌ભવાશ્ચૈવ તથોત્તરસ્યામ્ ।
સૌમ્યોદ્‌ભવાઃ પ્રાગ્બલવૃદ્ધિભાજો
ભવન્તિ યામ્યાસ્ત્વથ પશ્ચિમસ્યામ્ ॥ ૨૫॥

ગૃહા ગ્રહાણાં વિષયેણૂ યોગ્યાઃ
ફલાર્થિભિર્હાનિકરાસ્નથાન્યે ।
દ્યુરાત્રિસન્ધૌ પ્રબલાશ્ચ કીટા
દિવા પુમાંસઃ પશુવશ્ચ રાત્રૌ ॥ ૨૬॥

યઃ સ્વામિયુક્તસ્ત્વથવાદિ દૃષ્ટઃ
સૌમ્યગ્રહૈર્વા સ ભવેદ્ધરિષ્ઠઃ ।
રાશિં ગતો વ..........શુભમધ્યભાગં
ક્રૂરૈર્વિયુક્તો બહુસૌમ્યદૃષ્ટઃ ॥ ૨૭॥

તનુવિલગ્નં સુભગં વરિષ્ઠં
મૂર્ધાનદોહં સુરણં નિવાસમ્ ।
મૂર્તિઃ ફલં શ્રીફલમિષ્ટદં ચ
સંજ્ઞાનકં પૂર્વગૃહં વદન્તિ ॥ ૨૮॥

કોશો ધનં દર્ભકસિદ્ધિમેદં
પ્રભૂષિણં ભાસુરક્તં દ્વિતીયમ્ ॥ ૨૯॥

તૃતીયમુત્પાતહરં ..........
વદન્તિ વ્રીજાઙ્કુરકં તમીડ્યમ્ ॥ ૩૦॥

સુખં સુગમ્યં હ્યથ બન્ધુલીને
ગૃહં સુહૃત્તુર્યવીનમારેમ ।
મિત્રં પ્રશાન્તં ગુરુણા વિશાલં
નૃણાં કનીકં પ્રચુરં કુતાલમ્ ॥ ૩૧॥

સન્તાનકં દાત્રકરં સુતાસ્ય
ગૃહીતસારં પ્રવરં સુહોપ્રમ્ ।
સ્યાત્ પંચમં પૂર્વકરં કૃતાલં

સારાર્થવર્ણેઽકરં કૃતીનામ્ ॥ ૩૨॥

પુરાવનિં સાન્દ્રકરં કૃર્તાનાં
ષષ્ઠં પ્રતીપં સુરિપું ચ શક્તમ્ ।
સંશોષિણં શ્રીદમદં સુબાલં
નિરાહતં વાર્નિકરં વૃથાદ્યમ્ ॥ ૩૩॥

સ્યાદપીનં કૂર્દતરં વિતાનં
દ્યૂનં કલત્રં મદનં સુતારમ્ ।
દ્યૂનં દ્યૂનં સન્તતિદં સુકામં
..........આમિત્રમાત્રં રતિદં પ્રસિદમ્ ॥ ૩૪॥

મૃત્યું ખનં છિદ્રમય પ્રકીર્ણં
પૈશાનિકં દિષ્ટ્રિકમાર્તિદં ચ ।
દશારિકં સાઙ્ગારિકં નરાણાં
સ્યાત્તદૃકાખ્યં કૃકમાદિકાખ્યમ્ ॥ ૩૫॥

ધર્મદ્યુતિં ધીતિકરં વિશા..........ં
તૃણાતિકં ગોયરણં ગુરુત્વમ્ ।
ધૃતિં વિકાંશ પ્રશમં વરિષ્ટં
સુધાવિદઙ્ગં નવમં વ્યનાકિ ॥ ૩૬॥

નભસ્તલં કર્મ ગરિષ્ઠમુક્તં
વિભાસીકં સાધકમનિકં ચ ।
હિતં વિરાત્રં દશમં કિલીકં
કિતારવં ભારવમાહીમાનમ્ ॥ ૩૭॥

આયત્તિગં લાભમિતીહ ધારં
વિના કિલ સાધિકમદ્ભુતં ચ ।
સુતારમધ્યં સુતમષ્ટિપાદં
.......... રિષ્ફમ્ ॥ ૩૮॥

વ્યયપ્રદ દાતિકરં ચ દણ્ડં
વિરાલિનં સાદાનિકં સુબાલમ્ ।
ભાનું તથા દ્વાદશભં કુલાલં
મલીભસં દારિહરં પ્રવીણમ્ ॥ ૩૯॥

ચતુષ્ટયાસ્થં કથિનં ચ કેન્દ્રં
સર્વૈષ્ટદં કણ્ટકસંજ્ઞિતં ચ ।
લગ્નં ચતુર્ષ્કં દશમં ચ કામં
સર્વાણી તુસ્યાનિ ફલેન કૃત્વા ॥ ૪૦॥

દ્વિતીયલાભાષ્ટમપંચમાનીં
પણાફરાખ્યાનિ વદન્તિ ભાનિ ।
તૃતીયધર્મારિવ્યયાલયાનિ
આપોક્લિમાખ્યાનુ વદન્તિ તજ્જ્ઞાઃ ॥ ૪૧॥

નભસ્તલૈકાદશષટ્તૃકાણિ
વૃદ્ધિપ્રદાન્યેવ વદન્તિ પુંસામ્ ।
મૃગાજચન્દ્રર્ક્ષતુલાધરાણાં
વર્ગોત્તમાખ્યાઃ પ્રથમા નવાંશાઃ ॥ ૪૨॥

ગોકુમ્ભસિંહાલિવિસંચિતાનાં
સ્યુઃ પંચમાશ્ચાન્ત્યભવાઃ પરેષામ્ ।
નૃયુકુલીરો વૃષભોઽજસંજ્ઞ-
શ્ચાપો મૃગો રાત્રિબલાઃ ષડેતે ॥ ૪૩॥

પૃષ્ટોદયા દ્વન્દ્વવિવર્જિતાશ્ચ
દિવાબલાન્યે શિરસોદ્રમન્તિ ।
ઉચ્ચં રવેરાદ્યતમાદશાંશ-
શ્ચન્દ્રસ્ય સપ્તાશ્વિસમો વૃષાશ્ચ ॥ ૪૪॥

મૃગોદ્ગમો ભૂમિસુતસ્ય તજ્જ્ઞૈ-
સ્તૃયભાગઃ પરમઃ પ્રદિષ્ટઃ ।
ગજાશ્વિસંખ્યેન્દુસુતસ્ય ષષ્ઠા-
જ્જીવસ્ય કર્કાન્તિચિસંખ્ય એવ ॥ ૪૫॥

સ્યાત્ પંચમો ભાર્ગવનન્દનસ્ય
મીનાત્ સ્વરાશ્વિસ્તુ શનેસ્તુલસ્ય ।
વિંશન્મિતઃ પૂર્ણવલઃ પ્રદિષ્ટઃ
અર્વાગતીતે નવમે તુ પાતઃ ॥ ૪૬॥

યઃ સપ્તમસ્તુઙ્ગગૃહસ્ય રાશિઃ
સ નીચસંશ્વઃ કવિભિઃ પ્રદિષ્ટઃ ।

તેનૈવ માનેન ફલં વિધત્તે
તુઙ્ગાદ્વિલોમં બહુદુઃખકારિ ॥ ૪૭॥

મૂલત્રિકોણં દિનપસ્ય સિંહો
વૃષઃ શશાङ्कસ્ય કુજસ્ય મેષઃ ।
કન્યા તુ ચાન્દ્રેર્ધિષણસ્ય ચાપ-
સ્તુ .......... ભૃગોઃ સૂર્યસુતસ્ય કુમ્ભઃ ॥ ૪૮॥

મેષોऽરુણ્..........શ્વેતતરો દ્વિતીયો
નીલભૃતીયોऽરુણિતશ્ચતુર્થઃ ।
આપાણ્ડુર પંચમુખઃ પ્રદિષ્ટો
નારી વિચિત્રા સતતં સરૂપા ॥ ૪૯॥

તુલાધર કૃષ્ણારરો અથ વિભ્રુઃ
કીટઃ સુરક્તો નવમઃ પ્રદિષ્ટઃ ।
મૃગઃ સુમિશ્રઃ કપિતો ઘટાખ્યો
દ્યુતીવિહીનોऽનષસંજ્ઞિતશ્ચ ॥ ૫૦॥

ઇતિ શ્રીવૃદ્ધયવને રાશિપ્રભેદઃ પ્રથમોऽધ્યાયઃ ॥

---

આધ્યાય ૦૨
ગ્રહયોનિભેદાધ્યાયઃ
ઇનઃ પતઙ્ગે મિહિરોऽથ હિંસો
મિત્રોऽર્યમાખ્યો દ્યુમણિઃ ખરાંશુઃ ।
શૂરઃ સ્વગસ્તીક્ષ્ણમયૂખમાલી
દિનાધિપો વ્રધ્નહતિં પ્રદિષ્ટઃ ॥ ૧॥

શશી શશાङ्कઃ શશભૃવિશેશઃ
સામુદ્રકઃ શીતકરો દરેજ્યઃ ।
નક્ષત્રનાથઃ કુમુદાવબોધી
વિધુહિમાંશુઃ શશલાંછનશ્ચ ॥ ૨॥

વક્રઃ કુજો ભૂમિસુતસ્તરીયો
રાક્તઙ્ગભૂમિર્લોહિતગાત્રકઃ સ્યાત્ ।
ક્ષુધાતુરઃ સીક્ષિધરો મહીજઃ
કીનાંશકાન્તઃ કવિવલ્લભશ્ચ ॥ ૩॥

સર્વજ્ઞાભોજી વિષુધો બુધશ્ચ
ચાન્દ્રીઃ પ્રણેતા પ્રિયકૃદ્વિરાગી ।
સ્યાદ્ધૌર્તિકઃ કાશજજીયિતજ્ઞો
વિધાનકારી પ્રણતઃ સુતાલઃ ॥ ૪॥

જીવોઽઙ્ગિરા દેવગુરુર્મતિજ્ઞો
વક્તા ચ વાચસ્પતિપ્રમેયઃ ।
પીતામ્બરઃ પીતવિધિઃ સુરેષ્ટઃ
સંસિદ્ધિકર્મા પુરુહૂતમન્ત્રી ॥ ૫॥

શુક્રોઽસ્ફુજિદ્દૈત્યગુરુઃ સુધામા
કાવ્યો ભૃગુર્વીજનિધિઃ પ્રણેતા ।
મહોશના સંસ્મૃતિકજ઼્ કૃતજ્ઞઃ
કલાવિતાનપ્રબલઃ સુજાત્યઃ ॥ ૬॥

કોણઃ શનિર્ભ્રુરિતિ પ્રસિધ્ધઃ
કૃષ્ણો યમો મન્દ હતકું કાલી ।
સૌરિઃ સુતીવ્રસ્તૃણકઃ કરાલઃ
પ્રતીતકર્માધ્યયનપ્રદિષ્ટઃ ॥ ૭॥

રક્તો રવિઃ શીતકરઃ સિતશ્ચ
રક્તઃ કુજઃ સોમસુતસ્તુ પીતઃ ।
હરિદ્રવર્ણસ્ત્રિદશાધિપેજ્યઃ
શુક્રઃ સિતઃ સૂર્યસુતોઽસિતશ્ચ ॥ ૮॥

સહસ્રરશ્મિર્યવનેષુ જાતો
વિભાવરીશસ્તુ તથા કલિઙ્ગે ।
અવન્તિદેશોદ્ભવ એવ ભૌમઃ
કૌશામ્બિકેયો હિમરશ્મિપુત્રઃ ॥ ૯॥

સિન્ધૌ પ્રલાયસ્ત્રિદએશેશમન્ત્રી
જનાન્ત્યભૂર્ભોજકટે ભૃગોશ્ચ ।
સૌરાષ્ટ્રજસ્તિક્ષ્ણકરસ્ય પુત્રો
રાહુમેહાવર્વરસંભવશ્ચ ॥ ૧૦॥

..........સુતોઽથ રાઃઊઃ

..........શશાઙ્કો વિબુધઃ સુરેજ્યઃ ।
પ્રાગાધિનાથાઃ ક્રમશો વિચિન્ત્યા
દિગ્દ્વારહેન્વર્થમલં વિચિન્ત્યાઃ ॥ ૧૧॥

પાપો રવિઃ સૂર્યસુતશ્ચ વક્રઃ
ક્ષીણાઃ શશી તત્સહિતો બુધશ્ચ ।
સૌમ્યો ગુરુઃ સોમસુતઃ શશાઙ્કઃ
શુક્રશ્ચ સર્વે પ્રભવન્તિ તુઙ્ગે ॥ ૧૨॥

શુક્રઃ શશાઙ્કૌ યુવતી પ્રદિષ્ટૌ
નપુંસકૌ સૂર્યસુતો બુધશ્ચ ।
જીવાર્કભૌમાઃ પુરુષાઃ પ્રદિષ્ટાઃ
ષડ્વર્ગશુદ્ધાઃ પુરુષાઃ સમગ્રાઃ ॥ ૧૩॥

ધૃગ્વેદાનાથસ્ત્રિદશાધિપેજ્યો
યજુર્વિનેતા ભૃગુનન્દનશ્ચ ।
સામ્નાં તથા ભૂતનયઃ પ્રસિદ્ધો
હ્યથર્વિદેતસ્ય શશાઙ્કપુત્રઃ ॥ ૧૪॥

શુક્રામરેજ્યૌ દ્વિજલોકનથૌ
દિવાકરારૌ પૃથિવીપતીનામ્ ।
વૈશ્યાધિપઃ શીતકરશ્ચ સૌમ્યઃ
શૂદ્રાધિનાથો રવિજઃ પરેષામ્ ॥ ૧૫॥

સ્વતુઙ્ગમિત્રય ગૃહે નવાંશે
સૌમ્યેક્ષિતાનાં બલમેકમુક્તમ્ ।
સ્ત્રીસધ્યગાભ્યં શશિભર્ગવાભ્યાં
પુંક્ષેત્રગાનાં ચ તથા પરેષામ્ ॥ ૧૬॥

કાષ્ટાબલં સ્યાસુચિનિર્મલાભ્યાં
સૂર્યારયોર્યામ્યદિશાં તથૈવ ।
સૂર્યાત્મજસ્યૈવ કલત્રગસ્ય
શુક્રય ચન્દ્રય તથોત્તરસ્યામ્ ॥ ૧૭॥

ચેષ્ટાબલં ભાસ્કરરાત્રિપાભ્યાં
મૃગાદિગાભ્યાં કુટિલે પરેષામ્ ।
ગર્વર્કશુક્રા દિવસે વરિષ્ઠાઃ

સદા બુધોઽન્યે પ્રભવન્તિ રાત્રૌ ॥ ૧૮॥

સ્વવર્ષમાસોદયવાસરેષુ
સૌમ્યાઃ સિતેઽન્યે ચ ભવન્તિ કૃષ્ણે ।
સૂર્યસ્ય શત્રૂ ભૃગુસૂર્યપુત્રૌ
સૌમ્યઃ સમોઽન્યે સુહૃદઃ પ્રદિષ્ટાઃ ॥ ૧૯॥

મિત્રં દિનેશઃ શશલાંછનસ્ય
સમાઃ સજીવાર્કિસિતજ્ઞભૌમઃ ।
જીવાર્કચન્દ્રાઃ સુહૃદઃ કુજસ્ય
જ્ઞોઽરિઃ સમૌ ભાર્ગવસૂર્યપુત્રૌ ॥ ૨૦॥

શુક્રધુનાથૌ શશીજસ્ય મિત્રે
ચન્દ્રો રિપુર્જીવકુજાર્કિમધ્યાઃ ।
બૃહસ્પતેઃ શુક્રબુધૌ પરાખ્યૌ
સમોઽર્કજોઽન્યે સુહૃદઃ પ્રદિષ્ટાઃ ॥ ૨૧॥

સૌમ્યાર્કજૌ ભાર્ગવનન્દનસ્ય
મિત્રે સમો દેવગુરુઃ કુજશ્ચ ।
અન્યે પરે ભાસ્કરનન્દનસ્ય
મિત્રે સિતજ્ઞૌ રિપવસ્તથાન્યે ॥ ૨૨॥

ગુરુઃ સમો જન્મવિધૌ વિચિન્ત્યો
દશાયબન્ધુવ્યયવિત્તશોકૈઃ ।
મિત્રં સ્વમેષાં પ્રવદન્તિ નિત્યં
મિત્રં સુમિત્રં સમમેવ મિત્રં
શત્રુઃ સમઃ સ્યાત્ ક્રમશસ્તુ તજ્જ્ઞૈઃ ॥ ૨૩॥

દશે તૃતીયે નવપંચમે ચ
ચતુર્થાછિદ્રે મદને તથૈવ ।
પશ્યત્તિ પાદાત્તરપાદવૃદ્ધા
ફલાનિ યચ્છન્તિ શુભાશુભાનિ ॥ ૨૪॥

પિત્તાધિકો રક્તનખઃ સુરૂપઃ
કન્યાધિપસ્તાભ્રનસ્વઃ સુવક્ત્રઃ ।
..........વરો ભાસ્કરવીર્યયોગાત્
તા..........પ્રતાપી પરહા સદૈવ ॥ ૨૫॥

બુધ્દ્વાધિકઃ શસ્ત્રપરઃ કૃતજ્ઞઃ
શ્લેષ્માધિકો દીર્ઘતનુઃ પ્રસન્નઃ ।
સુલોચનઃ સત્યરતઃ સુકાન્તિ-
શ્ચન્દ્રસ્ય વીર્યાન્ મનુજઃ પ્રદિષ્ટઃ ॥ ૨૬॥

પાપઃ કૃતઘ્નઃ પુરુષઃ કુશીલો
હ્રસ્વઃ કુનેત્રઃ કુનખઃ પ્રદિષ્ટઃ ।
કુપ્યપ્રિયો દુર્વિષહઃ પ્રકામી
ભૌમસ્ય વીર્યેણ ભવેદસત્ત્વઃ ॥ ૨૭॥

સુરૂપદેહઃ સુભગઃ સુશીલઃ
પ્રિયંવદઃ શાસ્ત્રપરઃ કૃતજ્ઞઃ ।
ગૌરઃ સુધામા પૃથુગાત્રયષ્ટિ-
ર્જ્ઞવીર્યતઃ સમ્પ્રવદન્તિ મર્ત્યઃ ॥ ૨૮॥

સુચારુગાત્રઃ પ્રણતઃ પ્રતાપી
સુદીર્ઘગાત્રઃ કફવાન્ સદૈવ ।
વિદ્યાધિકઃ સત્યપરો મનસ્વી
સુરેજ્યવીર્યાત્ સતતં નયજ્ઞઃ ॥ ૨૯॥

ધર્મી સુદીપ્તિર્મનુજોઽતિદીર્ઘઃ
કફાત્મકઃ પ્રાપ્તયશઃ સદૈવ ।
નીરોગદેહઃ પ્રિયસાહસશ્ચ
શુક્રસ્ય વીર્યેણ ભવેત્ સુદારઃ ॥ ૩૦॥

..........કૃષ્ટદેહઃ પ્રખલોઽતિહ્રસ્વો
હિંસ્રઃ સદા દ્રોહપરઃ પ્રજાનામ્ ।
વિદ્યાવિહીનઃ સતતં કુચૈલો
વીર્યાચ્છનેઃ સમ્પ્રવદન્તિ મર્ત્યઃ ॥ ૩૧॥

સત્વાધિકાઃ સૂર્યશશાઙ્કજીવા-
..........ઓધિકઃ સૂર્યસુતઃ કુજશ્ચ ।
..........ઓધિકૌ ભાર્ગવસોમપુત્રૌ
સર્વે મનુષ્યપ્રકૃતિં નયન્તિ ॥ ૩૨॥

ઇતિ શ્રીવૃધ્દ્યવને ગ્રહયોનિભેદાધ્યાયઃ ॥

આધ્યાય ૦૩

આધાનાધ્યાયઃ

આધાનપૃચ્છોદ્ભવસામ્યમુક્તં
ફલં યતસ્તસ્ય પરીજ્ઞાણાર્થમ્ ।
યોગાન્ વિચિત્રાન્ પ્રવદાન્યતોઽહં
ચિહ્નૈર્યથા ગ્રન્તુવિનિશ્ચયઃ સ્યાત્ ॥ ૧॥

લગ્નં યદા પશ્યતિ સૂર્યસૂનુ-
ર્નીચાશ્રિતઃ સૌમ્યદૃશા વિહીનમ્ ।
તદાન્યજાતઃ પ્રવદાન્તિ મર્ત્યં
સૂર્યસ્ય વીર્યેણ દિવા પ્રસઙ્ગાત્ ॥ ૨॥

ભૌમો યદા વૈશ્યસમુદ્ભવેન
સક્ષીણચન્દ્રો નૃપસંભવેન ।
અસ્તં ગતો જ્ઞો દ્વિજવર્ણયોગાત્
સર્વૈરથ મ્લેચ્છસમુદ્રભવેન ॥ ૩॥

એષાં મૃતિર્દાસજનાદિનીચૈ-
ર્દ્વાભ્યાં વધૂભિર્વિકૃતિર્નરૈશ્ચ ।
ચતુષ્પદે મૂર્તિષુ ..........
આપ્યે ક્ષિતૌ પ્રાન્તરકે નૃસંજ્ઞે ॥ ૪॥

કીટે વિલોમં પ્રવદન્તિ ભાવં
વાચ્યં વિલગ્નાધિપતેઃ સ્વભાવાત્ ।
કલત્રતઃ સઙ્ગવિધિઃ પ્રદિષ્ટો
વિકારવૈકૃત્યસમો ગ્રહાશ્ચ ॥ ૫॥

યદા રવિર્નેક્ષતિ જન્મલગ્નં
તદાન્ધકારે સુરતપ્રયોગઃ ।
તસ્મિન્નુદક્સ્થે સ્વનવાંશભાગે
દિવા પ્રસઙ્ગઃ શનિના ચ રાત્રૌ ॥ ૬॥

સર્વૈરદૃષ્ટે પ્રવદેદરણ્યે
સ્ય મધ્યે જલલગ્નસંસ્થે ।

કલત્રગઃ શીતમયૂખમાલી
યદા રવિર્મૂર્તિગતસ્તદા સ્યાત્ ॥ ૭॥

સન્ધ્યા પ્રયોગો વ્યયગેઽથ ભૌમે
ઉર્ધ્વં પ્રશસ્તં રવિનન્દનેન ।
સીત્કારમિશ્રં સુરપૂજિતેન
શશ્વત્ ક્ષતક્રાન્તમુરુપ્રચણ્ડમ ॥ ૮॥

શુક્રેણ લીનં શશિના વિદગ્ધં
સ્યાત્ સોમજેનૈવ નિતાન્તદીર્ઘમ્ ।
આદ્યસ્ય માસસ્ય ભૃગુર્વિધાતા
તસ્મિન્ ભવેચ્છોણિતશુક્રસઙ્ગઃ ॥ ૯॥

તદ્રૂપચેષ્ટાબલહાનિદીપ્ત્યા
ગર્ભસ્ય વાચ્યં સ્વફલં જનન્યાઃ ।
દ્વિતીયમાસાધિપતિઃ કુજશ્ચ
તસ્મિન્ ધનં તસ્ય ભવેત્ સમન્તાત્ ॥ ૧૦॥

જીવસ્તૃતીયસ્ય કરાંઘ્રિવક્ત્ર-
ગ્રીવાદિકં તત્ર ભવેત્ સમગ્રમ્ ।
સૂર્યશ્ચતુર્થસ્ય પતિઃ પ્રદિષ્ટઃ
અસ્થીનિ તત્ર પ્રભાવન્તિ પુંસામ્ ॥ ૧૧॥

મજ્જા ચ મેદશ્ચ સુમાંસરક્તં
વ્યક્તિં સમાયાતિ વિભાગતશ્ચ ।
તસ્મિન્ સ સૌરિઃ કિલ પંચમસ્ય
તસ્મિન્ સમન્તાત્ કૃતિમાકૃણોતિ ॥ ૧૨॥

પ્રાપ્નોતિ પુષ્ટિં વિવિધાં ચ ગર્ભ-
વ્યક્તિં સમાગચ્છતિ કાયજાતામ્ ।
ષષ્ઠસ્ય ચન્દ્રો વિભુતામુપૈતિ
રોમાણિ તત્ર પ્રભવન્તિ ગાત્રે ॥ ૧૩॥

નખાશ્ચ જિહ્વા ગુદરન્ધ્રભાવે
ગુપ્તં સ્વરં બ્રહ્મભવે હિ તત્ર ।
..........ચન્દ્રસૂનુઃ કિલ સપ્ત .......
તસ્મિન્ સ્મૃતિઃ સ્યાત્ સતતં નરાણામ્ ॥ ૧૪॥

પંચેન્દ્રિયત્વં ચ વિવેકિતા ચ
કોઽહં કુતોઽત્રાશ્રયમભ્યુપેતઃ ।
લગ્નાધિનાથસ્ત્વથવાષ્ટમ્રસ્ય
માસસ્ય તસ્મિન્ પ્રચુરા બુભુક્ષા ॥ ૧૫॥

પક્ષેન્ મનુષ્યસ્ય તતઃ સુતૃપ્ત઼ઃ
ભુંક્તે જનિત્ર્યા રસભાવસઙ્ગાત્ ।
નક્ષત્રનાથો નવમસ્ય નાથ-
સ્તસ્મિન્ વિરક્તિર્વિવિધા નરાણામ્ ॥ ૧૬॥

ગર્ભાશ્રયઃ દુઃખમનન્તમેક્તં
કૃતં સ્મૃતિઃ પૂર્વશુભાશુભસ્ય ।
દિવાકરસ્તન્મરતોઽધિનાથ-
સ્તમિન્ પ્રદિષ્ટઃ પ્રસવો નરાણામ્ ॥ ૧૭॥

તસ્મિન્ યદિ સ્યાદ્ વ્યયગઃ શશાઙ્કઃ
સ્યાદષ્ટમો ભૂતનયઃ પ્રસૂતિઃ ॥ ૧૮॥

યો યસ્ય માસસ્ય ભવેદ્ધિ નાથઃ
સંભોગમેનં તુ ય્દા પ્રયાતિ ।
અર્વાગ્વિધત્તે સ તદાસ્ય જન્મ
વીર્યેણ હીનો યદિ વાત્મજેન ॥ ૧૯॥

યોગો યદાભાનગતઃ સુતારિ-
દ્વિજીયદુશ્ચિક્યગતૈઃ સમસ્તૈઃ ।
ભવેત્ પ્રસૂતિર્દશમે પરેણ
તદા નરાણાં ન ચ યોષિતાનામ્ ॥ ૨૦॥

સૂર્યેણ તાસાં પ્રવદન્તિ શોષં
યોગં નૃણાં વાધ્યમનેકરૂપમ્ ।
ક્લીવોદયે ક્લીવયુતે નવાંશે
ક્લીવસ્ય જન્મ પ્રભવેન્નરાણામ્ ॥ ૨૧॥

એવં પુમાંસઃ પ્રભવન્તિ નાર્યઃ
સ્ત્રીભાવયોગાદ્બહુધા વિશેષઃ ॥ ૨૨॥

નવાંશનાથશ્ચ યદા વિલગ્નં
પશ્યેત્ સુહૃત્કેન્દ્રગતઃ સુદીપ્તઃ ।
તદાત્મવર્ગેણ કરોતિ જન્મ
પ્રધાનભૂતં મનસા નરાણામ્ ॥ ૨૩ ॥

દુશ્ચિક્યજામિત્રગતાઃ પ્રચણ્ડાઃ
સૌમ્યા યદા કોશત્રિકોણસંસ્થાઃ ।
પુંજન્મદાસ્તત્ર ભવન્તિ દૃષ્ટા-
શ્ચન્દ્રેણ જીવેન શશાઙ્કજેન ॥ ૨૪ ॥

મન્દારયોઃ સપ્તમરાશિસંસ્થયો-
ર્દા નિષેકો મરણં તદા પિતુઃ ।
રવેઃ શશાઙ્કાત્ ત્વથ તજ્જનન્યા
એકાન્તરોધઃ પુરુષસ્ય વાચ્યઃ ॥ ૨૫ ॥

યદા હિમાંશુર્વ્યયગો દિવાકર-
શ્છિદ્રં ગતો ભૂતનયશ્ચતુર્થઃ ।
મૃત્યુસ્તદા સંભવતે હ્યુભાભ્યાં
શત્રેણ સૌરેણ તુ બન્ધનેન ॥ ૨૬ ॥

મૃત્યુકરઃ શીતકરશ્ચ રિષ્ફે
..........ઉસ્વસ્થિતઃ સૂર્યસુતઃ સભૌમઃ ।
ક્ષ ગર્ભસંભૂતિરિહ પ્રદિષ્ટા
યોગૈઃ સસૌમ્યૈઃ પ્રવ્દન્તિ કૃચ્છાત્ ॥ ૨૭ ॥

મૂર્તિસ્થિતસ્તીક્ષ્ણકરઃ કુજો વા
સક્ષીણમૂર્તિવિધુઃ રિષ્ફગો વા ।
વૃચાફલઃ સ્યાત્ સુરતોપચારો
નીચાશ્રિતૈસ્ત્ર્યાદિભિરેવ પુંસામ્ ॥ ૨૮ ॥

ક્લીવસ્ય લગ્ને બુધસસૌરયુક્તે
સુતસ્થિતે વા ત્વથ રિષ્ફગે વા ।
ક્લીવસ્ય જન્મ પ્રવદન્તિ પુંસાં
શુભેક્ષિતે તત્ર યથા સ્વરૂપમ્ ॥ ૨૯ ॥

યદા કુજઃ સપ્તમરાશિમાશ્રિતઃ
શનૈશ્ચરો વા રવિણા સમાહિતઃ ।

ન મૂર્તિગો દેવગુરુઃ સિતો વા
તદા ન ગર્ભં પ્રવદન્તિ યોષિતામ્ ॥ ૩૦॥

નભસ્તલસ્થો યદિ વાસુરાર્ચિત-
સ્ત્રિકોણગો દેવગુરુઃ શશીતગુઃ ।
ગર્ભસ્તદા સંભવતિ પ્રજા..........
નવાંશકો વા હિમરશ્મિજસ્ય ॥ ૩૧॥

તૃતીયજામિત્રગતૌ સિતાર્કૌ
શનૈશ્ચરો લાભગતો યદા સ્યાત્ ।
પુમાંસ્તદા ગર્ભગતઃ પ્રવાચ્યો
જીવોઽથવા સ્વોચ્છગતસ્ત્રિકોણે ॥ ૩૨॥

પુંવર્ગગે સૂર્યસુતે મહીજે
દિવકરે લગ્નમુપશ્રિતે વા ।
ગર્ભે પુમાન્ શીતકરેઽથવામ્બરે
સ્વતુઙ્ગે શુક્રદૃશા સમન્વિતે ॥ ૩૩॥

કુમ્ભે વિલગ્ને મિથુનેઽથ કન્યે
..........કે તત્સુતવર્ગગે વા ।
.......... પ્રવદન્તિ ગર્ભં
તદા નરાણાં ચ નવાંશકે વા ॥ ૩૪॥

સૌમ્યાન્વિતે તત્ર યથા સ્વરૂપં
નરં સ્ત્રિયં વા તનયૈર્વિહીનમ્ ।
પાપાન્વિતે ચાર્ધમુશન્તિ નાર્યા
અર્ધં નરસ્યૈવ ભવેધિ ગર્ભે ॥ ૩૫॥

સ્ત્રીલગ્નગે રત્રિકરે ચ શુક્રે
સમસ્થિતે સૂર્યસુતે સજીવે ।
સ્ત્રીગર્ભમુક્તં ધરણિસુતેન
સ્વવર્ગસંસ્થે શશિના ચ દૃષ્ટે ॥ ૩૬॥

હિમાંશુઃ સુરપૂજિતોઽથવા
શુક્રેણ દૃષ્ટઃ સમરાશિસંસ્થિતઃ ।
તદાબલાં ગર્ભગતા નૃણાં ચ
શનૈશ્ચરે વા રવિભાગમાશ્રિતે ॥ ૩૭॥

દ્વિદેહલગ્ને હિમરશ્મિયુક્તે
સ્વસંસ્થે રવિજે ચ લાભે ।
..........ઉ........દેલ્લગ્નગતં ........
..........સ્ત્રિપત્વં પ્રવદેદ્દુભાભ્યામ્ ॥ ૩૮॥

શનૈશ્ચરે મૂર્તિગતે શશાઙ્કે
ષષ્ઠે બુધે સપ્તમગે ચ શુક્રે ।
સૂર્યેઽષ્ટમે સૌમ્યવિવર્જિતે ચ
ત્રયઃ પુમાંસઃ પ્રવદન્તિ ગર્ભે ॥ ૩૯॥

એવં કુજે સમ્પ્રવદન્તિ નાર્યો
નપુંસકાખ્યાનિ દિવાકરે ચ ॥ ૪૦॥

ઇતિ શ્રીવૃધ્દ્ધયવને આધાનાધ્યાયઃ ॥

---

આધ્યાય ૦૪
જન્માધ્યાયઃ
..........પશ્યતિ દેવમન્ત્રી
નીતો અથવા રાત્રીકરઃ પ્રપૂર્ણઃ ।
સ્વોચ્છાશ્રિતઃ કેન્દ્રગતઃ સ્વવર્ગે
સુશુધ્દ્ધવીર્યસ્ય ભવેત્ પ્રસૂતિઃ ॥ ૧॥

લગ્નાશ્રિતે શીતકરે બુધે વા
નીચાશ્રીતે વા ગુરુણા તુ દૃષ્ટે ।
અન્યેન જાતં પ્રવદન્તિ માનવં
.......... ॥ ૨॥

શનૈશ્ચરે લગ્નગતે ચ નીચગે
પાપાંશકે પપયુતે ચ દૃષ્ટે ।
પાપસ્ય લગ્ને ગુરુણા વિમુક્તે
પાપાત્ પ્રસૂતિં પ્રવદન્તિ ચન્દ્રે ॥ ૩॥

સ્વમીનસંસ્થે રવીણા સમન્વિતે
લગ્ને ચરે સૂર્યસુતેન વક્રે ।
વ્યયસ્થિતે વા ધનગે ચ ચન્દ્રે

પિતુઃ પરોક્ષસ્ય ભવેત્ પ્રસૂતિઃ ॥ ૪॥

દ્વારં વદેત્ કેન્દ્રમુપગતાશ્ચ
તત્ર ગ્રહાભાવત એવ લગ્નાત્ ।
દીપોઽર્કતો લગ્નવશેન વર્તિઃ
સ્નેહં શશાઙ્કાત્ પ્રવદેદ્યથાવત્ ॥ ૫॥

વિલગ્નભાવોદ્ભવમૂર્તિકાઃ સ્યુ-
ર્નાનાદ્ભદેદ્વર્ણવિશેષમેષામ્ ।
શસ્યા ત્રીભાગાદ્ગૃહમુચ્છનીચાત્
તેષાં વરઙ્ગગનિ તથા પરેષામ્ ॥ ૬॥

યદા શનિઃ પંચમધર્મગોઽથવા
ભૌમોઽથ બન્ધુવ્યયગઃ કચંચન ।
તદાઙ્ગભઙ્ગં પ્રવદેત્ સમગ્રં
કૃષ્ટં બલોનં પ્રવદન્તિ કિંચિત્ ॥ ૭॥

હિમાંશુમાલી સ્વનવાંશકાસ્થિતઃ
સ્વોચ્છેઽથ કેન્દ્રે સુરનાચપૂજિતઃ ।
તુલ્યં તદા ધાતુવિવૃદગાત્રં
શુક્રેણ બદ્વાટી સમન્વિતશ્ચ ॥ ૮॥

ભૌમેઽષ્ટમે સૂર્યસુતે વિલગ્ને
નભસ્તલસ્થે હિમરાશ્મિજે ચ ।
બને પ્રસૂતિં પ્રવદન્તિ યોષિતાં
સૂર્યેણ માર્ગે મનુજૈર્વીવર્જિતે ॥ ૯॥

શનૈશ્ચરે મૂર્તિગતે હિમાંશુજે
વ્યયસ્થિતે નીચગતે પ્રભાકરે ।
વિલોમજન્મ પ્રવદન્તિ ભૂમિજે
સભર્ગવે નાલવિવેસ્ટિતસ્ય ॥ ૧૦॥

ચન્દ્રેઽમ્બરસ્થે શશિજે ચ કામે
બૃહસ્પતૌ મૂર્તિગતે સ્તનાન્તરે ।
ગર્ભસ્ય તલ્લાંછનમુક્તમાદ્યૈ-
ર્વિપર્યયે પૃષ્ઠાવિભાગતશ્ચ ॥ ૧૧॥

જિવે વિલગ્ને ભૃગુજે વ્યયસ્થે
શશઙ્કજે લાભમુપાશ્રિતે ચ ।
બામાઙ્ગસંસ્થસ્તિલકઃ પ્રવાચ્યઃ
ષડ્વર્ગશુદ્ધૌ ત્વથ દક્ષિણસ્થઃ ॥ ૧૨॥

વ્યયે શશિ લભગતઃ ખરાંશુ-
સ્ત્રિકોણગઃ સૂર્યસુતઃ સપાપઃ ।
હીનાઙ્ગતાં તત્ર વદન્તિ ભૂમિજે
ગાત્રાન્ધિકત્વં પ્રવદન્તિ ભાગતઃ ॥ ૧૩॥

શનૈશ્ચરે વીર્યયુતે તુ નૈ..........
સૂર્યેણ નામ્રોદ્ભવમેવ ભૂષણમ્ ।
ચન્દ્રેણ માણિક્યભવં હિરણ્યજં
સૌમ્યેન શુક્રેણ ચ રીતિસમ્ભવમ્ ॥ ૧૪॥

જીવેન નાનાવિધમિષ્ટક્રામદે
ભૌમેન વિન્ધાદ્બહુવસ્ત્રસમ્ભવમ્ ॥ ૧૫॥

ગૃહં શશાઙ્કેન સુદારસમ્ભવં
મનોજ્ઞરૂપં વિવિધાન્વિતં ચ ।
સુસૂત્રમુક્તં મણિકૂઙ્ટિમાન્વિતં
ષડ્વર્ગશુદ્ધેન ચ તુઙ્ગગેન ॥ ૧૬॥

ભૌમેતુ દગ્ધં સ્વનવાંશકસ્થે
પરાંશકસ્થે શિથિલસ્વભાવમ્ ।
કુવસ્તુયુક્તં બહુપપદૃષ્ટે
સૌમ્યેક્ષિતે વા ધનધાન્યયુક્તમ્ ॥ ૧૭॥

સૂર્યેણ ચિત્રં બહુગૈરિકાદ્યૈઃ
પ્રભાસમેતં બહુભૂમિકં ચ ।
એકત્ર રમ્યં ત્વપરત્ર શિર્ણં
પાપેક્ષિતે વા તપનસ્વભાવમ્ ॥ ૧૮॥

બુધેન રમ્યં વા બહુવંશયુક્તં
પટાવૃનં ભૂરિવિનાઢ્યમેવ ।
શુચિપ્રગલ્ભૈઃ પુરુષૈઃ સમેતં
વિચિત્રરૂપં પ્રભયા સમેતમ્ ॥ ૧૯॥

જીવેન નાનાવિધરત્નયુક્તં
સુભૂરિશાલં બહુમણ્ડલાઢ્યમ્ ।
વિતાનચૂલાધ્વજસર્વદિક્ષ
પ્રમણ્ડિતં ધાતુરસૈર્વશલૈઃ ॥ ૨૦॥

સ્વભાવરસ્યં સુવિદગ્ધલોકં
મનોરમં સ્ફાટિકકાંચનાઢ્યમ્ ।
તુઙ્ગં વિશાલં સુવિભક્તમાર્ગં
વિચિત્રકાષ્ઠપ્રભવં નિતાન્તમ્ ॥ ૨૧॥

શીર્ણી કુચેલૈઃ મનુજૈઃ સમેતં
રક્તાન્વિતં સ્ત્રીરહિતં સદૈવ ।
ભવેદ્ગૃહં કણ્ટકસંઘયુક્તં
રૌદ્રં કરાલં વિકૃતપ્રતાપમ્ ॥ ૨૨॥

શનૈશ્ચરે કેન્દ્રગતે સ્વનીચગે
સુતસ્થિતે ભૂતનયે સભાસ્કરે ।
ગૃહં તૃણૈઃ સર્વત એવ યુક્તં
જીર્ણં નિતન્તં તપનસ્વભાવમ્ ॥ ૨૩॥

શનૈશ્ચરાંશે હિમરશ્મિપુત્રે
યદા તનુસ્થઃ સ્વગૃહે શશાઙ્કઃ ।
તદા ગૃહં નૂતનવિરુધાવૃતં
ક્વચિત્ સુકાષ્ટૈઃ પરીતો વિપશ્ચિતામ્ ॥ ૨૪॥

જીવો યદા બન્ધુગતઃ સ્વભાવગો
નભસ્તલસ્થો ભૃગુનન્દનસ્તદા ।
ચન્દ્રોઽસ્તગો મૂર્તિગતઃ શનૈશ્ચર-
સ્તદાવૃતં વસ્ત્રવરૈઃ સુમન્દિરમ્ ॥ ૨૫॥

શનૈશ્ચરે મૂર્તિગતે કુજેઽથવા
પાપાંશકસ્થે બહુપાપવીક્ષિતે ।
ગૃહાગ્રયં જન્મ વદેચ્છુભાંશકે
કુટારકે છિરયુતે વિરૂપકે ॥ ૨૬॥

ઇતિ શ્રીવૃધ્દ્યવને જન્માધ્યાયચતુર્થઃ ॥

આધ્યાય ૦૫

આયુર્દયાધ્યાયઃ

આયુઃ પરં માનવવારણાનાં
શતં સવિંશં કુલસમ્ભવાનામ્ ।
દ્વાત્રીંશતિર્જાત્યતુરઙ્ગમાણાં
ખરોષ્ટ્રયોર્વિંશતિવર્ષસંખ્યા ॥ ૧॥

ચતુર્વિહીના ચ તથાવિકાનાં
કાસારગોશૂકરર્મકટાણમ્ ।
ચત્વારિવિંશત્ કથિતા શુનાં ચ
તદર્ધતો વ્યઘ્રહરિદ્દૃકાણામ્ ॥ ૨॥

ત્રિષષ્ટિસંજ્ઞઃ પરભાજનાનાં
દ્વિજિહ્વગૃધ્રપ્રભવઃ સહસ્રમ્ ।
સંવત્સરાઃ ષડ્વટટિદૃભાનાં
યૂકાપતઙ્ગાકૃમિકીટકાનાં
માસાર્ધજચૈવ પિપીલિકાનામ્ ॥ ૩॥

[વૃક્ષોદ્ભવો વર્ષશતં પ્રદિષ્ટ]
સ્તેષાં પતાશો દ્વિગુણેન વાચ્યઃ ।
અશ્વત્યન્યગ્રોધશમીસમુત્યઃ
શનિ વિવૃધ્દ્વા દ્વિજવૃક્ષતશ્ચ ॥ ૪॥

કેન્દ્રેષુ સૌમ્યા યાદિ પાપહીનાઃ
સવેષુ જાતસ્યા મિતિર્ન વાચ્યા ।
..........ચ્છાશ્રિતા વા મિ ........પારસેજ્ઞા
વિમિત્રિતા વા મનુનસ્ય તજ્જ્ઞૈઃ ॥ ૫॥

સુહૃદ્ગૃહસ્થૈઃ સકલૈસ્તુ તુઙ્ગ-
મથ પ્રથાતૈર્ગૃહમંશકં વા ।
આયુઃ પરં સૂત્રનરસ્ય વાચ્યં
સર્વૈશ્ચ વૈ વૃધ્દિગૃહપ્રયાતૈઃ ॥ ૬॥

અર્થસંસ્થા યદિ પાપખેટાઃ

ષડાષ્તમસ્થા યદિ વા સ્યુરેવ ।
ષષ્ઠ્યાંશકો મૃત્યુરિહ પ્રદિષ્ટઃ
સૌમ્યૈર્દિના પ્રોદ્ગતવંશયોગે ॥ ૭॥

કેન્દ્રેષુ પાપા યદિ સૌમ્યહીના
ચ વીક્ષતે દેવગુરુઃ સિતો વા ।
મૃત્યુસ્તદા શસ્ત્રકૃતઃ પ્રવાચ્યો
વર્ષસ્ય મધ્યે કૃતસમ્ભવે વા ॥ ૮॥

ષષ્ઠાષ્ટમસ્થા યદિ સૌમ્યખેટાઃ
પાપા ધનદ્વાદશગ યદા સ્યુઃ ।
તદા વિનાશો મનજસ્ય વચ્યો
માસદ્ભવેનૈવ ચતુષ્પટોન્યઃ ॥ ૯॥

ષષ્ઠેઽષ્ટમે વા યદિ શિવરાશ્મિઃ
પાપેન દૃષ્ટઃ સહિતોઽથવા સ્યાત્ ।
સદ્યો વિહન્યાન્ મનુજં ન દૃષ્ટો
યદા સુરેજ્યેન શુભસ્ત્રીતેન ॥ ૧૦॥

ક્ષીણઃ શશી મૂર્તિગતઃ સપાપો
દ્યૂને ચ પાપો ન શુભસ્તુ કેન્દ્રે ।
મૃત્યુસ્તદા વત્સરમધ્યમઃ સ્યાત્
નરસ્ય દૃષ્ટો ન યદા શુભેન ॥ ૧૧॥

એતૈર્વીવાહાંશગુણૈર્વિલગ્ને
તાડ્યો ગ્રહો નાગનભઃ શશઙ્કઃ ।
રાશ્યાદિતો દસ્ત્રશશઙ્કભક્તઃ
શેનાબ્દપુર્વ ..........આયુરુક્તઃ ॥ ૧૨॥

દ્રેષ્કાણવર્ગોત્તમરન્ધ્રભાગ-
સ્વક્ષેત્રગસ્ય દ્વિગુણઃ પ્રદિષ્ટઃ ।
દ્વિઘ્નઃ સ્વતુઙ્ગે કટિલે ચ માર્ગે
દ્વયોશ્ચ લબ્ધૌ ત્રિગણઃ પ્ર..........ઇ........ઃ॥ ૧૩॥

અર્ધં હરત્યેવ હિ નીચસસ્થઃ
અસ્તં ગતશ્ચાર્કસુતો નિહન્તિ ।
શુક્રશ્ચ આયુઃકલુષોઽસ્તગો વા

સર્વે ત્રીભાગા રિપુગા ભવન્તિ ॥ ૧૪॥

અર્ધાર્દિષષ્ઠાન્તમપક્રમેણ
ત્વેકાદશાદેઃ પ્રહરન્ત્યાનિષ્ટાઃ ।
સર્વે વ્યયસ્થાશ્ચ શુભાસ્તટર્ધં
વિલોમતો વીર્યયુતશ્ચ સૌમ્યઃ ॥ ૧૫॥

ઇતિ શ્રીવૃદ્ધયવન આયુર્દાયાધ્યાયઃ પંચમઃ ॥

---

આધ્યાય ૦૬

દશાધ્યાયઃ

આયુર્દયા યેન પુરા હી દન્તં
તત્સંમિતા તસ્ય દશા પ્રદીષ્ટા ।
શન્તાન્તરા સા ચ ગણૈર્વિચિન્ત્યા
દોષૈશ્ચ તજ્જ્ઞૈઃ ફલનિર્ણયાર્થમ્ ॥ ૧॥

નવાંશમિત્રસ્વગૃહોપગસ્ય
સ્વભાવશુભા હિ દશા ગ્રહસ્ય ।
આતોઽન્યગ્રા પાપફલા પ્રદિષ્ટા
ધાભ્યં ફલં .......... સમં મુનીનામ્ ॥ ૨॥

રવેર્દશાયામતિતિક્ષ્ણમોજઃ
પ્રાપ્નોતિ માનોપચયં મહાન્તમ્ ।
ધનાનિ ચામીકરતામ્રશસ્ત્રં
સંજાયતે બન્ધુસુખં શુભાયામ્ ॥ ૩॥

ભયાવહસ્તેયપરાપવાદાન્
ક્લેશાન્ વિચિત્રાન્ કુલવૈરમુગ્રમ્ ।
પાપાત્મકાયાં ગુદવક્ત્રરોગ-
મનેકશોક મતિવિભ્રમં ચ ॥ ૪॥

નિત્યં વિભૂષામણિમંચલાભં
મિષ્ટાન્નપાનં પ્રમદાનુરાગમ્ ।
ચાન્દ્રી દશા સાધુફલા નરાણાં
નરેન્દ્રપૂજાં તનુતે સદૈવ ॥ ૫॥

પ્રવાસં સ્વજનૈર્વિવાદ-
મિષ્ટૈર્વિયોગં સતતં રુજં ચ ।
અનિષ્ટરૂપાં પરપક્ષવૃધિં
ચાન્દ્રી દશા રોગભયં કરોતિ ॥ ૬॥

પ્રાપ્નોતિ ભૌમસ્ય દશાવિપાકે
ધનાનિ ચૌર્યાહવવિક્રમેભ્યઃ ।
સૌવર્ણતામ્રક્ષિતિપાશ્રિતઃ સદા
શુભૈઃ પ્રયોગૈર્વિવિધૈરનિષ્ટૈઃ ॥ ૭॥

તૃષ્ણાજવરાસૃગ્વિષપિત્તમૂર્છા-
ગાત્રાઙ્ગભઙ્ગાન્ વિવિધાંશ્ચ રોગાન્ ।
પાપે તુ ભૌમસ્ય દશાવિપાકે
ક્રોધક્રિયોત્સાહમધર્મબુદ્ધિમ્ ॥ ૮॥

બૌધીં દશાં પ્રાપ્ય ગુણપ્રશંસાં
પ્રાપ્નોતિ શશ્વત્ પ્રિયતાં નૃલોકે ।
સુવર્ણમુક્તામણીરત્નલાભં
શુભાં વિભૂતિં ચ જનાતિગાં ચ ॥ ૯॥

પ્રમેણ યુક્તઃ કફપિત્તભાજી
વિવર્ણદેહઃ પુરુષઃ પ્રસન્નઃ ।
બૌધીં દશાં પ્રાપ્ય વિરૂપચેષ્ટૌ
ભવેન્ મનુષ્યઃ પતિતાનુરક્તઃ ॥ ૧૦॥

ગુરોર્દશાયાં લભતેઽતિમાનં
ગુણોદયં બુદ્ધવબોધમગ્ન્યમ્ ।
સ્થિતિપ્રતાપદ્યુતિકાન્તિભોગાન્
..........અત્મ્યચેષ્ટાફલમુત્તમાયામ્ ॥ ૧૧॥

મૂર્દાર્થચિન્તા ચ વિરૂપકાયાં
રોગશ્ચ શશ્વત્ પ્રિયવિપ્રયોગઃ ।
ગુરોર્દશાયાં મુખરોગપીડા
સંજાયતે સ્ત્રીનૃપજં ભયં ચ ॥ ૧૨॥

ભૃગોર્દશાયાં લભતે સુખાનિ
સ્ત્રીપુત્રજાતાનિ નૃપોદ્ભવાનિ ।

ઇષ્ટાન્નપાનામ્બરગન્ધમાલ્યં
શુભાશ્રયાયાં પરમાં ચ તુષ્ટિમ્ ॥ ૧૩॥

અસત્ફલાયાં ચ ભૃગોર્દશાયાં
નૃપૈર્વિષાદિ કુલવૃન્દમુખ્યૈઃ ।
વિરુધ્યતેઽધર્મમુપાશ્રીતૈચ
સમ્પ્રીયતે દુષ્ટનિતમ્બનીભિઃ ॥ ૧૪॥

પ્રાપ્નોતિ સૌરસ્ય દશાપ્રવેશે
શુભે શુભં ભૂપતિભૂમિસઙ્ગતઃ ।
કુધાન્યજીર્ણામ્બરગર્દભોષ્ટ્રૈઃ
સંયુજ્યતેઽર્થૈર્મહિષાટિભીશ્ચ ॥ ૧૫॥

સૌરસ્ય પાપે તુ દશાવિપાકે
કુતુમ્બવૈરં પ્રિયવિપ્રયોગઃ ।
સંજાયતે ગુહ્યવિકારરોગઃ
કુમિત્રસઙ્ગઃ પશુવિત્તહાનિઃ ॥ ૧૬॥

દશા વિલગ્નસ્ય ચરસ્ય પૂર્વે
ભાગે તૃતીયે શુભદા નરાણામ્ ।
મધ્યા દ્વિતીયે વિફલા તૃયે
શસ્તા સમાન્ત્યા દ્વિભવે વિલોમઃ ॥ ૧૭॥

સ્થિરે ખલેષ્ટાન્યતમા નરાણામ્ ॥ ૧૭॥

વર્ગાઃ સદૈવ ક્રમશો વિચિન્ત્યાઃ
શુભાતિશુભ્રા ગ્રહસૌમ્યયુક્તા ।
મધ્યાફલા મધ્યફલા ખલા ચ
ખલાખલાન્યાતિખલા પ્રદિષ્ટા ॥ ૧૮॥

શુભા શુભં યોગફલં વિધત્તે
હિરણ્યમુક્તાફલરત્નલાભાન્ ।
આરોગ્યમોજઃ સ્વકુલસ્ય પૂજાં
દશા વિલગ્નસ્ય નૃણાં પ્રસૂતે ॥ ૧૯॥

મધ્યા તુ મધ્યં ફલમાતનોતી
દશા વિલગ્નસ્ય શુભા નરાણામ્ ।

કષ્ટેન લાભં નિધનેન મૈત્રીં
કુપણ્યસેવાવિકૃતિપ્રમાદમ્ ॥ ૨૦॥

પાપા વિલગ્નસ્ય દશા પ્રયાતા
ભયં સુશોર્કં કલહં વિવાદમ્ ।
કરોતિ નિત્યં પરદારસઙ્ગં
વિબુદ્ધિનાશં સતતં પ્રવાસમ્ ॥ ૨૧॥

નિશાકરાદિત્યવિલગ્નભાનાં
તત્કાલયોગાદધિકં બલં યઃ ।
વિધર્તિ તસ્યાદિદશા પ્રયોજ્યા
સર્વગ્રહાણામુદયાન્વિતાનામ્ ॥ ૨૨॥

તતસ્ત તત્રૈવ ગતસ્ય ચિન્ત્યા
ચતુર્થકામામ્બરગસ્ય પશ્ચાત્ ।
તેષાં દ્વિતીયે ચ તતસ્તૃતીયે
સ્થાને સ્થિતસ્ય ક્રમશો ગ્રહસ્ય ॥ ૨૩॥

એકર્ક્ષગાનાં તુ બલાધિકસ્ય
દેયા દશા પૂર્વતરં તતોઽન્યા ।
દશાર્ધકાલં લભતેઽર્કસંસ્થ-
સ્તૃતીયભાગં ચ ત્રિકોણગો યઃ ॥ ૨૪॥

ભાગં ચતુર્થ ચતુરસ્ત્રસંસ્થઃ
સપ્તાંશકં સપ્તમગો સ વાચ્યમ્ ।
સદા ફલં વા સુરરશ્મિયોજ્યં
મિત્રોચ્છનીચસ્વગૃહત્રિકોણજમ્ ॥ ૨૫॥

ફલાનિ શેષાણિ દશાવિપાકે
નિજાનિ દેયાનિ નિજગ્રહસ્ય ।
અન્તર્દશાસ્યેવ વિચિન્ત્ય જન્મ
તત્કાલજાતાનિં યથાતથાનિ ॥ ૨૬॥

ષડ્વર્ગવીર્યેક્ષણલગ્નભાવજા
દશાદિપંચોત્તરવૃદ્ધિસંયુતાઃ ।
દશાસુ સર્વાસુ ફલાંશકાઃ સ્મૃતાઃ
શશ્વદ્ગ્રહાણાં ક્રમશો નિસર્ગજાઃ ॥ ૨૭॥

ગ્રહસ્ય લિપ્તાઃ સ્વફલાંશતાડિતા-
સ્તત્કાલજાતૈઃ ફલજૈર્વિભાજિતાઃ ।
ફલાની શેષાણિ યથાગતાનિ
દશાંશભેક્તૃણિ નિજાંશસંખ્યયા ॥ ૨૮॥

ભનોર્મૃગાદ્યં શશિનો ઘટાદિકં
તુલાદિ ભૌમસ્ય ગુરોરજાદિકમ્ ।
બુધસ્ય યુગ્માદિ હયાદિકં ભૃગોઃ
કર્કાટી સૌરેઃ પ્રવિચિન્તયેત્ ફલમ્ ॥ ૨૯॥

સ્વતુઙ્ગહીનસ્ય કલા ગ્રહસ્ય
વિભાજીતાઃ પુષ્કરસપ્તપાણિભિઃ ।
વિંશાંશકાદ્યં ફલમાપ્તમૌચ્છકં
નખાધિકં ત્યાજ્યમયો નખેભ્યઃ ॥ ૩૦॥

ફલં ફલાંશાભિહતં નખોદ્ભૃતં
શેષં ફલં વિંશતિર્ભાગસંમીતમ્ ।
જ્ઞેયં તતો નીચફલં સ્વસપ્તમા-
દ્રાશેર્ગ્રહાણાં વિધિનામુનૈવ ॥ ૩૧॥

લગ્ને તૃતિયેઽષ્ટમકે ચ લગ્નજં
ફલં તથા વિંશતિમેવ ભાવજમ્ ।
સ્થાને વિચિન્ત્યં કુટિલો ..........
ણ્યેતાનિ સૌમ્યાનિ દશાફલં ચ ॥ ૩૨॥

નીચેઽસ્તગે ચાર્ધફલં શુભગ્રહે
પૂર્ણત્વમિષ્ટૈર્વિપરિતમુચ્છગૈઃ ।
નીચાસ્તગે વક્રગતે સમં ફલં
તસ્યૈવ તુઙ્ગે દ્વિગુણં પ્રકીર્તિતમ્ ॥ ૩૩॥

પાપા દશા પાપભવાન્તરા વા
પાપાષ્ટવર્ગે ચ યદા ન શુભ્રા ।
.......... મૃત્યુર્દિવસે હિ તસ્ય
સંજાયતે પાપકૃતસ્ય જન્તોઃ ॥ ૩૪॥

દશાપ્રવેશેઽષ્ટમગે તુ દૃષ્ટે

સ્વેનારિણા શત્રુગૃહસ્થિતેન ।
તદામમૃત્યું કુરુતે દશાયાં
તસ્યૈવ પાપોદ્ભવપાકમધ્યે ॥ ૩૫॥

ત્રિંશાંશકે યસ્ય ગૃહસ્ય સંસ્થઃ
સ્થાનેઽષ્ટમે પાપફલઃ શુભો વા ।
તેનૈવ દૃષ્ટઃ કુરુતેઽપમૃત્યું
.......... રેણ તસ્યૈવ યશોદિતે વા ॥ ૩૬॥

પાકાધિપઃ સર્વવિરુદ્ધવર્ગે
સ્થિતોઽપમૃત્યું કુરુતે નરાણાં
ક્રૂરૈર્વિદૃષ્ટો યદિ વા ન સૌમ્યૈ-
ર્નીચાશ્રિતો વા ખલુ નિર્જિતશ્ચ ॥ ૩૭॥

ષષ્ટ્યબ્દમધ્યે તુ યદાયુઃ સપ્ત
વિભાજયેત્તેન પરંપરાણામ્ ।
લબ્ધં ચ યચ્છેદકસંશ્રિતં તન્
દ્વેદાત્ પરં જન્મવદેવ ચિન્ત્યમ્ ॥ ૩૮॥

છેદોઽપમૃત્યુર્મરણં તૃતીયં
ભવેન્નરાણાં નિયતં સદૈવ ।
ધર્મક્રિયાભીર્હરતેઽપમૃત્યું
છેદં તુ કૃચ્છ્રેણ ગ્રહપ્રભાવાત્ ॥ ૩૯॥

અસાધનં સ્થાન મરણં નરાણાં
સર્વૈરુપાયૈરપિ દેવતાનામ્ ॥ ૪૦॥

પાકાધિપઃ સ્યાદ્યદિ સૌમ્યવર્ગે
દશાપ્રવેશે ત્વથ તુઙ્ગગો વા ।
ન છેદકઃ સ્યાન્ન તથાપમૃત્યુ-
સ્તસ્યાં દશાયામિદમાહ વેધાઃ ॥ ૪૧॥

નીચપ્રવૃત્તા રવિમણ્ડલસ્થા
ગ્રહેણ ભગ્નાઃ ખલવર્ગયુક્તઃ ।
સર્પાહતા મન્ત્રબલેન યદ્વત્
તદ્વત્ સવર્ગાઃ શુભદા ન ખેટાઃ ॥ ૪૨॥

એવાંવિધ ધ્નન્તિ શુભાનિ સર્વે
ફલાનિ પાપાનિ ચ વર્ધયન્તિ ।
મિશ્રાશ્ચ મિશ્રં પરિપાચયન્તિ
નીચાસ્તકેન્દ્રે ફલપાદહાનિઃ ॥ ૪૩॥

ઇતિ શ્રીવૃધ્દ્ધયવને દશાધ્યાયઃ ॥

---

આધ્યાય ૦૭
અન્તર્દશાધ્યાયઃ
ભનોર્દશાયાં યદિ શીતરશ્મે-
ર્દશાવિપાકં કુરુતે તદા સ્યાત્ ।
ક્લેશેન વિત્તં સ્વધનેન મિત્રં
ભોગાંચ નિત્યં હિ વિડમ્બનેન ॥ ૧॥

હૃદ્રોગમીર્ષ્યં સ્વજનાપમાનં
ભયં સુશોકં પ્રિયલોકનાશમ્ ।
ભાનોર્દશાયાં કુરુતે પ્રવિષ્ટા
દશા મહીજસ્ય ક્ષતપ્રકોપમ્ ॥ ૨॥

બૌધી વિધત્તે પતિતસ્ય લાભં
કુમિત્રસઙ્ગં પરિવારલાભમ્ ।
અપાત્રદાનં વિચયાતિવેગં
ભાનોર્દશાયાં યદિ સમ્પ્રવિષ્ટા ॥ ૩॥

ભાનોર્દશાયાં સુરપૂજિતસ્ય
દશા વિધત્તે કુનૃપેણ સખ્યમ્ ।
અસદ્જયં પાપવિધાનલાભં
દુષ્ટાબલાસઙ્ગમસત્યમેવ ॥ ૪॥

શૌક્રી ખરાંશોર્યદિ સમ્પ્રવૃત્તા
દશા દશાયાં કુરુતે કુપુત્રમ્ ।
કાવત્તલા ..........કુજનેન સખ્ય
વિદેશતઃ પ્રાપ્તિયથો નરાણામ્ ॥ ૫॥

દશાવિપાકે દિનપસ્ય સૌરી
દશા પ્રવિષ્ટાક્ષિરુજં વિધત્તે ।

વૃચાટનં બન્ધુજનેન વૈરં
ક્ષુચ્છસ્ત્રભૂપાલકૃતં ભયં ચ ॥ ૬॥

લાગ્ની દશા સૌમ્યવિલગ્નજાતા
ભાનોર્દશાયાં ખરવેશરાપ્તિમ્ ।
અશ્રીયમસ્ત્રપ્રભવં ચ લાભં
શ્ચામર્કટવ્યોમવિચારિણીનામ્ ॥ ૭॥

પાપોદ્ભવા પાપમાતિં વિધત્તે
દ્વિજામરદ્વેષગુરુપ્રકોપમ્ ।
અન્તર્દશા સા દિનપસ્ય નિત્યં
ભયં દશાયાં નૃપચૌરજાતમ્ ॥ ૮॥

તૃષ્ણૌષધીસેવનચૌર્યલાભં
સૌખ્યં તદોથ્યં વિટકામિનિભીઃ ।
કુપુણ્યાં વિવિધૈશ્ચ દમ્ભૈ
રવિર્દશાયાં કુરુત્ હિમાંશોઃ ॥ ૯॥

કુભોજનાછાદનપાનલાભં
કુસ્ત્રીપ્રસઙ્ગં કુધનં વિચિત્રમ્ ।
દશા મહીજસ્ય સુધાકરસ્ય
પ્રાપ્ના દશાયાં પરમોચ્છણં ચ ॥ ૧૦॥

..........ત્નાર્થહસ્ત્યશ્વસુવર્ણલા
કુતુમ્બવૃદ્ધિં પ્રિયતાં ચ લોકે ।
બૌધી દશા ચન્દ્રદશાપ્રવેશે
કરોતિ મર્ત્યં બહુવિત્તલાભમ્ ॥ ૧૧॥

નરેન્દ્રપૂજા દ્વિજદેવભક્તિ-
ર્યશઃ પ્રશંસા સ્થિરમિત્રલાભમ્ ।
પુણ્યાનિ શુભ્રાણિ જયં પરેષાં
ચાન્દ્યાં યદા દેવગુરોઃ પ્રયાતા ॥ ૧૨॥

લાભં પુરગ્રામમહાધનાનાં
વિહારવિદ્યાગમવાજિનાં ચ ।
શૌક્રી દશા ચન્દ્રદશાં પ્રયાતા
કરોતિ તુષ્ટિં પરમાં સદૈવ ॥ ૧૩॥

શૌરાબલીસધિતમુગ્રલાભં
પાપાનુરાગં વ્યસનેન સિદ્ધિમ્ ।
સૌરેર્દશા ચન્દ્રદશાં પ્રયાતા
વેશ્માનુરાગં કુરુતે પ્રભૂતિમ્ ॥ ૧૪॥

સૌમ્યોદયોત્થા હિ દશા હિમાંશો-
ર્યદા દશાયાં કુરુતે પ્રવેશમ્ ।
આર્થલાભં કૃષિકર્માસિદ્ધિં
નૃણાં વિધત્તે વિવિધાંશ્ચ ભોગાન્ ॥ ૧૫॥

ખલોદયેત્ય હિમગોર્દશાયાં
ખરોષ્ટ્રધર્મપ્રભવં ચ લાભમ્ ।
કુશાસ્ત્રસેવાં પ્રણયેન વૈરં
સ્વવાન્ધવૈર્મિત્રસુતૈશ્ચ નિત્યમ્ ॥ ૧૬॥

દશા ખરાંશોર્ધરણિસુતસ્ય
યદા દશાયાં કુરુતે પ્રવેશમ્ ।
તદા જ્વરશ્લેષ્મસુપિત્તવાઇતૈઃ
પીડાં વિધત્તે ક્ષતજૈર્વિકારૈઃ ॥ ૧૭॥

ભૌમ્યાં હિમાંશોઃ સહસા પ્રયાતા
દશા દશાયાં કુનયેન લાભમ્ ।
ધ્યુતાનુરાગં પરદારસૌખ્યં
પ્રપોષણં દેવગુરુદ્વિજાનામ્ ॥ ૧૮॥

બૌધી દશા ભૌમદશાં પ્રયાતા
કરોતિ સૌખ્યં વનદેશજાતમ્ ।
આત્મપ્રશંસાજનિતં ચ તેષં
નૃણાં મહાયાસભવં ચ સૌખ્યમ્ ॥ ૧૯॥

ભૌમ્યાં યદા દેવપુરોહિતં
દશા પ્રયાતા ત્વરિતં દશાયામ્ ।
કરોતિ દૈન્યપ્રભવં ચ લાભં
પરાબલાયાઃ સ્વકલત્રહાનિમ્ ॥ ૨૦॥

વિધત્તેઽન્ત્યજનેન મૈત્રીં

ક્વચિદ્વિષાદં ક્વચિદેવ હર્ષમ્ ।
પરાપરાધોદવમાશકર્મ
નૃણાં વિધત્તેઽલ્પફલાં ચ વૃદ્ધિમ્ ॥ ૨૧॥

ગુરુપ્રકોપં બહુગુહ્યરોગં
પામાવિચર્થિપ્રભવાં હિ પીડામ્ ।
સૌરી દશા વક્રદશાવિપાકે
પ્રાપ્તા સુવૈરં નિજબન્ધુદારૈઃ ॥ ૨૨॥

લાગ્ની દશા ભૌમદશાં પ્રયાતા
વાસ્યાનિ ધત્તે પરદારરાગમ્ ।
ક્વચિદ્ભયં પાર્થિવજં ચ લાભં
ક્વચિત્ ક્વચિદ્બન્ધુજને પ્રહર્ષમ્ ॥ ૨૩॥

ખલોદયોત્થા ચ દશા દશાયાં
ભૌમસ્ય ધત્તે સ્વરુજાઙ્ગપીડામ્ ।
માનાપમાનં નિજલોકમધ્યે
મિથ્યા પ્રબુદ્ધિં સ્વપરૈઃ સદૈવ ॥ ૨૪॥

રવેર્દશા સૌમ્યદશા પ્રયાતા
કરોતિ માનં ખલજં સદૈવ ।
લાભં વિકૃત્યા પરદેશતોઽન્યન્
માયાપટુત્વં બહુકામસેવામ્ ॥ ૨૫॥

..........દશા પ્રયાતા
તદા વિધત્તે નૃપતેસ્તુ માનમ્ ।
આરોગ્યતાં સાધુજનેન સખ્યં
..........ઓગાન્ વિચિત્રાન્ દ્વિજદેવસેવામ્ ॥ ૨૬॥

..........ચનાની
ક્લેશોદયઃ સંશય એવ પુંસામ્ ।
યદા દશાયાં શશિજસ્ય યાતા
દશા ધરિત્રીતનયસ્ય નિત્યમ્ ॥ ૨૭॥

વિદ્યાગમં પાર્થિવમાનમોજો
જયં વિવેકં પ્રિયતાં ચ લોકે ।
યદા દશા દેવપુરોહિતસ્ય

બૌધ્યાં પ્રયાતા સતતં વિધત્તે ॥ ૨૮॥

માનં પ્રશાંસાં નૃપલોકસખ્યં
વિદ્યાર્જનં ધર્મમતિં સદૈવ ।
શૌક્રી દશા સૌમ્યદશાં પ્રપના
કરોતિ મુક્તામણિવિત્તલાભન્ ॥ ૨૯॥

વ્રણપ્રકોપં કલહ કુબુદ્ધિં
વિદેશવાસં મતિસંક્ષયં ચ ।
સૌરી દશા સૌમ્યદશાવિપાકે
ધત્તે નરાણાં બહુવિત્તનાશમ્ ॥ ૩૦॥

યશઃ પ્રતાપં પરમં ચ સૌખ્યં
ચતુષ્પદાધાદનભૂમિલાભમ્ ।
લાગ્ની દશા સૌમ્યવિલગ્નજાતા
બૌધ્યાં દશાયાં વિવિધં ચ ભોગમ્ ॥ ૩૧॥

કુતુમ્બવૈરં પશવિત્તનાશં
રોગાન્ વિચિત્રાન્ સતતં ચ યુદ્ધમ્ ।
..........દયોત્યા તુ દશા દશાયાં
લાગ્ની વિધત્તે શશિનન્દનસ્ય ॥ ૩૨॥

દેવદ્વિજોત્યં કુરુતે સુલાભં
પ્રપોષણોત્યં વિવિધૈઃ પ્રપંચૈઃ ।
દશા યદા દેવપુરોહિતસ્ય
ભાનોર્દશાયાં કુરુતે વિપાકમ્ ॥ ૩૩॥

નાનાર્થલાભં પશુપુત્રવૃદ્ધિં
યશઃપ્રમોદં પ્રભુતાં સદૈવ ।
ગુરોર્દશા રાત્રીપતેર્દશાયાં
સૌમ્ખ્યાનિ ધત્તે વિવિધાનિ પુંસામ્ ॥ ૩૪॥

કૃચ્છ્રેણ સિદ્ધિં બહુદૈન્યમેવ
સ્વપક્ષવિદ્વેષણતશ્ચ લાભમ્ ।
વેશ્યાનુરાગં કપટં નિતાન્તં
ગુરોર્દશાં ભૌમદશા પ્રપન્ના ॥ ૩૫॥

હસ્ત્યશ્વયાનાશનભોજનાનિ
નાનાવિમિત્રાણિ ચ મણ્ડનાનિ ।
બૌધી દશા દેવપુરોહિતસ્ય
દદાતિ પુત્રાન્ વિવિધાંશ્ચ ભૃત્યાન્ ॥ ૩૬॥

નૃપપ્રસાદં બહુવિત્તલાભં
ધર્માનુરાગં વિજયં રિપૂણામ્ ।
ભૃગોર્દશા જીવદશાવિપાકે
પુંસાં વિધત્તે સુબહુપ્રશંસામ્ ॥ ૩૭॥

નીચાનુરાગં ..........
નીચેન સખ્યં પરધર્મસેવામ્ ।
સૌરેર્દશા જીવદશાવિપાકે
નૃણાં વિધત્તે પરવામ્યનાનિ ॥ ૩૮॥

લાગ્ની દશા સદ્ગ્રહજા પ્રયાતા
ગુરોર્દશાયાં કુરુતે પ્રહર્ષમ્ ।
હસ્ત્યશ્વલાભં નૃપતેશ્ચ માનં
વિવેકતાં ધર્મમતિં સદૈવ ॥ ૩૯॥

પાપોદ્ભવા લગ્નદશા દશાયાં
જીવસ્ય ધત્તે કલહેન લાભમ્ ।
સંસેવયા નીચજનસ્ય નિત્યં
વિદ્વેષણં સાધૂજનસ્ય પુંસામ્ ॥ ૪૦॥

લાભં ખરોષ્ટ્રપ્રભવં નરાણાં
કુધાન્યજં ચૈવ જનાપવાદમ્ ।
શૌક્રી દશા સૌર્યદશાવિપાકે
કરોતિ બાલસ્ય તથા પ્રમોહમ્ ॥ ૪૧॥

ધર્મક્રીયારાધનમુન્તમાનાં
લાભં પુરક્ષેત્રવિલાસિનીનામ્ ।
ભૃગોર્દશા રાત્રિમેર્દશાયાં
નૃણાં વિધત્તે બહુવિત્તજં ચ ॥ ૪૨॥

વિદેશવાસં પરપક્ષપૂજાં
કુધર્મસેવાં કુજનાનુરાગમ્ ।

ભૃગોર્દશાં ભુમદશા પ્રયાતા
કરોતિ વેશ્યાજનસમ્પ્રયોગમ્ ॥ ૪૩॥

વિદ્યાં વિવેકં પ્રભુતો ચ કીર્તિં
સુધર્મલબ્ધં નૃપમેશ્ચ માનભ ।
દશા ભૃગોઃ સૌમ્યદશાવિપકે
નૃણાં વિધત્તે ગત્તવાર્જિતલાભમ્ ॥ ૪૪॥

લાભં ગૃહક્ષેત્રપુરાસ્વજાતં
સુવર્ણસ્વનામ્બરયો જનાનામ્ ।
દશા ભૃગોર્જીવદશાવિપકે
કરોતિ લાભં સુતદારસૌખ્યમ્ ॥ ૪૫॥

પ્રમાદનિદ્રાકલહં સુવેશ-
માલસ્યતાં દેહકૃતં ચ લાભમ્ ।
દ્રોહં સ્વવર્ગેણ પરેણ ..........
..........આતિ શૌક્રી રવિજસ્ય પાકે ॥ ૪૬॥

શૌક્રીં દશાં લગ્નદશા પ્રયાતા
સૌમ્યોદ્ભવાયં કુરુતેऽર્થસિધિમ્ ।
પ્રતાપવૃદ્ધિં પ્રભુતાં વિવેકં
.......... ॥ ૪૭॥

પાપોદ્ભવે વંચનતસ્તુ લાભં
દૈન્યેન પાપં બહુગર્જિતેન ।
કુકર્મણા સૂધુનિપીડનેન
ભૃગોર્દશા લગ્નદશાવિપાકે ॥ ૪૮॥

માન્દી દશા ભાનુર્દશાવિપાકે
કરોતિ નાશં ધનપુત્રસમ્ભવમ્ ।
ક્લેશં પ્રવાસં ભયમિષ્ટહાનિં
દેવદ્વિજાનાં પરિપીડાનં ચ ॥ ૪૯॥

માન્દી દશા ચન્દ્રદશાવિપાકે
આલસ્યમાર્તિં કુરુતે સદૈવ ।
કુકર્મસિદ્ધિં કુજનસ્ય લાભં
કુકર્મસેવાં સતતં નરાણામ્ ॥ ૫૦॥

હૃદ્રોગદુઃખં પરવિત્તહાનિં
..........પોષણં ચૌરકૃતં સદૈવ ।
શનિર્દશા ભૌમદશાવિપાકે
કરોતિ વૈરં નિજબન્ધુલોકૈઃ ॥ ૫૧॥

બૌધી દશા સૌરદશાં પ્રયાતા
..........વૃદ્ધિં જનયેન્મનુષ્યમ્ ।
પિત્તાનિલશ્લેષ્મકૃતં વિકાર-
માલસ્યમુદ્વેગમહાભયં ચ ॥ ૫૨॥

દશા શનેર્દેવપુરોહિતસ્ય
યદા દશાયાં પરિપાકમેતિ ।
અસદ્વ્યયં બાન્ધવબન્ધનં ચ
તદા વિધત્તે ગુણવિપ્રકર્ષમ્ ॥ ૫૩॥

શૌક્રી દશા સૌરદશાવિપાકે
કરોતિ પુંસાં પ્રભુતાં કુવર્ગે ।
નીચૈર્વિવાદં બહુનીચલાભં
ધર્મસ્ય નાશં પરધર્મવૃદ્ધિમ્ ॥ ૫૪॥

લાગ્ન્યાં યદા સૂર્યસુતો વિપાકં
સૌમ્યોદ્ભવાયાં કુરુતેઽતિગર્વમ્ ।
ઔદ્ધત્યમિષ્ટૈઃ સહ વંચનાનિ
નાનાપટુત્વં સતતં નિતાન્તમ્ ॥ ૫૫॥

પાપોદ્ભવાયાં રવિજસ્ય જાતા
..........ં કુરુતે સુહાનિમ્ ।
શિરોર્તિપિત્તજ્વરવેદનાશ્ચ
બહુપ્રકારાઃ પરમં ચ શોકમ્ ॥ ૫૬॥

વિલગ્ણિ સૂર્યદશાવિપાકે
કરોતિ સૌમ્યાંનિયમં કુ.......... ।
અસજ્જનૈઃ સઙ્ગામથાજ્ઞતા ચ
વિદ્વેષતાં બન્ધુજનેન નિત્યમ્ ॥ ૫૭॥

ચાન્ધ્યાં પ્રયાતા પ્રકરોતિ સિદ્ધિં

દશા વિલગ્નસ્ય તુ સૌમ્યરૂપા ।
મિષ્ટાન્નપાનાનિ પૃથગ્વિધાનિ
શત્રુક્ષયં પાર્થિવલોકપૂજામ્ ॥ ૫૮॥

સૌમ્યા દશા ભૂમિસુતસ્ય પાકે
યદા વિલગ્નસ્ય કરોતિ પાકમ્ ।
તદાતિરોગં રુધિરોદ્ભવં સ્યા-
દ્વિદ્વેષતા સર્વજનેન નિત્યમ્ ॥ ૫૯॥

પ્રતાપં પ્રણયં ચ લોકે
વિવેકવિદ્યાગમમર્થસિદ્ધિમ્ ।
વિલગ્ની દશા સૌમ્યદશાવિપાકે
સૌમ્યા વિધત્તે ગુરુકામસેવામ્ ॥ ૬૦॥

મન્ત્રૌવધીછાદનભોજનાનિ
વિલગ્ની દશા જીવદશાં પ્રયાતા ।
સુધનાનિ સૌખ્યં ..........
સૌખ્યં નરેન્દ્રેણ વિવેકતાં ચ ॥ ૬૧॥

ભૃગોર્દશાયાં પ્રકરોતિ લાગ્ની
સૌમ્યા દશા માનુસુખં વિધત્તે ।
પ્રિયાતિથિત્વં પ્રચુરાંશ્ચ ભોગાં
વિવેકતાં સાધુ નન સખ્યમ્ ॥ ૬૨॥

પાપાદશા લગ્નસમુદ્ભવા ચ
શનેર્દશાયાં કુરુતે પ્રમાદમ્ ।
આલસ્યમુદ્વેગગુરુપ્રકોપં
વિમાનનાં પાર્થિવજં ભયં ચ ॥ ૬૩॥

પાપા દશા લગ્નસમુદ્ભવા ચ
રવેર્દશાયાં પ્રકરોતિ હાનિમ્ ।
સદા પ્રમાસં પ્રચુરાં ચ પીડામ્ ॥ ૬૪॥

સુહૃત્પ્રકોપં કુરુતે ન સૌખ્યં

।

લાગ્ની દશા ચન્દ્રદશાં
પાપા વિધત્તે ખલુબન્ધવં ચ ॥ ૬૫॥

શિરોર્તિદાહજ્વરમિષ્ટનાશં
ભયં પ્રકોપં કલહં સદૈવ ।
લાગ્ની દશા ભૌમદશાવિપાકે
કરોતિ નાશં નિજબન્ધવાનામ્ ॥ ૬૬॥

સૌમ્યાં દશાયાં કુરુતે પ્રવા
લાગ્ની દશા પાપરતિં કુપૂજામ્ ।
પાપાતિપાપાનિ યથા વિધત્તે
ગુરુદ્વિજપ્રેષણજૈર્વિકારૈઃ ॥ ૬૭॥

ગુરોર્દશાયામનુસમ્પ્રવિષ્ટા
દશા વિલગ્નસ્ય યદા ચ પાપા ।
તદા ધનૈરાત્મગૃહોદ્ભવૈશ્ચ
કરોતિ ભોગાન્ વિવિધાન્ મનુષ્યઃ ॥ ૬૮॥

દમ્ભેન ધર્મં સભયેન ચિન્ત્યં
નૃણાં વિધત્તે કુધિયા ચ ચારમ્ ।
લાગ્ની દશા શુક્રદશાવિપાકે
પાપા સુદૈન્યં ન કુતુમ્બવૃદ્ધિમ્ ॥ ૬૯॥

ક્લેશાન્ વિચિત્રાન્ સુતદારવૈરં
ધનપ્રણાશં પ્રચુરાં ચ વાણીમ્ ।
લાગ્ની દશા મન્દદશાવિપાકે
પાપા વિધત્તે વિવિધાંશ્ચ રોગાન્ ॥ ૭૦॥

ઇતિ શ્રીવૃદ્ધયવનેઽન્તર્દશાધ્યાયઃ ॥

---

આધ્યાય ૦૮
અષ્ટક્વર્ગફલાધ્યાયઃ
ચન્દ્રેષુ સૂર્યઃ સ્વગૃહાત્ ક્રમેણ
પુનસ્તથાયાષ્ટકરાઙ્કુસંસ્થિતઃ ।
મન્દારયોશ્ચાપિ તથૈવ વાચ્યઃ
શુક્રાદ્રસાસ્તાન્ત્યગતશ્ચ નિત્યમ્ ॥ ૧॥

જીવાદ્રસૈકાદશપંચનન્દૈ-

ર્વિદ્ધિસ્થિતો રાત્રિપતેઃ પ્રદિષ્ટઃ ।
બુધ્દ્ધઙ્કુસૂર્યેષુ શરે ચ સૌમ્યાત્
સ્વલગ્નતો વૃધ્દ્ધિયુગવ્યયેષુ ॥ ૨॥ <sUryaH>
અર્કાત્ કેન્દ્રવહ્નીશુભવાષ્ટસંસ્થો
ગુરોર્વ્યયા..........આષ્ટચતુષ્ટયથઃ ।
..........આબ્ધિપંચાઙ્કુદશાગરુદ્રૈઃ
શુક્રાત્ કુજાલ્લાભધના .......... ॥ ૩॥

..........
..........
..........ષ્ટકેન્દ્રૈઃ
સ્યાન્મન્દતો વહ્નિરસેપુસૂર્યગઃ ॥ ૪॥ <chandraH>
ગુરોર્દશૈકાદશાષડન્ત્યમઃ
રવેસ્ત્રિષષ્ઠાયદશેષુસંસ્થિતઃ ।
લગ્નાત્ પ્રવૃધ્દ્ધા પ્રથમે ચ શીતગો-
ર્બુધ્દ્ધા સિતાત્ સૂર્યરસાષ્ટલાભગઃ ॥ ૫॥

.......... ॥ ૬॥ <bhaumaH>
ચન્દ્રાદ્ દ્વિષષ્ઠાયદશાષ્ટવેદગો
લગ્નાત્ સ્વષષ્ઠાર્થ શુભદઃ પ્રકીર્તિ
આદ્યાબ્ધિલાભાર્થગજાઙ્કુવહ્નિભિઃ
શુક્રાચ્છનેશ્ચન્દ્રયુગાયવિત્તૈઃ ॥ ૭॥

વસ્વઙ્કાદક્રામસુસંસ્થિતશ્ચ
ભાત્ સ્વાશ્ચ તન્વબ્ધિભવાર્થ મઙ્ગલાત્ ।
રન્ધ્રેષુ કાસાસુપ એવ સાર્વક્ષી
ગુરોશ્ચ ચન્દ્રાઙ્ગ ગસ્થઃ શુભદઃ ॥ ૮॥ <budhaH>
જીવઃ કુજાડસ્ત્રભવાષ્તકેન્દ્રગઃ
સૂર્યાશ્ચ દસ્ત્રાદિનવાષ્ટ કીર્તિતઃ ।
સ્વશૂન્યરામૈઃ સ્વગૃહાત્ પ્રકીર્તિતો
નવાશકાયાર્થશરાઙ્ગગઃ સિતાત્ ॥ ૯॥

ચન્દ્રાન્ મદાઙ્કેષુધનાયગઃ સદા
શનૈશ્ચરાદ્વહ્નિરસેષુભાસ્કરૈઃ ॥ ૧૦॥

વધાન્ નવવ્યોમયુગેન્દુમાર્ગણ-
રુદ્રતર્કૈઃ શુભદઃ પ્રકીર્તિતઃ ।
લગ્નાન્ નવાશાબ્ધિપરેષુલોચન-
સૂર્યાગરામૈઃ ક્રમશો વિધેયઃ ॥ ૧૧॥ <jIvaH>
શુક્રો વિલગ્નાચ્છશિવિત્તવહ્નિ
યુગેષુનન્દાયગશ્ચ ઇષ્ટઃ ।
ચન્દ્રાત્ સસૂર્યઃ સદિશાઃ સ્વસધત-
સ્ત્રિવેદપંચાષ્ટદિગઙ્ગુલાભગઃ ॥ ૧૨॥

શને રવેરષ્ટદિવાકરાયૈ-
ર્ગુરોર્નવવ્યોમભવાષ્ટપંચગઃ ।
બુધાદ્ ગુણેષ્વઙ્ગદશાઙ્ગસંસ્થિતો
ભૌમાદ ભવેષ્વગ્નિરસાઙ્ગસૂર્યગઃ ॥ ૧૩॥ <shukraH>
સ્યાત્ સૂર્યજો વહ્નિરસેષુસંગતઃ
સસૂર્યદિગ્ગો ધરણિસુતસ્ય ।
સૂર્યાદ્ ધનયાષ્ટચતુષ્ટયે ચ
શુક્રાદ્રસાર્કાયગતઃ સુભદ્રઃ ॥ ૧૪॥

ત્રિષષ્ઠલાભેષુ નિશાધિનાથા-
લ્લગ્નાત્ સવૃદ્ધીન્દુદશાબ્ધિભિશ્ચ ।
જીવાચ્છરાઙ્ગવ્યયલાભસંસ્થો
બુધાદ્ વ્યયાઙ્ગાઙ્ગદિશાઙ્ગનાગતઃ ॥ ૧૫॥ <shaniH>

..........

વિન્દૂનિ રેખશ્ચ વિમિશ્રયિત્વા ।
સપ્તાવશેષેણ મિતો ગ્રહશ્ચ
સ્વાષ્ટાંશસંજ્ઞાં ફલમાદધાતિ ॥ ૧૬॥

ઇન્યાત્ ફલે સોષ્તકવર્ગનાચજં
ફલં બલિષ્ટો યદિ તસ્ય પાર્શ્વગઃ ।
અતોઽન્યથા તસ્ય ફલં નિહન્યતે
તેનૈવ સામ્યે ફલયોર્નિસર્ગજમ્ ॥ ૧૭॥

રેખાશ્રિતસ્તીક્ષ્ણકરઃ પ્રગલ્ભં
કરોતિ મર્ત્યં ગજવાજિયુક્તમ્ ।

મિત્રાઙ્ગસાધું જનસમ્પ્રયુક્તં
સ્થાનેઽધકે રોગવિવર્જિતં ચ ॥ ૧૮॥

દ્વિતીયસંસ્થઃ પ્રચુરપ્રતાપં
પ્રભૂતવિત્તિં જિતશત્રુપક્ષમ્ ।
વિદ્યાનુરક્તં નૃપતેરભીષ્ટં
પ્રશાન્તચિન્તં કુરુતે સદૈવ ॥ ૧૯॥

તૃતીયગઃ સત્યપરં પ્રશાન્તં
વ્યચેતપાપં સુજનૈઃ સુપૂજ્યમ્ ।
હિરણ્યપુજાર્થવિવે..........
નરં પ્રસૂતે સતતં સુશીલમ્ ॥ ૨૦॥

ચતુર્થગઃ સર્વજનસ્ય પૂજ્યં
કરોતિ મર્ત્યં સુદૃઢં સુશીલમ્ ।
..........પૂજ્યં સુભગં પ્રશસ્તં
ધર્માન્વિતં દાનપરં પ્રસૂતે ॥ ૨૧॥

કરોતિ મર્ત્યં ખલુ પંચમસ્થો
નરં રવિર્ગોમહિષોષ્ટ્રયુક્તમ્ ।
કુલપ્રધાન નૃપતેરભીષ્ટં
સુસંયતં બ્રાહ્મણદેવભક્તમ્ ॥ ૨૨॥

હતારિપક્ષં પ્રકરોતિ ષષ્ઠે
સ્થિતો વિવસ્વાન્ પ્રથિતં નૃલોકે ।
સ્ત્રીણામભીષ્ટં ગુરુદેવભક્તં
.......... ॥ ૨૩॥

સ્ત્રીલાભયુક્તં ખલુ સપ્તમસ્થો
નરં વિધત્તે ખલુ તીક્ષ્ણરશ્મિઃ ।
ઉદારચિન્તં પ્રભુતાસમેતં
મિજ્ઞાનશીલં સમરપ્રચણ્ડમ્ ॥ ૨૪॥

સ્થાનેઽષ્ટમે પુત્રધનૈઃ સમેતં
સુરક્તપિત્તાધિકમપ્રમેયમ્ ।
વિખ્યાતકીર્તિં સતતં સુદાન્તં
હતારિપક્ષં પ્રકરોતિ ભાનુઃ ॥ ૨૫॥

બિન્દુસ્થિતોઽર્કઃ પ્રકરોતિ પાપં
સ્થાનેઽધિકે દુર્જનમુગ્રરોગમ્ ।
કૃશં કૃતઘ્નં પરદારરક્તં
વિવેકહીનં પ્રિયસાહસં ચ ॥ ૨૬॥

મૂર્ખં નિકૃષ્ટં તુ તથા દ્વિતીયે
કુમીત્રરક્તં ધનધાન્યહીનમ્ ।
શિરોતિદાહજતરપિત્તમુખ્યૈઃ
પ્રપીડિતં વક્ત્રભવૈશ્ચ રોગૈઃ ॥ ૨૭॥

તયેન હીનં પુરુષં તૃતીયે
સુતાર્થધાન્યૈઃ પરિવર્જિતં ચ ।
સુદાભિભૂતં બહુશત્રુપક્ષં
ક્રિયાવિહીનં વિફલં પ્રસૂતે ॥ ૨૮॥

નિન્દ્યં કૃતઘ્નં પરદેશરક્તં
કરોતિ મર્ત્યં નિયતં ચતુર્થે ।
ઇષ્ટૈર્વિયુક્તં પરદારરક્તં
પરાજિતં સર્વજનૈઃ સદૈવ ॥ ૨૯॥

કરોતિ ભાનુઃ ખલુ પંચમસ્થિત્તો
સુગ્વૈરદારિદ્યભયેન પીડિતમ્ ।
દૌર્ભાગ્યવન્તં પરદારભાષણં
નરં ભયાક્લીવમલં સુનીષ્ટરમ્ ॥ ૩૦॥

ષષ્ઠે સ્થિતઃ શત્રુગણૈઃ પરાજિતં
નરં પ્રસૂતેઽધમકર્મસેવકમ્ ।
માયાસમેતં મલિનં મલીલ્લુચં
ચ્યુતં સ્વધર્માદ્ગતસત્ત્વમાતુરમ્ ॥ ૩૧॥

શ્રિયા વિહીનં વિકૃતં ગતત્રપં
પરાન્નવસ્ત્રાર્થસમીડકં સદા ।
કરોતિ ભાનુઃ ખલુ સપ્તમસ્થિતઃ
પ્રપંચશીલં કુબલં સુનિષ્ઠરમ્ ॥ ૩૨॥

સ્થાનેઽષ્ટમે તીક્ષ્ણમયુખમાલી

નરં વિધત્તે બહુપાપચેષ્ટમ્ ।
ઇષ્ટૈર્વિયુક્તં પરદારરક્તં
પાપાત્મકં દુઃખયુક્તં કરોતિ ॥ ૩૩॥

ઇતિ રવેરષ્ટકવર્ગફલમ્ ॥

રેખાથિતોઽઝ્યે હિમરશ્મિમાલી
સ્થાને વિધત્તે સુભગં મનુષ્યમ્ ।
પ્રિયં નૃપાણાં ગુરુવિપ્રભક્તં
તીર્થાશ્રયં સર્વજનોપસેવ્યમ્ ॥ ૩૪॥

હસ્ત્યશ્વયાનૈઃ સહિતં દ્વિતીયે
વૈડુર્યમુક્તામણિભિસ્તથૈવ ।
નરં સુસૌખ્યૈઃ સહિતં પ્રગલ્ભં
પ્રશાન્તચિન્તં પ્રણયાન્વિતં ચ ॥ ૩૫॥

ચન્દ્રસ્તૃતીયે કુરુતે સનાથં
નરં વિનીતં બહુધર્મભાજમ્ ।
શ્રિયા યુતં સર્વગુણોપપન્નં
ધત્તે સદા બન્ધુજનસ્ય પૂજ્યમ્ ॥ ૩૬॥

સ્થાને ચતુર્થે પ્રકરોતિ માન્યં
નરં પ્રસિદ્ધં વિવિધાર્થયુક્તમ્ ।
તડાગકૂપાશ્રયરક્તચિન્તં
મહામનુષ્યં સુતસૌખ્યયુક્તમ્ ॥ ૩૭॥

વિદ્યાવિનીતં સુવિવેકયુક્તં
નરં પ્રસૂતે બહુભાગભાજમ્ ।
ક્ષપાધિનાથઃ ખલુ પંચમસ્થઃ
પ્રિયાતિથિં સર્વસહં સુવિજ્ઞમ્ ॥ ૩૮॥

ષષ્ઠે સુરૂપં સુભગં મનોજ્ઞં
કરોતિ ચન્દ્રઃ સુતદારયુક્તમ્ ।
ધમાશ્રયં શાસ્ત્રરતં વિનીતં
નરેન્દ્રપૂજ્યં બહુમાનભાજમ્ ॥ ૩૯॥

કરોતિ ચન્દ્રઃ ખલુ સપ્તમસ્થઃ

પ્રભાસમેતં સચિવં સુશીલમ્ ।
વ્રતોપવાસાદિરતં વિધિજ્ઞં
મનોજ્ઞનારિદયિતં સદૈવ ॥ ૪૦॥

સ્થાનેઽષ્ટમે સૌખ્યહિરણ્યયુક્તં
વિદ્યાન્વિતં સત્યપરં પ્રગલ્ભમ્ ।
કરોતિ ચન્દ્રોઽપતિતં મનુષ્યં
પ્રિયાતિથિં બ્રાહ્મણવલ્લભં ચ ॥ ૪૧॥

સ્થાનેઽધેકે વિન્દુગતઃ શશાઙ્કઃ
સરોગદેહં કુરુતે મનુષ્યમ્ ।
પપાનુરક્તં સ્વજનૈર્વિમુક્તં
દીમં કૃશં સત્યવિહીનમેવ ॥ ૪૨॥

કરોતિ ચન્દ્રો નિયતં દ્વિતીયે
નરં કૃતઘ્નં સુકૃતં સુદીનમ્ ।
અભૂતશ્રત્રું પ્રભયા વિહીનં
વિવર્જિતં બન્ધુજનેન નિત્યમ્ ॥ ૪૩॥

સાંપીડિતં ભૂપતિના સદૈવ
મહાવ્યયૈઃ સંયુતમુગ્રરોગમ્ ।
કફાનિલાભ્યાં પરિપીડિતં ચ
ચન્દ્રસ્તૃતીયે કુરુતે મનુષ્યમ્ ॥ ૪૪॥

લુસઙ્ગતં સત્યવિહીનમેવ
સૌખ્યેન હીનં બહુરોગયુક્તમ્ ।
સુદુર્ભગં પાનરતં સદૈવ
ચન્દ્રચતુર્થે કુરુતે મનુષ્યમ્ ॥ ૪૫॥

પ્રણષ્ટશીલં પ્રચુરારિપક્ષં
નિશાધિનાથઃ ખલુ પંચમે ચ ।
કરોતિ દીનં વ્યસ્સનૈઃ સમેતં
વિવર્જિતં ભૂપતિમાનદાનૈઃ ॥ ૪૬॥

વિદેશસેવાવિરતં કૃતઘ્નં
ષષ્ઠેઽરિવર્ગૈર્વિજિતં વૃતાન્તમ્ ।
નિત્યં મનુષ્યં નૃપપીડિતં ચ

કલત્રયાનાદિભિર્વિપ્રમુક્તમ્ ॥ ૪૭॥

સ્યાત્ સપ્તમે વૈરમનલ્પમુગ્રં
ચન્દ્રે રુજં ભૂપમલિમ્લુચોત્થમ્ ।
રોગં નરાણાં જઠરે પ્રભૂતં
ધનસ્ય નાશં પ્રિયવિપ્રયોગમ્ ॥ ૪૮॥

ચન્દ્રોઽષ્ટમેઽનિષ્ટફલં વિધત્તે
શોકં ધનાર્તિં વિવિધં ચ દુઃખમ્ ।
શીલચ્યુતં વાસનવિત્તનાશં
મહાભયં દૈન્યમનર્થમુગ્રમ્ ॥ ૪૯॥

ઇતિ ચન્દ્રાષ્ટકવર્ગફલમ્ ॥

રેખાસ્થિતોઽદ્યે ક્ષિતિવિત્તલાભં
કરોતિ ભૌમઃ પશુવૃદ્ધિમેવ ।
સૌખ્યં ચ ભોગં વિવિધાશ્ચ પૂજા
મહાજનોત્થં સતતં સખાનિ ॥ ૫૦॥

આરોગ્યતાં ..........
મનોવિકાશં પ્રિયતાં ચ લોકે ।
સમુન્નતિં શત્રુવિનાશમેવ
કરોતિ ભૌમો નિયતં દ્વિતીયે ॥ ૫૧॥

ખરોષ્ટ્રયાનાનિ પૃથગ્વિધાનિ
નૃણાં વિધત્તે ક્ષિતિજસ્તૃતીયે ।
વિભૂતિપ્રભ્યુન્નતિમિષ્ટલાભં
ભૂપપ્રષાદં વિવિધં ચ નિત્યમ્ ॥ ૫૨॥

ભૌમશ્ચતુર્થે કુરુતે પ્રતાપં
સૌભાગ્યસૌખ્યાભ્યુદય નિતાન્તમ્ ।
પ્રિયાતિથિત્વં સુરવિપ્રભક્તિં
નરેન્દ્રમાનં વિવિધં ચ લાભમ્ ॥ ૫૩॥

સુતીર્થલાભં ખલુ પંચમસ્થઃ
ક્ષોણીસુતો યચ્છતિ માનવાનામ્ ।
હિરણ્યલાભં બહુમાનસૌખ્યં

વ્યાધેર્વિનાશં ખલુ ઉન્નતિં ચ ॥ ૫૪॥

ષષ્ઠેડરિનાશં કુરુતે મહીજઃ
સમાગમં બન્ધુજનેન નિત્યમ્ ।
વસ્ત્રાણિ શય્યાસનભાજનાનિ
ધર્માર્થસિદ્ધિં સતતં નરાણામ્ ॥ ૫૫॥

ક્ષોણિસુતો યચ્છતિ સપ્તમસ્થો
વિજ્ઞાનવિદ્યાગમમિષ્ટલાભમ્ ।
શય્યાસનાછાદનભોજનાનિ
રતોપલબ્ધિં જગતીસુલાભમ્ ॥ ૫૬॥

ભૌમોડષ્ટમે ભૂતિમથોન્નતિં ચ
નૃણાં વિધત્તે મહિમામનન્તામ્ ।
વાણિજ્યલાભં કૃષિકર્મસિદ્ધિં
પ્રિયાપ્તિમત્યુન્નતિમેવ પુંસામ્ ॥ ૫૭॥

બિન્ધુસ્થિતો ભૂતનયો યદાદ્યે
સ્થાને દશાં યચ્છતિ માનવાનામ્ ।
તદાર્થહાનિં ગદપૃષ્ઠરોગાન્
મતેર્વિનાશં કુજનેન સૌખ્યમ્ ॥ ૫૮॥

શિરોર્તિદાહં જ્વરતાપમુગ્રં
પ્રમોષણં ચૌરકૃતં સદૈવ ।
પ્રિયાવ્યોગં મતિમિત્રનાશં
ભૌમો દ્વિતીયે કુરુતે નરાણામ્ ॥ ૫૯॥

ભૌમસ્તૃતીયે વિનયાર્થલૌલ્યં
ધત્તે નરાણાં ચ તથાપનાદમ્ ।
કુબુદ્ધિભિઃ સઙ્ગમુગ્રવૈરં
પરાજયં પ્રાણભૃતાં સદૈવ ॥ ૬૦॥

વિવાદવૈરાણિ પૃ..........મ્વિધાનિ
ભૌમચતુર્થે કુરુતે નરાણામ્ ।
દ્યૂતં ચ વેશ્માવ્યસનં મહાન્તં
પરાજયં સાધ્વસમેસં હાનિમ્ ॥ ૬૧॥

અસૌખ્યમોજઃ ક્ષયવિત્તનાશં
પુત્રાર્થહાનિં સુતરાં વિયોગમ્ ।
કરોતિ ભૌમઃ ખલુ પંચમસ્થઃ
પ્રતાપહાનિં સતતં નરાણામ્ ॥ ૬૨॥

ચતુષ્પદવ્યાલસરીસૃપોત્થં
ભયં વિધત્તે ક્ષિતિજો નરાણામ્ ।
સદાવિધાનં ખલુ ષષ્ઠસંસ્થો
નરેન્દ્રપીડાં ખલસઙ્ગમં ચ ॥ ૬૩॥

વ્યયં વિરાગં ભયમિષ્ટવૈરં
ભૌમો વિધત્તે ખલુ સપ્તમસ્થઃ ।
જિહ્વાક્ષિરોગોદ્ભવમેવ દુઃખં
સદા નરાણાં વિષયપ્રલૌલ્યમ્ ॥ ૬૪॥

પરાભવં મૃત્યુસમાંશ્ચ રોગાન્
કલત્રહાનિં પરવંચનાનિ ।
ભૌમોઽષ્ટમસ્થઃ કુરુતે નરાણાં
શસ્ત્રાભિઘાતં પરતઃ સ્વતો વા ॥ ૬૫॥

ઇતિ ભૌમાષ્ટકવર્ગફલમ્ ॥

રેખાસ્થિતઃ સોમસુતો યદાદ્યે
સ્થાને તદા શીલધનં વિધત્તે ।
વિદ્યાવિવેકાદિભિઃ સમ્પ્રયુક્તં
પ્રભૂતમિત્રં વિગતારિપક્ષમ્ ॥ ૬૬॥

સ્થાનસ્થિતં દેવગુરુપ્રસક્તં
વિજ્ઞાનશીલં બહુખાનપાનમ્ ।
સ્થાને દ્વિતીયે શશિજો વિધત્તે
નરં સુરૂપં સુભગં સુકાન્તમ્ ॥ ૬૭॥

તૃતીયગઃ સોમસુતઃ કરોતિ
પ્રસન્નવાચ્યં નૃપલોકપૂજ્યમ્ ।
નરં વિધિજ્ઞં સુભગં મનોજ્ઞં
હતારિપક્ષં બહુધર્મભાજમ્ ॥ ૬૮॥

બુધશ્ચતુર્થે કુરુતે સુરૂપં
પ્રિયાતિથિં બન્ધુજનસ્ય માન્યમ્ ।
મેધાવિનં શાસ્ત્રરતિં વિધિજ્ઞં
વ્રતોપાસાદિરતં સદૈવ ॥ ૬૯॥

કરોતિ સૌમ્યઃ ખલુ પંચમસ્થો
નરં નિતાન્તં નૃપતેરભીષ્ટમ્ ।
આરામવિપ્રાદિવિહારભાજં
ચિન્તાન્વિતં ભક્તિપરં દ્વિજાનામ્ ॥ ૭૦॥

ષષ્ઠેઽરિનાશં પ્રકરોતિ સૌમ્યો
નૃણાં પુરગ્રામકૃતં ચ લાભમ્ ।
દેશાધિપત્યં પ્રચુરાન્નપાનં
યશઃપ્રતાપં વિજયં સદૈવ ॥ ૭૧॥

કલત્રલાભં રતિભોગસૌખ્યં
કલત્રસંસ્થઃ પ્રકરોતિ સૌમ્યઃ ।
તીર્થાશ્રયં સૌખ્યસમૃદ્ધિયુક્તં
પ્રસન્નમૂર્તિં સતતં સુશીલમ્ ॥ ૭૨॥

ચતુષ્પદાચ્છાદનવિનયુક્તં
નરં પ્રસૂતે શશિજોઽષ્ટમસ્થઃ ।
કલત્રપુત્રોદ્ભવસૌખ્યયુક્તં
સર્વત્ર પૂજ્યં મહિમાસમેતમ્ ॥ ૭૩॥

વિન્દુસ્થિતઃ સોમસુતોઽતિપાપં
કરોતિ મર્ત્યં પ્રથમે ખલં ચ ।
મામાન્વિતં બાન્ધવવિપ્રયુક્તં
સદા કુશીલં વિનયેન હીનમ્ ॥ ૭૪॥

પ્રભૂતદુઃખં સુજનૈર્વિહીનં
પરાભિભૂતં કઠિનં કૃતઘ્નમ્ ।
દ્વિતીયસંસ્થો હિનરશ્મિપુત્રો
નરં પ્રસૂતે બહુપાપયુક્તમ્ ॥ ૭૫॥

તૃતીયગઃ પુત્રકલત્રનાશં
કરોતિ સૌમ્યઃ સતતં કુચૈલમ્ ।

તેજોવિહીનં મલદગ્ધદેહં
સમ્પીડિતં ભૂપતિના સદૈવ ॥ ૭૬॥

ચતુર્થગઃ શીતકરસ્ય પુત્રઃ
પ્રભૂતદુઃખં કુરુતે મનુષ્યમ્ ।
શીલેન હીનં વિનયેન હીનં
સત્ત્વાત્મિકં ચૈવ વિવર્જિતં ચ ॥ ૭૭॥

નષ્ટાત્મજં નષ્ટધનં કુચૈલં
રોગાભિભૂતં પરતર્કકં ચ ।
પરૈર્જિતં દેવગુરુપ્રમુક્તં
કરોતિ સૌમ્યઃ ખલુ પંચમસ્થઃ ॥ ૭૮॥

ષષ્ઠસ્થિતઃ શીતકરસ્ય પુત્રો
નરં પ્રસૂતે ધનવર્જિતં ચ ।
પરાજિતં શત્રુજનેન નિત્યં
વિદ્યાવિહીનં વિનયેન મુક્તમ્ ॥ ૭૯॥

સૌમ્યો નરં સપ્તમગો વિધત્તે
ભોગેન હીનં પરદારરક્તમ્ ।
જનાપવાદેન યુતં સુદીનં
કુબુદ્ધિભાજં સુભયં સદૈવ ॥ ૮૦॥

દ્યૂતપ્રસક્તં ગણિકાસુ રક્તં
રજોધિકં સત્યધનેન હીનમ્ ।
સૌમ્યોઽષ્ટમસ્થઃ સભયં વિહીનં
કરોતિ મર્ત્યં સતતં નૃશંસમ્ ॥ ૮૧॥

ઇતિ બુધાષ્ટકવ્ગફલમ્ ॥

રેખાગતો દેવગુરુઃ પ્રસૂતે
નરં વિદગ્ધં વિનયોપયુક્તમ્ ।
આદ્યે મહાબુદ્ધિધનાન્વિતં ચ
ધર્મધ્વજં બ્રાહ્મણવલ્લભં ચ ॥ ૮૨॥

દ્વિતીયગઃ સૌમ્યયુતં પ્રસૂતે
નરં સુરેજ્યઃ સુભગં મનોજ્ઞમ્ ।

હસ્ત્યગ્વયાનાદિધિયા સમેતં
નરેન્દ્રપૂજ્યં પ્રથિતં નૃલોકે ॥ ૮૩॥

તૃતીયસંસ્થઃ કુરુતે પ્રધાનં
સુરેજ્યમન્ત્રી બહુપુત્રપૌત્રમ્ ।
દયાન્વિતં જન્તુહિતેષુ યુક્તં
કુલપ્રધાનં સતતં સુશીલમ્ ॥ ૮૪॥

હિરણ્યવિત્તાર્થસુબુદ્ધિયુક્તં
કરોતિ મર્ત્યં ત્રિદશેન્દ્રમન્ત્રી ।
ચતુર્થસંસ્થશ્ચતુરં ધનાઢ્યં
વિવેકિનં બાન્ધવસંમતં ચ ॥ ૮૫॥

કરોતિ જીવઃ ખલુ પંચમસ્થો
નરં નિતાન્તં નૃપતેરભીષ્ટમ્ ।
પુત્રાન્વિતં પ્રિતિકરં નરાણાં
સદા સુશીલં બહુધર્મયુક્તમ્ ॥ ૮૬॥

હતારિપક્ષં નિયતં પ્રસૂતે
નરં સુરેજ્યઃ ખલુ ષષ્ઠસંસ્થઃ ।
હૃષ્ટં સુપુષ્ટં પ્રણતં ગુરૂણાં
પ્રશાન્તવૈરં પ્રથિતં પ્રિયં ચ ॥ ૮૭॥

અભીષ્ટનારિરતસમ્પ્રહૃષ્ટં
કરોતિ મર્ત્યં સતતં સુરેજ્યઃ ।
શ્રિયાન્વિતં દેવગુરુપ્રસક્તં
સુભાશિતજ્ઞં સુજનૈઃ સમેતમ્ ॥ ૮૮॥

જીવોઽષ્ટમસ્થઃ કુરુતે વિદગ્ધં
પ્રિયાતિથિં સર્વકલાઉ દક્ષમ્ ।
નરં નૃપેજ્યં બહુશાસ્ત્રલુબ્ધં
પરાક્રમપ્રાણસમન્વિતં ચ ॥ ૮૯॥

બિન્દુસ્થિતો દેવગુરુઃ પ્રસૂતે
નરં નૃશંસં બહુદુઃખયુક્તમ્ ।
લુબ્ધં કૃતઘ્નં મલિનસ્વભાવં
વિહીનસત્ત્વં બહુસાહસં ચ ॥ ૯૦॥

દ્વિતીયગો ભૂમિમતસ્કરોત્યં
ભ્યં સુરેજ્યઃ કુરુતે નરાણામ્ ।
નૃશંસતાં રોગમનિષ્ટસંસ્થં
પ્રભૂતદુઃખં દયિતાવધં ચ ॥ ૯૧॥

તૃતીયસંસ્થે ત્રિદશેશપૂજ્યે
વિહીનવિત્તઃ સરુજો મનુષ્યઃ ।
ભવેત્ કુમિત્રઃ પરદારરક્તો
દૌર્ભાગ્યયુક્તો હ્યલસઃ કૃતઘ્નઃ ॥ ૯૨॥

ચતુર્થગો દેવગુરુઃ પ્રસૂતે
વિહીનવિત્તં બહુશત્રુગમ્યમ્ ।
વિચર્થિકાદ્યૈઃ પરિપીડિતં ચ
નરં સુમાયં કુદિલં ખલં ચ ॥ ૯૩॥

પામાજ્વરાર્તં પર્દારરક્તં
નરં પ્રસૂતે સુરરાજપૂજ્યઃ ।
પ્રભૂતશોકં સતતં સુપાપં
ચૌરં મહાકષ્ટસમન્વિતં ચ ॥ ૯૪॥

ષષ્ઠે સુરેજ્યઃ કુરુતેઽક્ષિરોગૈઃ
સમ્પીડિતં મ્લેચ્છસમાનરૂપમ્ ।
પ્રપંચશીલં સુતદારહીનં
ધર્મક્રિયાહીનમનન્તશોકમ્ ॥ ૯૫॥

કરોતિ જીવઃ ખલુ સપ્તમસ્થો
નરં કફાદિપ્રચુરં સદૈવ ।
હિક્કાજ્વરાર્તિં પૃથુમાનહીનં
દીનં જનૈર્નિન્દિતમલ્પસૌખ્યમ્ ॥ ૯૬॥

સ્થાનેઽષ્ટમે દેવગુરુઃ પ્રસૂતે
સદાતિગર્વં કુટિલં મનુષ્યમ્ ।
દ્વેષ્યં નૃપાણાં સ્વકુલસ્ય મધ્યે
ગતપ્રતાપં વિકૃતં સદૈવ ॥ ૯૭॥

ઇતિ જીવાષ્ટક્વર્ગફલમ્ ॥

રેખાશ્રિતો દૈત્યગુરુઃ પ્રસૂતે
નરં મનોજ્ઞં સુભગં સુશીલમ્ ।
જિતેન્દ્રિયં દાનપરં મનોગ઼્યં
ધર્માનુરક્તં પ્રચુરાન્નપાનમ્ ॥ ૯૮॥

દ્વિતીયગઃ કાવ્યસુતઃ પ્રસૂતે
નરં વિધિજ્ઞં ધનિકં ચ ।
સ્વધર્મશીલં વિનયેન યુક્તં
પ્રભાસમેતં જનવલ્લભં ચ ॥ ૯૯॥

તૃતીયસંસ્થો બહુભૂષણાઢ્યં
નરં પ્રસૂતે સતતં પ્રગલ્ભમ્ ।
મેધાવિનં ધર્મપરં વિનીતં
દેવદ્વિજાનામનુવલ્લભં ચ ॥ ૧૦૦॥

શુક્રચતુર્થે કુરુતે ધનાઢ્યં
સદ્ભોજનાછાદનપાનયુક્તમ્ ।
વૈડૂર્યમુક્તાફલરત્નલાભૈઃ
સંતુષ્ટચિન્તં સતતં મનુષ્યમ્ ॥ ૧૦૧॥

સુતીર્થયાનાદિકપુત્રલાભૈ-
ર્યુક્તં નરં દૈત્યગુરુર્વિધત્તે ।
ચતુષ્પદાઢ્યં ખલુ પંચમસ્થઃ
પ્રિયં નૃલોકે પરમં પ્રધાનમ્ ॥ ૧૦૨॥

શુક્રસ્તુ ષષ્ઠે કુરુતે મનુષ્યં
વિદ્યાસુ નિષ્ઠં બહુમન્ત્રભાજમ્ ।
સ્ત્રીવિત્તલાભઃ સહિતં સુરૂપં
વિપક્ષણં સર્વકલાસુ દક્ષમ્ ॥ ૧૦૩॥

શુક્રો વિધત્તે ખલુ સપ્તમસ્થો
નરં નિપ્તાન્તં સુરતપ્રગલ્ભમ્ ।
સકુઙ્કુમાછાદનભોગભાજં
નરેન્દ્રપૂજાસહિતં સદૈવ ॥ ૧૦૪॥

સ્થાનેઽષ્ટમે દૈત્યગુરુઃ પ્રસૂતે

નરં નિતાન્તં સુનયેન યુક્તમ્ ।
પ્રભાસમેતં બહુકીર્તિભાજં
સુકર્મિણં ધર્મસમન્વિતં ચ ॥ ૧૦૫॥

વિન્દુસ્થિતો દૈત્યગુરુઃ પ્રસૂતે
નરં સુપાપં બહુરોગયુક્તમ્ ।
નૃપાભિભૂતં સુતવિત્તહીનં
વિવર્જિતં બાન્ધવસજ્જનૈશ્ચ ॥ ૧૦૬॥

શુક્રો દ્વિતીયે સરુજં વિધત્તે
પ્રતાપહીનં બહુપાપયુક્તમ્ ।
સદા વિરક્તં સ્વકુતુમ્બવર્ગે
શોકાભિભૂતં રતિલાલસં ચ ॥ ૧૦૭॥

તૃતીયસંસ્થઃ કુરુતે નૃશંસં
શુક્રઃ સદા રોગવિથર્ચિકૈશ્ચ ।
નરાભિભૂતં અતતં કુચૈલં
જ્વરાર્દિતં માનધનેન હીનમ્ ॥ ૧૦૮॥

ચતુર્થગઃ શોકયુતં પ્રસૂતે
નરં મહાવ્યાધિયુતં દરિદ્રમ્ ।
ચતુષ્પદાછાદનવર્જિતં ચ
પ્રેષ્યં ખલં પાર્થિવમાનહીનમ્ ॥ ૧૦૯॥

કરોતિ શુક્રઃ ખલુ પંચમસ્થઃ
સદા દરિદ્રં વિકૃતં મનુષ્યમ્ ।
સુતાર્થહીનં વ્યસનૈઃ સમેતં
કુમિત્રસઙ્ગેન યુતં નિતાન્તમ્ ॥ ૧૧૦॥

ષષ્ઠે સિતઃ સર્વજનાભિભૂતં
નરં પ્રસૂતે પ્રણયેન હીનમ્ ।
વિવર્જિતં સત્યસુખેન નિત્યં
વિદેશરક્તં પરતર્કકં ચ ॥ ૧૧૧॥

કરોતિ શુક્રઃ ખલુ સપ્તમસ્થો
વાતાદિદોષૈઃ સહિતં મનુષ્યમ્ ।
નૃશંસચેષ્ટં વ્યસનાભિભૂતં

સદા કૃતઘ્નં મતિવર્જિતં ચ ॥ ૧૧૨॥

શુક્રોઽષ્ટમસ્થઃ કુરુતે વિશીલં
નરં મહાવ્યાધિયુતં કૃતઘ્નમ્ ।
નિત્યં વિહીનં બહુપાપરક્તં
ચિન્તાન્વિતં વૈરયુતં સદૈવ ॥ ૧૧૩॥

ઇતિ શુક્રાષ્ટકવર્ગફલમ્ ॥

રેખાસ્થિતઃ સૂર્યસુતઃ પ્રસૂતે
સ્થિરસ્વભાવં સુભગં મનુષ્યમ્ ।
પ્રિયાન્વિતં સર્વજનૈઃ પ્રધાનં
વિનીતવેષાભરણં સદૈવ ॥ ૧૧૪॥

દ્વિતીયસંસ્થો રવિજઃ પ્રસૂતે
નરં નિતાન્તં બહુમાનભાજમ્ ।
પરાક્રમોત્સાહધનેન યુક્તં
તીર્થાનુરક્તં લરયાતનાં ચ ॥ ૧૧૫॥

સૌરસ્તૃતીયઃ કુરુતે પ્રધાનં
નરં સુવિદ્યાગમશાસ્ત્રલુબ્ધમ્ ।
ખરોષ્ટ્રલોહાઢ્યમનલ્પપુત્રં
નરં સદા શાન્તમતિપ્રભવમ્ ॥ ૧૧૬॥

ચતુર્થગઃ સૂર્યસુતઃ પ્રસૂત
નરં સુતાઢ્યં બહુખાનપાનમ્ ।
સ્નગ્ગન્ધભૂપાદિસુભોગભાજં
પ્રભૂતસખ્યર્ચવરાશ્વયુક્તમ્ ॥ ૧૧૭॥

કરોતિ મન્દઃ ખલુ પંચમસ્થો
નરં કુલીનં સુખિનં ચ નિત્યમ્ ।
શ્રિયા સમેતં વિગતારિપક્ષં
નૃપાશ્રિતં શ્રીદયિતં સદૈવ ॥ ૧૧૮॥

ષષ્ઠેઽર્કજઃ શીલધનં પ્રસૂતે
નરં વિધિજ્ઞં સુરવિપ્રયુક્તમ્ ।
પશ્ચાત્ પ્રતિજ્ઞં કનકાર્થલાભં

મહાપ્રભાવં નરનાથપૂજ્યમ્ ॥ ૧૧૯॥

શનૈશ્ચરઃ સપ્તમગો વિધત્તે
નરં ધનાઢ્યં પ્રમદાપ્રધાનમ્ ।
વિચક્ષણં કીર્તિકરં મનોજ્ઞં
કલાસુ દક્ષં પ્રથિતં નૃલોકે ॥ ૧૨૦॥

સ્થિતેઽષ્ટમે સૂર્યસુતઃ પ્રસૂતે
વિચિત્રમાલ્યાભરણં મનુષ્યમ્ ।
હિરણ્ય..........
વિદ્યાવિનીતં દ્વિજદેવભક્તમ્ ॥ ૧૨૧॥

વિન્દુસ્થિતઃ સૂર્યસુતશ્ચ સૂતે
વૃથાશ્રમં પાપરતં મનુષ્યમ્ ।
સ્વબાન્ધવૈસ્ત્યત્કમનલ્પદુઃખં
દીનં નૃશંસં નૃપપીડિતં ચ ॥ ૧૨૨॥

દ્વિતીયસંસ્થઃ કુરુતેઽર્કપુત્રઃ
પાપાત્મકં પાપસુખં મનુષ્યમ્ ।
કુક્ષિસ્યરોગૈઃ પરિપીડિતાઙ્ગં
ચલસ્વભાવં સુમહાકર્દયમ્ ॥ ૧૨૩॥

તૃતીયસંસ્થોઽર્કસુતઃ પ્રસૂતે
નરં નૃશંસં વિતથક્રિયં ચ ।
બહ્વાશિનં સત્યવિહીનમુગ્રં
ચૌરં ખલં સર્વજનાભિભૂતમ્ ॥ ૧૨૪॥

ચતુર્થગઃ સૂર્યસુતઃ પ્રસૂતે
.......... પરૂજં મનુષ્યમ્ ।
વિહીનવર્ણં ગતબુદ્ધિવીર્યં
પ્રેષ્યં ખલં દીનમનર્થયુક્તમ્ ॥ ૧૨૫॥

સૌરઃ સદા પંચમગઃ પ્રસૂતે
વિરક્તપૌરં મલિનવભાવમ્ ।
દ્વેષાં કુબુદ્ધિં હતકર્મસિદ્ધિં
ક્ષુદ્રોગશસ્ત્રોપહતં નૃશંસમ્ ॥ ૧૨૬॥

ષષ્ઠે શનિઃ પાપયુતં ..........
પ્રભાવહીનં પરદારરક્તમ્ ।
ગુદાક્ષિરોગોપહતં સશોકં
પ્રભૂતવૈરં પ્રિયસાધ્વસં ચ ॥ ૧૨૭॥

સૌરો વિધત્તે ખલુ સપ્તમસ્થો
નરં ક્રિયાહીનમનલ્પવૈરમ્ ।
સદા સરોગં નિજબન્ધુહીનં
..........વિવર્જિતં ચ ॥ ૧૨૮॥

સૌરોઽષ્ટમસ્થઃ કુરુતે દરિદ્રં
નરં સરોગં બહુનીચરક્તમ્ ।
પિત્તોદ્ભવૈઃ પીડિતમુગ્રરોગં
વિદેશભાજં પરતર્કકં ચ ॥ ૧૨૯॥

ઇતિ શનેરષ્ટકવર્ગફલં
ઇતિ શ્રીવૃધ્દ્યવનેઽષ્ટ્કવર્ગફલાનિ ॥

---

આધ્યાય ૦૯
સૂર્યદર્શનચારફલાધ્યાયઃ
મેષં ગતોઽર્કઃ શશિના ચ દૃષ્ટઃ
કરોતિ મર્ત્યં સુજનસ્વભાવમ્ ।
પ્રસજમૂર્તિં પ્રચુરાજ્ઞપાનં
નરેન્દ્રપૂજ્યં વિગતારિપક્ષમ્ ॥ ૧॥

ભૌમેન દૃષ્ટો રવિરેવ મેષે
નરં વિધ્દતે ગજવજિભાજમ્ ।
પ્રિયાતિથિં દેવગુરુપ્રસક્તં
પ્રતાપિનં બ્રહ્મણસંમતં ચ ॥ ૨॥

યદા રવિઃ સોમસુતેન દૃષ્ટો
મેષે તદા સૌખ્યધનેન યુક્તમ્ ।
કરોતિ મર્ત્યં બહુરોગભાજં
વિનિતવેષં નૃપપુજિતં ચ ॥ ૩॥

જીવેન દૃષ્ટઃ સુતસૌખ્યલાભં

કરોતિ સૂર્યઃ પરમં ચ તેષમ્ ।
મેષે સદા ભન્ધુજનારુપૂજો
વિવેકવિદ્યાગસત્યતાં ચ ॥ ૪॥

.......... ॥ ૫॥

કરોતિ પૂંસાં ખલુ મેષસંખ્યો
.......... મહાવિધાતં સ્વસુતેન દૃષ્ટઃ ॥ ૬॥

વૃષે ગતો વાસરપઃ પ્રસૂતે
ચન્દ્રેણ દૃષ્ટઃ પ્રચુરપ્રતાપમ્ ।
ધર્માનુરાગં પરલોકલાભં
વિદ્વજ્જનૈઃ સઙ્ગમમાસ્યદં ચ ॥ ૭॥

સૂર્યો વૃષે ભૂમિસુતેન દૃષ્ટઃ
પુંસાં વિધત્તે બહુમાનહાનિમ્ ।
ઉદ્વેગમાનં પશવિત્તહાનિં
કુમિત્રસઙ્ગ વિવિધં ચ કામમ્ ॥ ૮॥

સૌમ્યેન દૃષ્ટો વૃષગઃ ખરાંશઃ
કરોતિ મર્ત્યં સુતંપઃ સમેતમ્ ।
ધર્મક્રિયારાધનતત્મરં ચ
પ્રિયાતિથિં પાર્થિવવલ્લભં ચ ॥ ૯॥

જિવેન દૃષ્તઃ પ્રચુરાચપાનં
રવિર્વિધ્દતે પ્રચુરાશ્ચ નાય.......... ।
સૂર્યો વૃષસ્યઃ પ્રકરોતિ પુંસાં
હેમામ્બરાશ્વપ્રભવં ચ લાભમ્ ॥ ૧૦॥

ગુણાનુરાગં પરપક્ષનાશં
હિરણ્યમુક્તામણિવક્ત્રલાભમ્ ।
સૂર્યો વૃષસ્યઃ પ્રદિદાતિ પુંસાં
શુક્રેણ દૃષ્ટઃ પ્રદિદાતિ વૃધ્દિમ્ ॥ ૧૧॥

સૌરેણ દૃષ્ટઃ પ્રમદાવિઘાતં
વિત્તપ્રણાશં ગુદપાદરોગમ્ ।
વૃષસ્થિતો ભાસ્કર એવ ધત્તે

હિંસાવિઘાતં બહુધર્મવૃદ્ધિમ્ ।૧૨॥

નૃયુગ્મસંખ્યો દિનપો નરાણાં
ચન્દ્રેણ દૃષ્ટઃ સતતં કરોતિ ।
જ્વરપ્રકોપં મુખગુહ્યરોગં
વિવાદમાયાસુ ગુરુપ્રકોપમ્ ॥ ૧૩॥

સૂર્યો નૃયુગ્મે મનુજસ્ય ધત્તે
ભૌમેન દૃષ્ટઃ ખલતાં સદૈવ ।
મતિપ્રકાશં વિભવં વિવેકં
કલત્રપુત્રપ્રભવં ચ સૌખ્યમ્ ॥ ૧૪॥

નૃયુગ્મસંસ્થોઽપિ જયં વિધત્તે
સૌમ્યેન દૃષ્ટો નૃપતેઃ પ્રિયત્વમ્ ।
તથા નરાણાં બહુવિત્તલાભં
નૃપૈઃ સહ સઙ્ગમનં કરોતિ ॥ ૧૫॥

તૃતિયરાશૌ દિનપઃ પ્રસૂતે
જીવેન દૃષ્ટઃ પ્રભુતાં વિચિત્રામ્ ।
સન્મપ્રમારોગ્યકલત્રભાજં
સુસાધુના સાધુજનેન સખ્યમ્ ॥ ૧૬॥

નૃયુગ્મસંસ્થો વિધૃતં દિનેશઃ
શુક્રેણ દૃષ્ટઃ કુરુતે મનુષ્યમ્ ।
વિદ્યાર્થભોગં પ્રણયેન યુક્તં
હિતં સપક્ષં દ્વિજદેવભક્તમ્ ॥ ૧૭॥

મન્દેન દૃષ્ટઃ પુરુષં સુનીચં
ગતપ્રભાવં સવિતા વિધત્તે ।
નૃયુગ્મસંસ્થોઽર્થદયાવિહિનં
કૃતઘ્નમુગ્રં પરપક્ષરક્તમ્ ॥ ૧૮॥

કર્કસ્થિતો અર્કઃ શશિના ચ દૃષ્ટો
હિમાર્થભોગંપ્રભવં વિધત્તે ।
સૌખ્યં સુસૌભાગ્યંમથ પ્રતાપં
ચન્દ્રેણ દૃષ્ટઃ સુતરાં ગુરુત્વમ્ ॥ ૧૯॥

ભૌમેન દૃષ્ટો વદનક્ષિરોગં
કરોતિ સૂર્યઃ ખલુ કર્કટસ્થઃ ।
પ્રિયાવિયોગં વિનયાર્થનાશં
વિગર્હણં સૂનુકૃતં સદૈવ ॥ ૨૦॥

બુધેન દૃષ્ટઃ ખલુ કર્કટસ્યઃ
સૂર્યો વિધત્તે નિયતં મનુષ્યમ્ ।
ગતારિપક્ષં વિભવૈઃ સમેતં
પ્રિયાતિથિં બાન્ધવવલ્લભં ચ ॥ ૨૧॥

દૃષ્ટઃ સુરેજ્યેન દિનાધિનાથો
નરં વિધત્તે સુભગં મનોજ્ઞમ્ ।
મુખ્યં પ્રસિદ્ધિં સુતદારયુક્તં
વિવેકિનં બ્રહ્મણસંમતં ચ ॥ ૨૨॥

વિદ્યાપ્રતાપાર્થધનૈઃ સમેતં
નરં વિધત્તે ભૃગુજેન દૃષ્ટઃ ।
કર્કાશ્રિતો વાસરપઃ પ્રતાપં
સદાનુકૂલં નિજબાન્ધવાનામ્ ॥ ૨૩॥

મન્દેન દૃષ્ટઃ સવિતા પ્રસૂતે
નરં નિતાન્તં કલહપ્રધાનમ્ ।
આલસ્યનિદ્રાક્ષિરુજાસમેતં
સદાતિહૃષ્ટં પરતર્કકં ચ ॥ ૨૪॥

સિંહસ્થિતો વાસરપઃ પ્રસૂતે
ચન્દ્રેણ દૃષ્ટઃ સુભગં મનુષ્યમ્ ।
ભૂક્ષેત્રવિત્તપ્રભયા સમેતં
સખ્યં ગુરુણાં વિનયેન યુક્તમ્ ॥ ૨૫॥

ભૌમેન દૃષ્ટઃ ખલ સિંહસંસ્થો
ભાનવિધત્તેઽક્ષિરુજા સમેતમ્ ।
નરં વિહિનં સુતમિત્રદારૈઃ
સદા કુચૈલં વિનયેન હીનમ્ ॥ ૨૬॥

બુધેન દૃષ્ટો દિનપઃ પ્રસૂતે
સિંહાશ્રિતઃ સૌમ્યતરં મનુષ્યમ્ ।

પ્રિયંવદં ધર્મવિધાનદક્ષં
સ્વપક્ષપૂજ્યં સુરકાર્યદક્ષમ્ ॥ ૨૭॥

જીવેન દૃષ્ટઃ સવિતા પ્રસૂતે
નરં વિદગ્ધં પ્રચુરપ્રતાપમ્ ।
સિંહાશ્રિતઃ પુણ્યપરં કૃતજ્ઞં
વિહીનપાપં પ્રણતારિપક્ષમ્ ॥ ૨૮॥

સિંહાશ્રિતો ભાર્ગવજેન દૃષ્ટઃ
સૂર્યઃ પ્રસૂતે સ્વગૃહં પ્રયતઃ ।
..........શ્વર્યબુધ્દ્ર્થવિવેકયુક્તં
નરં પ્રધાનં પ્રભયા સમેતમ્ ॥ ૨૯॥

મન્દેન દૃષ્ટો બહુમન્દભાજ
નરં પ્રસૂતે દિનપઃ સ્વરાશૌ ।
વ્યયાસુખક્લેશભયૈઃ સમેતં
દુષ્ટસ્વભાવં ગતસૌહૃદં ચ ॥ ૩૦॥

કન્યાશ્રિતો વાસરપઃ પ્રસૂતે
નરં સુરૂપં સુભગં મનોજ્ઞમ્ ।
ચન્દ્રેણ દૃષ્ટો નૃપમાનભાજં
મહાધનૈઃ સંયુતમુગ્રલાભમ્ ॥ ૩૧॥

કરોતિ ભાનુર્બહુરક્તભાજં
કન્યાશ્રિતો ધાન્યધનેન યુક્તમ્ ।
ચન્દ્રેણ દૃષ્ટો મણિમુત્કકાઢ્યં
પ્રિયવદં માનધનૈઃ સદૈવ ॥ ૩૧અ॥

હૃદ્રોગમામાજ્વરપિત્તવાતૈઃ
સમ્પિડિતં વાસરપઃ પ્રસૂતે ।
કન્યાશ્રિતો ભૂમિસુતેન દૃષ્ટો
નરં કુવિદ્યાગમસંશ્રિતં ચ ॥ ૩૨॥

બુધેન દૃષ્ટો દીનપચ કન્યે
કરોતિ શય્યાસનવાહનાદ્યમ્ ।
સદા સુમુખ્યં સુભગં મનુષ્યં
પ્રીયાગમં બન્ધુવિશારદં ચ ॥ ૩૩॥

દૃષ્ટઃ સુરેજ્યન રવિઃ પ્રસૂતે
કન્યે નરં ધર્મપરં પ્રધાનમ્ ।
દ્વિજાપુરક્તં વિગતારિપક્ષં
સુપૂજિતં ભૂમિતલે નરેન્દ્રૈઃ ॥ ૩૪॥

શુક્રેણ દૃષ્ટઃ સવિતા પ્રસૂતે
પ્રખ્યાતવીર્યં સુભગં મનુષ્યમ્ ।
વિવેકવિદ્યાગમશસ્ત્રલબ્ધં
મહાધનં શૌર્યપરં સદૈવ ॥ ૩૫॥

સૌરેણ દૃષ્ટઃ પ્રકરોતિ ભાનુઃ
કન્યાશ્રિતો રોગભયેન યુક્તમ્ ।
વિદેશભાજં પરપક્ષરક્તં
પૌરં પરુષં પ્રભયા વિહીનમ્ ॥ ૩૬॥

સૂર્યસ્તુલાસ્થો હિમરશ્મિદૃષ્ટઃ
કરોતિ જાડ્યં બહુશોકયુક્તમ્ ।
નિસ્ત્રિંશભાવં ધનલાબ્ધિનશં
નૃણાં તથા ચૌરવિમોષણં ચ ॥ ૩૭॥

ભૌમેન દૃષ્ટઃ સવિતા પ્રસૂતે
રક્તાનિલશ્લેષ્મજમેડરોગમ્ ।
ભયં પ્રવાસં કલહં ચ વૈરં
સ્વધર્મહીનં નીકૃતં સદૈવ ॥ ૩૮॥

બુધેન દૃષ્ટઃ સવિતા પ્રસૂતે
તુલાશ્રિત્યો કામરતં મનુષ્યમ્ ।
લજ્જાવિહીનં કુનૃપપ્રસક્તં
નીચાનુરક્તં પ્રિયસાહસં ચ ॥ ૩૯॥

જીવેન દૃષ્ટઃ પ્રકરોતિ ભાનુ-
ર્નરં તુલાસ્થઃ પ્રણયેન હીનમ્ ।
નીચાપ્રમાનં પરધર્મરક્તં
સુગન્ધયુક્તં નર્વર્જિતં ચ ॥ ૪૦॥

શુક્રેણ દૃષ્ટઃ સવિતા પ્રસૂતે

નરં નિતાન્તં ગણિકાસુ રક્તમ્ ।
તુલાશ્રિતઃ સત્યધનં કુધર્મં
પાષણ્ડિનામિષ્ટમનિષ્ટમિત્રમ્ ॥ ૪૧॥

સૌરેણ દૃષ્ટઃ પ્રભયા વિહીનં
નરં પ્રસૂતે સવિતા તુલાસ્થઃ ।
કુચૈલિનં બન્ધવલોકયુક્તં
સુનિષ્ઠુરં નૂનમનિષ્ટબુદ્ધિમ્ ॥ ૪૨॥

ચન્દ્રેણ દૃષ્ટઃ સવિતાલિસંસ્થઃ
કરોતિ નાનવિધયુક્તમેવ ।
પરં પ્રગલ્ભં પ્રભયા સમેતં
હતારિપક્ષં ગતસાધ્વસં ચ ॥ ૪૩॥

ભૌમેન દૃષ્ટોઽતિકઠોરવાક્યં
રવિર્વિધત્તેઽલિગતો મનુષ્યમ્ ।
ધનૈર્વિમુક્તમ્ સતતં કુશિલં
મહભયૈઃ સઙ્ગમનેન નિત્યમ્ ॥ ૪૪॥

બુધેન દૃષ્ટોઽષ્ટમરશિસંસ્થો
રવિર્વિધત્તે સુભગં મનોજ્ઞમ્ ।
નરં નયજ્ઞં ધનધાન્યભાજં
સંશ્રામિતં સાધુજનેન નિત્યમ્ ॥ ૪૫॥

જીવેન દૃષ્ટોઽલિગતો દ્યુનાથઃ
કરોતિ પણ્યૈર્વિવિધૈઃ સમેતમ્ ।
પ્રિયંવદં સર્વજનૈઃ સમેત-
મલોલુપં પૂજિતમન્યલોકૈઃ ॥ ૪૬॥

સદા સુશિલં ચ સુમિત્રભાજં
નાનારવાઢ્યં સુભગં સુરૂપમ્ ।
કરોતિ ભાનુઃ ખલુ વૃચિકસ્થઃ
શુક્રેણ દૃષ્ટઃ પ્રવરં મનુષ્યમ્ ॥ ૪૭॥

સૌરેણ્ દૃષ્ટોઽષ્ટમગો વિવસ્વાન્
પાપાનુરક્તં કુરુતે મનુષ્યમ્ ।
સદા વિલોમં નિજબન્ધુવર્ગે-

સ્ત્રાસાધિકં નિષ્ઠુતમોજસાર્તમ્ ॥ ૪૮॥

ચાપાશ્રિતસ્તીક્ષ્ણકરોઽતિસૌર
ચન્દ્રેણ દૃષ્ટો જનયેન્મનુષ્ય
શાસ્ત્રાનુરક્તં પ્રણતારિપક્ષં
ધનાધિકં બ્રહ્મણસંમતં ચ ॥ ૪૯॥

વિવર્ણદેહં હતમાનવર્ગં
પ્રશાન્તવીર્યં વિનયેન હીનમ્ ।
ચાપાશ્રિતો વાસરપઃ પ્રસૂતે
ભૌમેન દૃષ્ટોઽતિખલં મનુષ્યમ્ ॥ ૫૦॥

સૌમ્યેન દૃષ્ટઃ સુતસૌખ્યયુક્તં
ભાનુઃ પ્રસૂતો હયગો મનુષ્યમ્ ।
પ્રિયાતિથિં દેવગુરુપ્રસક્તં
નયાધિકં બન્ધવવલ્લભં ચ ॥ ૫૧॥

સ્વવર્ગમુખ્યં પરવર્ગમાન્યં
પાપૈર્વિમુક્તં પશુપુત્રલાભમ્ ।
ભાનુર્હયસ્થઃ સુરપૂજ્યદૃષ્ટો
ધર્માધિકં સંજેનયેન્મનુષ્યમ્ ॥ ૫૨॥

શુક્રેણ્ દૃષ્ટઃ સવિતા પ્રસૂતે
હયાશ્રિતઃ સત્પભયા સમેતમ્ ।
નરં સુશીલં બહુરત્નભાજં
ગુણાનુરક્તં વિભુતાસમેતમ્ ॥ ૫૩॥

હયાશ્રિતો વાસરપઃ પ્રસૂતે
પાપાનુરક્તં ચ ખલં મનુષ્યમ્ ।
રોગાતુરં પુણ્યધનૈર્વ યુક્તં
સુનિષ્ઠરં સ્નેહવિવર્જિતં ચ ॥ ૫૪॥

મૃગાશ્રિતો રાત્રિકરેણ દૃષ્ટઃ
કરોતિ ભાનુઃ સુભગં મનુષ્યમ્ ।
દાનાનુરક્તં સુવિશાલરક્તં કીર્તિં
સુસમ્પ્રસક્તં વિનયોપપન્નમ્ ॥ ૫૫॥

ભૌમેન દૃષ્ટઃ સમરોગભાજં
કરોતિ સૂર્યો મૃગગઃ સદૈવ ।
પ્રિયાટનં પાર્થિવચૌરમુષ્ટં
દયાવિહીનં વિધનં ખલં ચ ॥ ૫૬॥

બુધેન દૃષ્ટઃ સવિતા પ્રસૂતે
મૃગાશ્રિતઃ પ્રાણયશઃ પ્રગલ્ભમ્ ।
સૌખ્યાધિકં ધર્મપરં પ્રધાનં
ગતારિવર્ગં સુધનં મનોજ્ઞમ્ ॥ ૫૭॥

જીવેન દૃષ્ટો દશમસ્ય એવ
નરં પ્રસૂતે દિનપઃ સુપક્ષમ્ ।
રતાનુકુલં હતપાપવર્ગં
વિભૂષિતં પૂણ્યવિલેપનાદ્યૈઃ ॥ ૫૮॥

શુક્રેણ દૃષ્ટઃ સવિતા પ્રસૂતે
નરં વિદગ્ધં મકરાશ્રિતશ્ચ ।
સદેશ્વરં પ્રાનભૃતાં વરિષ્ઠં
વિશં પ્રિયાતત્મરધર્મરક્તમ્ ॥ ૫૯॥

વિહીનવેષં ગતપુત્રદારં
જનૈર્વિમુક્તં સતતં કુચૈલમ્ ।
ભાનુર્મૃગસ્થો જનયેન્મનુષ્યં
વિવર્જિતં મનિચપૈઃ સદૈવ ॥ ૬૦॥

કુંભં ગતોઽર્કઃ શશિના ચ દૃષ્ટો
નરં પ્રસૂતે બહુલાભભાજમ્ ।
પ્રિયંવદં સત્યરતં સુશીલં
હતારિપક્ષં પ્રણષં દ્વિજાનામ્ ॥ ૬૧॥

ભૌમેન દૃષ્ટઃ સવિતા પ્રસૂતે
કુમ્ભાશ્રિતઃ પાપરતં મનુષ્યમ્ ।
દુષ્ટસ્વભાવં પરવિત્તલુબ્ધં
દીનં કૃશં બુદ્ધિવિવર્જિતં ચ ॥ ૬૨॥

સૂર્યો ઘટસ્થઃ શશિજેન દૃષ્ટઃ
કરોતિ સૌમ્યં સુભગં મનુષ્યમ્ ।

વિર્યોનદુઃખં બહુશાસ્ત્રદૃષ્ટં
..........કીર્તિભાજમ્ ॥ ૬૩ ॥

સૂર્યો ઘટસ્થઃ પ્રકરોતિ વૃદ્ધિં
જીવેન દૃષ્ટઃ પ્રથિતં મનુષ્યમ્ ।
સદા મનોજ્ઞં ગુણસારરક્તં
પ્રભાવિન દાનપરં પ્રધાનમ્ ॥ ૬૪ ॥

શુક્રેણ દૃષ્ટઃ સવિતા પ્રસૂતે
કુમ્ભાઙ્ગિતઃ પ્રીતિકરં મનુષ્યમ્ ।
આરોગ્યદેહં પરુષાર્થમુ..........
વિનીતવેષં બહુલાભભાજમ્ ॥ ૬૫ ॥

મન્દેન દૃષ્ટઃ પ્રકરોતિ ભાનુઃ
કુમ્ભાઙ્ગિતઃ ક્લેશભવેન યુક્તમ્ ।
જડસ્વભાવં કુટિલં કૃતઘ્નં
સંત્યક્તશીલં ભયવિહ્વલં ચ ॥ ૬૬ ॥

મીનાશ્રિતો વાસરપઃ પ્રસૂતે
ચન્દ્રેણ દૃષ્ટઃ પ્રચુર્પ્રભાવમ્ ।
સુવર્ણતમ્રાયસરૌપ્યભાજં
નતં દ્વિજાનાં સતતં વિધિજ્ઞમ્ ॥ ૬૭ ॥

ભૌમેન દૃષ્ટઃ પ્રકરોતિ ભાનુ-
ર્મીનાશ્રિતઃ ક્લેશકદર્થિતાઙ્ગમ્ ।
નરં સુરક્તં નૃપતેરનિષ્ટં
લજ્જાવિહીનં સુનિરાશ્રયં ચ ॥ ૬૮ ॥

બુધેન દૃષ્ટો દિનપઃ પ્રસૂતે
મીનાશ્રિતઃ સત્યપરં મનુષ્યમ્ ।
બુધ્દ્યા સમેતં પ્રિયમીષ્ટધર્મં
પ્રિયાતિથિં શૌચસમન્વિતં ચ ॥ ૬૯ ॥

સુરેજ્યદૃષ્ટો હ્યષરાશિસંસ્થો
ભાનુઃ પ્રસૂતે બહુવિત્તયુક્તમ્ ।
નરં વિધત્તે વિવિધાન્નપાનં
તીર્થાપુરક્તં વરવસ્ત્રલાભમ્ ॥ ૭૦ ॥

શુક્રેણ દૃષ્ટઃ સવિતા પ્રસૂતે
મીનાઙ્ગિતસ્ત્યાગપરં મનુષ્યમ્ ।
માનાર્થશય્યાસદાનયુક્તં
દાસાનુકૂલં પ્રમદજનસ્ય ॥ ૭૧॥

ઉદ્વેગશોકાકુલમિષ્ટપાપં
મન્દેન દૃષ્ટઃ સવિતા વિધત્તે
મીનાશ્રિતો વંચનચૌરરક્તં
સદાતુરં મિત્રવિવર્જિતં ચ ॥ ૭૨॥

ઇતિ શ્રીવૃધ્દ્યવને સૂર્યદર્શનચારફલાનિ ॥

---

આધ્યાય ૧૦

ચન્દ્રદર્શચારાધ્યાયઃ

મેષે ગતો રાત્રિચરઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ કથિતપ્રભાવમ્ ।
નરં નિતાન્તં વ્યસપૈઃ સમેતં
ગતપ્રભં ભક્તિવિવર્જિતં ચ ॥ ૧॥

મેષાશ્રિતઃ શીતકરઃ પ્રદૃષ્ટો
ભૌમેન મર્ત્યં સરુજં કરોતિ ।
બહુપ્રકોપં વિનયેન હીનં
સદા દરિદ્રં ગતસૌહૃદં ચ ॥ ૨॥

બુધેન દૃષ્ટઃ પ્રકરોતિ ચન્દ્રો
નરં વિનીતં સુરશીલભાજમ્ ।
મેષાશ્રિતો વાહનભોજનાદ્યં
પ્રિયંવદં બ્રહ્મણવલ્લભં ચ ॥ ૩॥

જીવેન દૃષ્ટઃ ખલુ મેષસંસ્થ-
ચન્દ્રઃ પ્રસૂતે ગુણકીર્તિયુક્તમ્ ।
નયાધિકં ધર્મપરં કૃતજ્ઞં
દયાન્વિતં સત્યયુતં સદૈવ ॥ ૪॥

મેષાશ્રિતો ભાર્ગવદૃષ્ટિયુક્ત-

ચન્દ્રઃ પ્રસુતે વિધનં મનુષ્યમ્ ।
હતારિરોગં વિનયપ્રયુક્તં
મહાપ્રભં પાર્થિવસંમતં ચ ॥ ૫॥

દૃષ્ટઃ શશાઙ્કોઽજગતોઽસિતેન
પાપં વિધત્તે સહૃજં મનુષ્યમ્ ।
વિહીનવિત્તં કલહશ્રમાર્તં
વિવર્જિતં સાધુસમગમેન ॥ ૬॥

વૃષાશ્રિતો રાત્રિકરઃ પ્રગલ્ભં
નરં પ્રસૂતે રવીણા ચ દૃષ્ટઃ ।
માયાધિકં વિત્તહરં પ્રજાના-
મુગ્રસ્વભાવં ગતધર્મવૃદ્ધિમ્ ॥ ૭॥

ચન્દ્રો વૃષસ્થઃ ક્ષિતિજેન દૃષ્ટો
નરં સુવાતે ક્ષતપીડિતઙ્ગમ્ ।
વ્યયાધિકં કણ્ડુરુજાસમેતં
સુનિષ્ઠુરં પુણ્યવિવર્જિતં ચ ॥ ૮॥

સૌમ્યેન દૃષ્ટો વૃષગઃ શશાઙ્કઃ
કરોતિ મર્ત્યં નૃપતુલ્યભાગમ્ ।
વિદ્યાનુરક્તં પ્રભયા સમેતં
યુતં મહાબન્દિગણૈઃ સદૈવ ॥ ૯॥

જીવેન દૃષ્ટો હિમગુર્વૃષસ્થો
નરં પ્રસૂતે દ્વિજદેવભક્તમ્ ।
સુવસ્ત્રશય્યાસનભોજનાદ્યૈઃ
સમન્વિતં તસ્ય ગુણપ્રભાવમ્ ॥ ૧૦॥

ગોસંશ્રિતો રાત્રિકરઃ સુવાતે
શુક્રેણ દૃષ્ટઃ સુભગં મનુષ્યમ્ ।
યજ્ઞોદ્યતં કૂપતહાગરક્ત-
મુદ્યાનવાપીકૃતમાનસં ચ ॥ ૧૧॥

મન્દેન દૃષ્ટો ગવિગઃ શશાઙ્કો
નરં સુવાતે વ્યસનૈરુપેતમ્ ।
ગતપ્રભાવં બહુદૈન્યભાજં

વિવર્જિતં પુત્રધનાર્થદારૈઃ ॥ ૧૨॥

નૃયુગ્મગઃ શીતકરઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો બહુમન્દવૃદ્ધિમ્ ।
સર્પાદિભિઃ પીડિતમુગ્રરોગૈ-
ર્વિચર્ચિકાક્ષૈચ તથા સદૈવ ॥ ૧૩॥

દૃષ્ટઃ શશાઙ્કો મિથુનાશ્રિતશ્ચ
ભૌમેન ભીતં જનયેન્મનુષ્યમ્ ।
દીનં કૃશં વાતવિકારયુક્તં
સદાતિવૃદ્ધિં નયવર્જિતં ચ ॥ ૧૪॥

સૌમ્યેન દૃષ્ટો મિથુને શશાઙ્કઃ
કરોતિ સૌખ્યં સુભગં મનુષ્યમ્ ।
મનોચદેહં સુહૃદા ચ યુક્તં
કુલપ્રધાનં પ્રણતં દ્વિજાનામ્ ॥ ૧૫॥

જીવેન દૃષ્ટો મિથુનસ્થ એવ
ચન્દ્રઃ પ્રસૂતે વિભવૈઃ સમેતમ્ ।
મહાધનં સૌર્યકૃતં મનોજ્ઞં
શુચિં સદા ધર્મસમન્વિતં ચ ॥ ૧૬॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ ચન્દ્ર-
સ્તૃતીયરાશૌ ગજવાજિભાજમ્ ।
નરં બહુસ્ત્રીરતિલબ્ધસૌખ્યં
મહધનં પાર્થિવમાનજુષ્ટમ્ ॥ ૧૭॥

સૌરેણ દૃષ્ટોઽતિખલં સુવાતે
ચન્દ્રો નૃયુગ્મસ્થિત એવ મર્ત્યમ્ ।
ચૌરાવનીશૈઃ પરિપીડિતાઙ્ગં
સવૃદ્ધભાવં વિનયેન હીનમ્ ॥ ૧૮॥

કર્કાશ્રિતો રાત્રિપતિઃ સુવાતે
સૂર્યેણ દૃષ્ટોઽલ્પધનં મનુષ્યમ્ ।
તીવ્રસ્વભવં ખલસઙ્ગરક્તં
ધર્માર્થકામૈઃ પરિવર્જિતં ચ ॥ ૧૯॥

ભૌમેન દૃષ્ટઃ પ્રકરોતિ ચન્દ્રઃ
કર્કાશ્રિતસ્ત્યાગદયાવિહીનમ્ ।
નિતાન્તદષ્ટં પરપુત્રહીનં
વિવર્જિતં ધર્મપરૈર્મનુષ્યૈઃ ॥ ૨૦॥

બુધેન દૃષ્ટઃ સ્વગૃહે શશાઙ્કો
નરં સુવાતો તનયાર્થયુક્તમ્ ।
વિદગ્ધબુદ્ધિં બહુમિત્રપૂજ્યં
શ્રદ્ધાન્વિતં સત્યદયાસમેતમ્ ॥ ૨૧॥

દૃષ્ટઃ સુરેજ્યેન નિશાધિનાથ-
શ્ચતુર્થરાશૌ વ્રતિનં વિધત્તે ।
તીર્થાનુરક્તં ગતદુષ્ટભાવં
સુધર્મિણં દેવગુરુપ્રસક્તમ્ ॥ ૨૨॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ ચન્દ્ર-
શ્ચતુર્થરાશૌ ગૃહભૂમિભાજમ્ ।
સદાનુરક્તં ગુરુબાન્ધવાનાં
મનસ્વિનં શીલધનપ્રગલ્ભમ્ ॥ ૨૩॥

સૌરેણ દૃષ્ટઃ પ્રકરોતિ ચન્દ્રઃ
કર્કાશ્રિતઃ પાપમતિં મનુષ્યમ્ ।
વિહીનવિત્તં પરદારરક્તં
સદા કૃતઘ્નં ભયસંયુતં ચ ॥ ૨૪॥

સિંહાશ્રિતઃ શિતકરઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ પ્રચુરં વિદગ્ધં
સત્યાશ્રિતં બન્ધજનેન પૂજ્યં
સભૂમિલભં ગતરોગદુઃખમ્ ॥ ૨૫॥

ભૌમેન દૃષ્ટઃ કુરુતે શશાઙ્કઃ
સિંહાશ્રિતઃ પાપરતં મનુષ્યમ્ ।
ચાનુરક્તં પરદેશભાજં
મહાવ્યયં પાર્થિવપીદિતં ચ ॥ ૨૬॥

બુધેન દૃષ્ટઃ પ્રકરોતિ ચન્દ્રઃ
સિંહસ્થિતઃ કૃચ્છ્રધનાપ્તસૌખ્યમ્ ।

પુણ્યભાજં કુકલત્રયુક્તં
યુક્તંવિચિત્રૈઃ પશુપુત્રવિત્તૈઃ ॥ ૨૭॥

જીવેન દૃષ્ટઃ પ્રભુતાસમેતં
સિંહાશ્રિતઃ શીતકરો વિધત્તે
નરં મહાધર્મપરં પ્રધાનં
પ્રજ્ઞાન્વિતં માન્યતમં પ્રિયં ચ ॥ ૨૮॥

શુક્રેણ દૃષ્ટઃ સુભગં મનોજ્ઞં
હરૌ સ્થિતઃ શિતકરો વિધત્તે ।
યંવદં ધર્મકથાનુરક્તં
હિતં દ્વિજાનાં નૃપપૂજિતાઙ્ગમ્ ॥ ૨૯॥

મન્દેન દૃષ્ટો બહુમન્દયુક્તં
ચન્દ્રો વિધત્તે ખલુ સિંહસંસ્થઃ ।
શિરોર્તિદાહજ્વરકામલાદ્યૈઃ
સમ્પીડિતાઙ્ગં મનુજં વિધત્તે ॥ ૩૦॥

કન્યાશ્રિતઃ શિતકરોઽર્કદૃષ્ટો
નરં સુવાતે તનયેન યુક્તમ્ ।
શ્રદ્ધાપરં સાત્ત્વિકમિષ્ટધર્મં
તીર્થાનુરક્તં ભયવર્જિતં ચ ॥ ૩૧॥

ભૌમેન દૃષ્ટઃ પરદારરક્તં
કન્યાશ્રિતઃ શીતકરઃ કરોતિ ।
ક્ષતાર્દિતાઙ્ગં ગુરુરોગયુક્તં
મહાભયૈઃ સંયુતમિષ્ટપાપમ્ ॥ ૩૨॥

બુધેન દૃષ્ટઃ ખલુ શીતરશ્મિઃ
કન્યાશ્રિતઃ સીતસહિતં મનુષ્યમ્ ।
કરોતિ ભૂપાલસુલબ્ધમાનં
જનપ્રિયં પુણ્યકથાનુરક્તમ્ ॥ ૩૩॥

સદા સુશીલં દ્વિજદેવભક્તં
ભૂપલમાન્યં દ્વિજબન્ધુપૂજ્યમ્ ।
કન્યાશ્રિતો રાત્રિપતિઃ સુવાતે
જીવેન દૃષ્ટઃ પ્રચુરપ્રતાપમ્ ॥ ૩૪॥

શુક્રેણ દૃષ્ટઃ સતતં વિધિત્રં
ચન્દ્રઃ પ્રસૂતે ખલુ ષષ્ઠરાશૌ ।
સદ્ભૂમિવસ્ત્રાચવરૌષધીનાં
સંસેવકં પીનતનું મદાર્તમ્ ॥ ૩૫॥

સૌરેણ દૃષ્ટઃ વિધનં મનુષ્યં
નયેન હીનં પરદારરક્તમ્ ।
સદાલસં મન્દગતિં વિધત્તે
નીચાશ્રિતં પાપરતં સદૈવ ॥ ૩૬॥

તુલાશ્રિતો રાત્રિપતિર્યદા સ્યાત્
સૂર્યેણ દૃષ્ટઃ પ્રકરોતિં મર્ત્યમ્ ।
કીર્ત્યાધિકં વિત્તયુતં કૃતજ્ઞં
શૌર્યસ્વભાવં સતતં સુખાઢ્યમ્ ॥ ૩૭॥

ભૌમેન દૃષ્ટઃ હિમગુઃ પ્રસૂતે
તુલાશ્રિતઃ પાપરતં કુશીલમ્ ।
લજ્જાવિ હીનં વ્યસનૈરૂપેતં
મિત્રૈર્વિહીનં વિકૃતસ્વભાવમ્ ॥ ૩૮॥

સૌમ્યેન દૃષ્ટઃ સુભગં પ્રસૂતે
તુલાશ્રિતઃ શિતકરો મનુષ્યમ્ ।
સત્યાનુરક્તં પશુપુત્રયુક્તં
નાના ગમૈર્વધિતબુધ્દિવૃધ્દિમ્ ॥ ૩૯॥

દેવેજ્યદૃષ્ટો હિમગુઃ પ્રસૂતે
તુલાશ્રિતઃ સત્યપરં મનુષ્યમ્ ।
ગુણાનુરક્તં પ્રચુરાન્નપાનં
મન્દં શુશીલં પ્રમદાપ્રિયં ચ ॥ ૪૦॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ ચન્દ્રો
નરં વિવેકાગમશાસ્ત્રલુબ્ધમ્ ।
હસ્ત્યશ્વવસ્ત્રાન્નસુભોજનાનિ
નૃપપ્રિયં બન્ધવપૂજિતં ચ ॥ ૪૧॥

સૌરેણ દૃષ્ટો હિમગુઃ પ્રસૂતે

તુલાશ્રિતો ધર્મદયાવિહિનમ્ ।
કુમિત્રરક્તં બહુશોકભાજં
વિરક્તપૌરં પરતકર્ક ચ ॥ ૪૨॥

ચન્દ્રોડલિસંસ્થો મનુજં પ્રસૂતે
સૂર્યેણ દૃષ્ટો પ્રભયા વિહીનમ્ ।
નરં નિકૃષ્ટાન્ગયમુગ્રકર્મં
પ્રતાપહીનં વિકૃતં સદૈવ ॥ ૪૩॥

ચન્દ્રોડલિસંસ્થઃ ક્ષિતિજેન દૃષ્ટો
નરં સુવાતે કૃતિકીર્તિદેહમ્ ।
નિત્યં કૃતઘ્નં ભયશોકતપ્તં
વ્યયાધિકં કામપરં કુચૈલમ્ ॥ ૪૪॥

કરોતિ ચન્દ્રોડલિગતો મનુષ્યં
સૌમ્યેન દૃષ્ટઃ સુભગં મનોજ્ઞમ્ ।
ગતારિપક્ષં દ્વિજદેવભક્તં
પ્રશાન્તચિન્તમ્ વ્યસનેન હીનમ્ ॥ ૪૫॥

જીવેન દૃષ્ટોડલિગતોડતિધર્મં
નરં પ્રસૂતે હિમગુઃ પ્રસિદ્ધમ્ ।
સદા સુશિલં નૃપતેરભીષ્ટં
પ્રિયં નરં દાનરતં સદૈવ ॥ ૪૬॥

શુક્રેણ દૃષ્ટઃ ખલુ શીતરશ્મિ-
ર્નરં સુવાતેડતિગતો ધનાઢ્યમ્ ।
વિમુક્તરોગં ગતપૌરશોકં
હીનં સદા બન્ધુજનસ્ય લોકે ॥ ૪૭॥

સૌરેણ દૃષ્ટઃ ખલુ શીતરશ્મિ-
ર્નરં પ્રસૂતે ગતમાનલાભમ્ ।
ચિન્તાધિકં બુદ્ધિવિવેકહીનં
કૃતઘ્નકર્માણમુરુપ્રકોપમ્ ॥ ૪૮॥

ચાપાશ્રિતો શીતકરઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ પ્રચુરપ્રકોપમ્ ।
વિહીનલજ્જં નૃપમાનહીનં

વિવર્જિતં સાધુજનૈઃ સદૈવ ॥ ૪૯॥

ચાપાશ્રિતઃ શિતકરો વિધત્તે
ભૌમેન દૃષ્ટઃ કલહેન યુક્તમ્ ।
નરં દ્વિજદ્વેષપરં કુધર્મં
ત્યક્તં સ્વધમેણ મહાક્ષિરોગમ્ ॥ ૫૦॥

હયે શશી લબ્ધધનં પ્રસૂતે
બુધેન દૃષ્ટઃ પ્રણતારિપક્ષમ્ ।
પ્રિયંવદં સર્વજનપ્રધાનં
સુસંયુતં વેદવિશારદં ચ ॥ ૫૧॥

જીવેન દૃષ્ટો હયગઃ શશાઙ્કો
જિતેન્દ્રિયં સત્યપરં પ્રસૂતે ।
વેશ્યાનુરક્તં બહુભૃત્યબર્ગં
સુસંયુતં દેવગુરુર્જિતાનામ્ ॥ ૫૨॥

શુક્રેણ દૃષ્ટા હયગઃ શશાઙ્કો
નરં વિધત્તે બહુવાજિયુક્તમ્ ।
દાનોદ્યતં યુક્તભયેન યુક્તં
લાભો યથા સઙ્ગતમિષ્ટસત્યમ્ ॥ ૫૩॥

સૌરેણ દૃષ્ટો હયગઃ શશાઙ્કઃ
કરોતિ રોગૈર્વિવિધૈઃ સમેતમ્ ।
નરં પ્રભૂતાગમમવ્યયાઢ્યં
કફપ્રયુક્તં વિવિધપ્રિયં ચ ॥ ૫૪॥

મૃગાશ્રિતઃ શિતકરઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો ગતમાનવિત્તમ્ ।
પ્રભાવિહીનં પરપાકરક્તં
પ્રભાવદૃષ્ટં હતબન્ધવં ચ ॥ ૫૫॥

ભૌમેન દૃષ્ટો મકરે શશાઙ્કિ
નરં વિધત્તે પ્રણયેન હીનમ્ ।
..........આશં પરપક્ષરક્તં
દુષ્ટસ્વભાવં હતબાન્ધવં ચ ॥ ૫૬॥

પિત્તાનિલૈઃ પીડિતમુગ્રરોગં
સદા રતં નીચકથાપ્રસઙ્ગૈઃ ।
બુધેન દૃષ્ટો બહુબુદ્ધિયુક્તં
નરં સુવતે મૃગગઃ શશાઙ્કઃ ॥ ૫૭॥

સુરૂપદેહં સુભગં વિનીતં
નિવેશિતં સાધુજનેન નિત્યમ્ ।
જીવેન દૃષ્ટઃ ખલુ શીતરશ્મિ-
ર્મૃગાશ્રિતો ધર્મપરં મનુષ્યમ્ ॥ ૫૮॥

કરોતિ રત્નાગમલબ્ધતુષ્ટિં
તીર્થાશ્રયં શત્રુજનૈઃ સમેતમ્ ।
શુક્રેણ દૃષ્ટો મકરે શશાઙ્કઃ
કરોતિ પુણ્યૈર્વિવિધૈઃ સમેતમ્ ॥ ૫૯॥

જીતારિપક્ષં નિબન્ધુમાન્યં
કુલપ્રધાનં સુભગં સદૈવ ।
સૌરેણ દૃષ્ટો મકરે શશાઙ્કઃ
કરોતિ મર્ત્યં બહુદોષભાજમ્ ॥ ૬૦॥

વિચર્ચિકણ્ડવાદીરુજાસમેતં
સમ્પીડિતં કામલવાતદોષૈઃ ।
કુમ્ભે શશી વાસરપેણ દૃષ્ટો
નરં પ્રસૂતે નયનાર્થભીતમ્ ॥ ૬૧॥

મુખાક્ષિરોગપ્રમખૈર્વિકારૈઃ
સમ્પીડિતં પાર્થિવતસ્કરૈશ્ચ ।
ઘટાશ્રિતઃ શિતકરઃ પ્રદૃષ્ટો
ભૌમેન નિત્યં કુરુતે કૃતઘ્નમ્ ॥ ૬૨॥

ક્રોધાધિકં વંચનકં પરેષાં
વિશારદં સર્વકલસુ દક્ષમ્ ।
ચન્દ્રો ઘટસ્થ સ્વસુતેન દૃષ્ટઃ
કરોતિ મર્ત્યં સુતદારભૃત્યૈઃ ॥ ૬૩॥

હિતં વિધત્તે દ્વિજદેવભક્તં
સદા સુશીલં બહુમાનભાજમ્ ।

જીવેન દૃષ્ટો ઘટગઃ શશાઙ્કઃ
.......... ॥ ૬૪॥

શુક્રેણ દૃષ્ટો ઘટગઃ શશાઙ્કઃ
કરોતિ સર્વસ્વધનૈઃ સમેતમ્ ।
નરેન્દ્રસેવાસ રતં નયજ્ઞં
પ્રશંસિતં સાધુજનેન નિત્યમ્ ॥ ૬૫॥

ગુલ્માતિસારાપ્રભવૈશ્ચ રોગૈઃ
સમ્પીડિતઃ કર્ણસમુદ્ભવૈશ્ચ ।
ઘટાશ્રિતે સૂર્યસુતેન દૃષ્ટો
ચન્દ્રે નરઃ કીર્તિવિવર્જિતશ્ચ ॥ ૬૬॥

મીનાશ્રિતઃ શીતકરઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો વિકૃતં મનુષ્યમ્ ।
ત્યક્તં સ્વમિત્રૈઃ પરમિત્રરક્તં
બુધ્દ્યા વિહીનં સતતં વિરુધ્દમ્ ॥ ૬૭॥

ભૌમેન દૃષ્ટો હ્યષગઃ શશાઙ્કઃ
કરોતિ રક્તપ્રભવૈશ્ચ દોષૈઃ ।
સમ્પીડિતાઙ્ગં ગુરુદોષભાજં
વિહીનવિત્તં પરદેશરક્તમ્ ॥ ૬૮॥

બુધેન દૃષ્ટો હ્યષગઃ શશાઙ્કઃ
કરોતિ નાનાવિધરોગભાજમ્ ।
નરં સુરૂપં બહુશાસ્ત્રરક્તં
સદાનશીલં સતતં સુલાભમ્ ॥ ૬૯॥

જીવેન દૃષ્ટો હ્યષરાશિસંસ્થો
નરં સુવાતે સુભગં શશાઙ્કઃ ।
ચતુષ્પદાછાનભૂરિલાભૈઃ
સન્તુષ્ટચિન્તં નૃપમાનભાજમ્ ॥ ૭૦॥

શુક્રેણ દૃષ્ટઃ પ્રચુરાન્નપાનૈઃ
સંયોજયેચ્છીતકરો હ્યષસ્થઃ ।
શાખાનુરક્તં વિવિધાન્નપાનં
સુરંજિતં પાર્થિવસદ્ગુરૂણામ્ ॥ ૭૧॥

ચન્દ્રે હ્યષસ્થે રવિપુત્રદૃષ્ટે
નરો ભવેત્ પાપમતિઃ સદૈવ ।
ગુણૈર્વિહીનઃ પ્રચુરપ્રકોપો
ભયાનુરક્તઃ સ્વસમન્વિતશ્ચ ॥ ૭૨॥

ઇતિ શ્રીવૃધ્દ્યવને ચન્દ્રદર્શનચારઃ ॥

---

આધ્યાય ૧૧

ભૌમદર્શનચારાધ્યાયઃ

મેષે ગતો ભૂમિસુતઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો વિધનં મનુષ્યમ્ ।
વિહિનબુધ્દિં કૃપણસ્વભાવં
વિવર્જિતં સત્યદયાનયધૈઃ ॥ ૧॥

મેષાશ્રીતો ભૂમિસુતેઅઃ પ્રસૂતે
ચન્દ્રેણ દૃષ્ટઃ પ્રિયમિષ્ટધર્મમ્ ।
દયાનુરક્તં પિતૃમાતૃભક્તં
મુખ્યં સ્વવર્ગે નિયતં સદૈવ ॥ ૨॥

ભૌમોઽજસંસ્થો બુધદૃષ્ટિયુક્તઃ
કરોતિ સત્યં વનિતાસુ દક્ષમ્ ।
પુશિક્ષિતં શાસ્ત્રકથાસુ દક્ષં
યજ્ઞોધતં પૌષ્ટિકમેવ નિત્યમ્ ॥ ૩॥

જીવેન દૃષ્ટઃ ક્ષિતિજોઽજસંસ્થો
નરં સુવાતે બહુશાસ્ત્રલુબ્ધમ્ ।
હિરણ્યવસ્ત્રૈશ્ચ ચતુષ્પદાદ્યં
વિવર્જિતં પાપકથાનુષઙ્ગૈઃ ॥ ૪॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ ભૌમો
મેષાશ્રિતસ્તીર્થકથાનુરક્તમ્ ।
શૌચાધિકં દેવગુરુપ્રસક્તં
સ્વધર્મસંસ્થં સુરતપ્રગલ્ભમ્ ॥ ૫॥

નયાતિગં બાન્ધવવૈરભાજં

સૌરેણ દૃષ્ટઃ ક્ષિતિજઃ પ્રસૂતે ।
મેષે મનુષ્યં પરદેશરક્તં
વિહીનકોપં ભયસંયુતં ચ ॥ ૬॥

વૃષાશ્રિતો ભૂતનયઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો રતિદઃસિતાઙ્ગમ્ ।
વિહીનધર્મં જરયા સમેતં
ત્યક્તં જનૈઃ પીડિતમુગ્રશોકૈઃ ॥ ૭॥

ચન્દ્રેણ દૃષ્ટઃ ક્ષિતિજો ગવિસ્થો
નરં સુવાતે સતતં નયજ્ઞમ્ ।
પ્રિયં પ્રસચં સતતં સુકાન્તં
મનોજ્ઞવેશં ભયવર્જિતં ચ ॥ ૮॥

બુધેન દૃષ્ટઃ ક્ષિતિજો ગવિસ્થઃ
કરોતિ કીર્ત્યા સહિતં મનુષ્યમ્ ।
નાનાધનૈઃ સંયુતમિષ્ટસત્યં
ગુરુપ્રસક્તં વિનયાધિકં ચ ॥ ૯॥

દૃષ્ટો ગવિસ્થઃ ક્ષિતિજઃ પ્રશાન્તં
જીવેન નિત્યં જનયેન્મનુષ્યમ્ ।
પથ્યાશિનં સર્વકલાસુ દક્ષં
વિચિત્રરત્નં પશુસંયુતં ચ ॥ ૧૦॥

શુક્રેણ દૃષ્ટો ગવિ ભૂમિપુત્રો
ગોભૂહિરણ્યૈઃ સહિતં પ્રસૂતે ।
નરં નિધિગ્રામપુરૈઃ સમેતં
સૂસંયુતં ધર્મ પરં સદૈવ ॥ ૧૧॥

મન્દેન દૃષ્ટો બહુમાનભાજં
વૃષે વિધત્તે ક્ષિતિજો મનુષ્યમ્ ।
સુદીર્ઘસૂત્રં વિનયેન હીનં
પ્રેષ્યં ખલં પાપધનં કૃતઘ્નમ્ ॥ ૧૨॥

નૃયુગ્મસંસ્થઃ ક્ષિતિજઃ પ્રસૂતે
સૂર્યેન દૃષ્ટઃ પરતર્કુકં ચ ।
નરં વિહીનં સુતમિત્રદારૈઃ

પરાજિતં નીચરતં સુદુષ્ટમ્ ॥ ૧૩॥

ચન્દ્રેણ દૃષ્ટઃ ક્ષિતિજસ્તૃતીયે
રાશૌ પ્રસૂતે નૃપપૂજિતાઙ્ગમ્ ।
ખરોદૃષ્ટગોવિત્તચયેન યુક્તં
પ્રભાવિનં બ્રાહ્મણસંમતં ચ ॥ ૧૪॥

બુધેન દૃષ્ટઃ ક્ષિતિજો નૃયુગ્મે
સ્થિતઃ પ્રિયં બન્ધુજનસ્ય નિત્યમ્ ।
સ્ત્રીભોગશય્યાસનયાનયુક્તં
હિતં હિ સર્વસ્ય જનસ્ય નિત્યમ્ ॥ ૧૫॥

જીવેન દૃષ્ટો મિથુને દયાઢ્યં
કુજઃ પ્રસૂતે બહુશાસ્ત્રરક્તમ્ ।
નરં સૈદા તીર્થવ્રપ્રસક્તં
શ્રદ્ધાન્વિતં શૌચસમન્વિતં ચ ॥ ૧૬॥

શુક્રેણ દૃષ્ટો મિથુને પ્રસૂતે
ભૌમઃ પ્રગલ્ભં સુભગં મનુષ્યમ્ ।
વિનીતવેષં પરવીતભજં
સુસઙ્ગતં સાધુજનસ્ય નિત્યમ્ ॥ ૧૭॥

સૌરેણ દૃષ્ટઃ ક્ષિતિજઃ સપપં
રાશૌ તૃતીયે જનયેન્મનુષ્યમ્ ।
રોગાકુલં છિદ્રપરં પરેષાં
સ્વભાવદુષ્ટં ગતસૌહૃદં ચ ॥ ૧૮॥

કર્કાશ્રિતો ભૂતનયઃપ્રસૂતે
સૂર્યેણ દૃષ્ટઃ પરસાહસાધ્વમ્ ।
વિહીનવીત્તં ગુરુરોગભાજં
સદા વિહીનં નિજબન્ધુવર્ગૈઃ ॥ ૧૯॥

ચન્દ્રેણ દૃષ્ટો ધનધાન્યયુક્તં
ભૌમઃ પ્રસૂતે ખલુ કર્કટસ્થઃ
દયાસમેતં ગતપાપમિષ્ટં
સર્વસ્ય લોકે વિભવેન યુક્તમ્ ॥ ૨૦॥

કર્કસ્થિતો ભૂતનયઃ પ્રસૂતે
બુધેન દૃષ્ટો બહુબુદ્ધિયુક્તમ્ ।
દ્વિજાતિયુક્તં પ્રચુરતાપં
નૃપસાદાત્ પરમપ્રહૃષ્ટમ્ ॥ ૨૧॥

જીવેન દૃષ્ટઃ ખલુ કર્કટસ્થો
ભૌમઃ પ્રસૂતે સુતસૌખ્યયુક્તમ્ ।
નયપ્રસક્તં ચ સુપૂજિતઙ્ગં
નૃપપ્રિયં સાધુજનેન યુક્તમ્ ॥ ૨૨॥

શુક્રેણ દૃષ્ટઃ ક્ષિતિજચતુર્થે
રાશૌ સુશીલં જનયેન્મનુષ્યમ્ ।
પ્રિયાતિથિં વિત્તશુભૈઃ સમેતં
નાનાપશુપ્રાપ્તિસુખં ચ શાન્તમ્ ॥ ૨૩॥

કર્કસ્થિતો ભૂતનયઃ પ્રસૂતે
સૌરેણ દૃષ્ટઃ પૃથુશોકભાજમ્ ।
સુદીર્ઘરોગં વિગતપ્રતાપં
સદાતિદીનં નૃપપીડિતં ચ ॥ ૨૪॥

સ્થિતઃ ક્ષિતીસૂનુધરઃ પ્રતાપં
સિંહે વિદૃષ્ટો દિનનાયકેન ।
વિનાશિતારિં જનયેન્મનુષ્યં
સુવેષવિદ્યાધનધાન્યયુક્તમ્ ॥ ૨૫॥

સિંહસ્થિતો ભૂતનયઃ પ્રશસ્તં
ચન્દ્રેણ દૃષ્ટઃ કુરુતે મનુષ્યમ્ ।
સુગન્ધધૂપામ્બરભોજ્યભાજં
શાસાનુગં ધર્મનયેન યુક્તમ્ ॥ ૨૬॥

બુધેન દૃષ્ટઃ ખલુ સિંહસંસ્થો
ભૌમઃ સુવાતે બહુબુદ્ધિભાજમ્ ।
પુષ્પામ્બરદ્રવ્યવિલેપનાદ્યં
મિષ્ટાન્નપાનૈઃ સતતં સુપૂજ્યમ્ ॥ ૨૭॥

ભૌમો હરિસ્થો ગુરુણા ચ દૃષ્ટો
ગુરુપ્રસાદં જનયેન્મનુષ્યમ્ ।

સુતીર્થયાનાસનહેમયુક્તં
સુખાધિકામં ફલદં પ્રગલ્ભમ્ ॥ ૨૮॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ ભૌમો
હરિસ્થિતસ્ત્રાસકરં પરેષામ્ ।
શૌર્યાન્વિતં બાન્ધવમાનભાજ-
મુત્સાહયુક્તં રતલાલસં ચ ॥ ૨૯॥

દૃષ્ટોઽર્કપુત્રેણ કુજો હરિસ્થઃ
કરોતિ પામાગુદરોગભાજમ્ ।
સદા મનુષ્યં કફવાતપિત્તૈઃ
સમ્પીડિતાઙ્ગ ગુરુલોકહીનમ્ ॥ ૩૦॥

કન્યાશ્રીતો ભૂતનયઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ કુગતિં મનુષ્યમ્ ।
કુમિત્રસેવાસુ સદાનુરક્તં
વિવર્જિતં માનધનૈઃ સદૈવ ॥ ૩૧॥

ચન્દ્રેણ દૃષ્ટઃ ક્ષિતિજઃ પ્રસૂતે
કન્યાશ્રિતઃ સત્યપરં મનુષ્યમ્ ।
મેધાવિનં નિત્યમુદારચેષ્ટં
સુસંસ્કૃતં ભૂપતિના ચ નિત્યમ્ ॥ ૩૨॥

બુધેન દૃષ્ટઃ ખલુ કન્યરાશૌ
જુકઃ પ્રસૂતે સુભગં મતિજ્ઞમ્ ।
નરં નતં સાધજનદ્વિજાનાં
મહાપ્રતાપં જનસૌહૃદં ચ ॥ ૩૩॥

જીવેન દૃષ્ટઃ ક્ષિતિજઃ પ્રસૂતે
નરં પ્રસિદ્ધિં નયનાભિરામમ્ ।
મનોજ્ઞવેષં શુભવર્તિતાઙ્ગં
કન્યે ગુરુણાં પ્રણયં પ્રધાનમ્ ॥ ૩૪॥

શુક્રેણ દૃષ્ટઃ ખલુ કન્યકસ્થો
ભૌમઃ પ્રસૂતે સુતરાં પ્રસિધ્દ્મ્ ।
કુટુમ્બસૌખ્યાન્વિતસાધભાજં
દયાન્વિતં માતૃપિતૃપ્રભક્તમ્ ॥ ૩૫॥

દૃષ્ટોઽઙ્ગનાયાં શનિના ચ ભૌમો
નરં પ્રસૂતે વિકૃતં કુચૈલમ્ ।
વ્યયાધિકં કામનિપીડિતં ચ
સદાક્ષિરોગૈઃ સહિતં નિતાન્તમ્ ॥ ૩૬॥

તુલાશ્રિતો ભૂતનયઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ કુરુતેઽતિહાનિમ્ ।
વિવેકહાનિં સુજનૈર્વિયોગં
વૈરં સ્વપક્ષેણ સદા નરસ્ય ॥ ૩૭॥

તુલાશ્રિતો ભૂતનયઃ પ્રસૂતે
ચન્દ્રેણ દૃષ્ટઃ સુભગં મનુષ્યમ્ ।
સુભોગદેહં ગતશત્રુપક્ષં
સદા હિતં દેવગુરુદ્વિજાનામ્ ॥ ૩૮॥

દૃષ્ટસ્તુલાસ્થઃ શશિજેન
ભોગાન્વિતં શિલધનં મનુષ્યમ્ ।
પ્રદાનશીલં પ્રભયા સમેતં
સુસંસ્કૃતં પાર્થિવમાનવૈશ્ચ ॥ ૩૯॥

જીવેન દૃષ્ટઃ ક્ષિતિજસ્તુલાસ્થો
નરં પ્રસૂતે બહુધર્મભાજમ્ ।
દ્વિજાનુકૂલં પશુપુત્રયુક્તં
વિદ્યાન્વિતં શંસિતમેવ નિત્યમ્ ॥ ૪૦॥

શુક્રેણ દૃષ્ટઃ કુરુતે મહીજ-
સ્તુલાશ્રિતઃ સત્યપરં મનુષ્યમ્ ।
મહાધનં દીપ્તિયુતં પ્રગલ્ભં
સદા હિતં બાન્ધવસધ્વિજાનામ્ ॥ ૪૧॥

સૌરેણ દૃષ્ટઃ ક્ષિતિજસ્તુલાસ્થઃ
કરોતિ મર્ત્યં બહુપાપરક્તમ્ ।
રોગૈઃ સમેતં સતતં કુશિલં
પરાન્નરક્તં સતતં સુચૈલમ્ ॥ ૪૨॥

ભૌમોઽલિસંસ્થ કુરુતે મનુષ્યં

સૂર્યેણ દૃષ્ટો બહુરોગયુક્તમ્ ।
નયેન હીનં બહુશત્રુપક્ષં
વિરુદચેષ્ટં વિકૃતાનુકારમ્ ॥ ૪૩॥

ચન્દ્રેણ દૃષ્ટોઽતિલગતઃ પ્રસૂતે
ભૌમોઽતિનીત્યા સહિતં મનુષ્યમ્ ।
પ્રિયાતિથિં સર્વસમૃધ્દિયુક્તં
ધર્મપ્રધાનં બહુલ્લભં ચ ॥ ૪૪॥

બુધેન દૃષ્ટઃ પ્રકરોતિ ભૌમઃ
સ્થિતોઽલિરાશૌ પ્રચુરપ્રતાપમ્ ।
સુધર્મશિલં બહુતીર્થકર્ત્તં
વિવર્જિતં પાપજનેન નિત્યમ્ ॥ ૪૫॥

જીવેન દૃષ્ટઃ પ્રકરોતિ ભૌમઃ
સદાલિસંસ્થઃ સ્તુતિભિઃ સમેતમ્ ।
નિતાન્તધર્માનુરતે પ્રશન્તં
સુપૂજિતં વન્દિજનૈઃ સદૈવ ॥ ૪૬॥

શુક્રેણ દૃષ્ટોઽલિગતઃ પ્રસૂતે
ભૌમઃ સુરૂપં સુભ .......... ।
શૂરં કૃતઘ્નં ધનધાન્યયુક્તં
મેધાવિનં સત્ત્વપ .......... નુશીલમ્ ॥ ૪૭॥

સૌરેણ દૃષ્ટોઽતિલગતસ્તુ ભૌમો
વરં પ્રસૂતે વિજય સમેતમ્ ।
પાપાનુરક્તં વિષયાતિગં ચ
વ્યમેતશીલં સતતં કૃતઘ્નમ્ ॥ ૪૮॥

ચાપાશ્રિતો ભૂતનયઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો જ્વરપિત્તભજમ્ ।
શ્લેષ્માતિસારોતિયુતં સુભિક્ષં
ગતપ્રભાવં વિનયેન હીનમ્ ॥ ૪૯॥

ભૌમો હયસ્થઃ શશિના ચ દૃષ્ટો
કરોતિ શય્યાસનચસ્ત્રભાનમ્ ।
નરં સુયત્રં બહુશાસ્ત્રરક્તં

..........અનં સત્યપરં પ્રધાનમ્ ॥ ૫૦॥

ચાપાશ્રિતો ભૂતનયઃ સુવાતે
બુધેન દૃષ્ટઃ સુભગમનુષ્યમ્ ।
સુતિર્થરક્તં નૃપકાર્યદક્ષં
દયાપ્રં સર્વકલાસુ દક્ષમ્ ॥ ૫૧॥

જીવેન દૃષ્ટઃ ક્ષિતિજો હયસ્થો
નરં પ્રસૂતે બહુધા ધનાઢ્યમ્ ।
સુવર્ણરત્નામ્બરસૌખ્યયુક્તં
વિહીનશત્રું પ્રમદાપ્રિયં ચ ॥ ૫૨॥

શુક્રેણ દૃષ્ટઃ ક્ષિતિજો હયસ્થો
નરં સુવાતે વિનયપ્રધાનમ્ ।
સદા વિનીતં હયયાનયુક્તં
વિભૂષિતં પાર્થિવભૂષણેન ॥ ૫૩॥

ષૌરેણ દૃષ્ટઃ ક્ષિતિજો હ્યસ્થ
કરોતિ પામાકુલમેવ નિત્યમ્ ।
શિરોર્તિદોષાકુલિતં નૃશંસં
નિપીડિતં માનસજૈશ્ચ દુઃખૈઃ ॥ ૫૪॥

ભૌમો મૃગસ્થો રવિણા ચ દૃષ્ટો
નરં સુવાતે વિકૃતં કૃતઘ્નમ્ ।
.......... બન્ધવધાભિતપ્તં
વિદેશભાજં પ્રભયા વિહીનમ્ ॥ ૫૫॥

ભૌમો મૃગસ્થઃ શશિના ચ દૃષ્ટઃ
કરોતિ સૌમ્યં રતિસૌખ્યપુષ્ટં
વિનીત્વેષં પ્રચુરન્નપાનં
નરાધિપાદ્યૈઃ સહિતં સગર્વમ્ ॥ ૫૬॥

બુધેન દૃષ્ટો મકરે ક્ષિતીજં
કરોતિ નિત્યં વિનયપ્રધાનમ્ ।
નરં કૃતઘ્નં નિરુજં વિધિજ્ઞં
પરાક્રમાપ્તૈઃ સુધનૈઃ સમેતમ્ ॥ ૫૭॥

કરોતિ ભૌમઃ ખલુ જીવદૃષ્ટો
મૃગાશ્રિતઃ પુણ્યધનૈર્મનુષ્યમ્ ।
પ્રસવમાકર્ષણલબ્ધાભં
હતપ્રતાપં નિયમઓઃ સમેતમ્ ॥ ૫૮॥

શુક્રેણ દૃષ્ટો મૃગગોઽપિ ભૌમઃ
કરોતિ ભોગૈઃ સતતં સમેતમ્ ।
મિત્રાનુરક્તં કૃશિકર્મદક્ષં
પ્રજાનુકૂલં ભયવર્જિતં ચ ॥ ૫૯॥

ભૌમો મૃગ્સ્થઃ શનિના ચ દૃષ્ટો
નરં સુવાતે બહુસારમેવ ।
મિત્રૈર્વિહીન બહુશોકયુક્તં
સદા નિતાન્તં પરપક્ષજાનામ્ ॥ ૬૦॥

ભૌમો ઘટસ્થો રવિણા ચ દૃષ્ટઃ
કરોતિ મર્ત્યં સુકૃતપ્રભાવમ્ ।
વ્યપેતલજ્જં સુતબન્ધુહીનં
કૃષ્યાધિકં સૌહૃદવર્જિતમ્ ચ ॥ ૬૧॥

ચન્દ્રેણ દૃષ્ટઃ ક્ષિતિજો ઘટસ્થો
નરં સુવતે બહુસભ્યજં ચ ।
દ્વિજાતિતીર્થામરભક્તિયુક્તં
નયાધિકં કામફલઃ સમેતમ્ ॥ ૬૨॥

બુધેન દૃષ્ટો ઘટસંસ્થભૌમો
નયેન યુક્તં જનયેન્મનુષ્યમ્ ।
પ્રિયાતિથિં પાર્થિવલબ્ધમાનં
સદા સુશિલં બહુધર્મભાજમ્ ॥ ૬૩॥

જીવેન દૃષ્ટો ઘટગોઽથ વક્રઃ
દાનં વિવેકં ચ વિવેકભાજમ્ ।
નરં ધનાદ્યં બહુધર્મયુક્તં
ગતારિપક્ષં સુરવિપ્રભક્તમ્ ॥ ૬૪॥

શુક્રેણ દૃષ્ટો ઘટગશ્ચ ભૌમઃ
.......... ।

..........
.......... ॥ ૬૫॥

સૌરેણ દૃષ્ટઃ ક્ષિતિજો ઘટસ્થઃ
કરોતિ નાનાવિધદુઃખભાજમ્ ।
હતપ્રતાપં સુજનૈઃ સમેતં
પ્રિયતિથિં બ્રાહ્મણવલ્લભં ચ ॥ ૬૬॥

મીનસ્થિતો ભૂતનયોઽર્કદૃષ્ટઃ
કરોતિ નિત્યં કલહૈઃ સમેતમ્ ।
નરં સુદીનં વયસા સમેતં
કૃશં વિવર્ણં નૃપપીડિતં ચ ॥ ૬૭
ચન્દ્રેણ દૃષ્ટો હ્યષગોઽથ ભૌમો
નરં સુવાતે વરયાનભાજમ્ ।
ચતુષ્પદાદ્યં વનિતાસ્વભીષ્ટં
જિતેન્દ્રિયં ભોગસમન્વિતં ચ ॥ ૬૮॥

બુધેન દૃષ્ટઃ પ્રકરોતિ ભૌમો
હ્યષસ્થિતઃ શૌચપરં મનુષ્યમ્ ।
વાપીતહાગામરજેષુ રક્તં
હિતં સ્વપક્ષે પરવર્જિતં ચ ॥ ૬૯॥

જીવેનદૃષ્ટઃ કુરુતે તુ ભૌમો
હ્યષાશ્રિતો બુધવિવર્ધનં ચ ।
મનોજ્ઞદેહં શુભવસ્ત્રભાજં
ભોગાધિકં પુણ્યવિવૃદ્ધિભાજમ્ ॥ ૭૦॥

શુક્રેણ દૃષ્ટઃ ક્ષિતિજો હ્યષસ્થો
નરં સુવાતે બહુસૌખ્યયુક્તમ્ ।
વિજ્ઞં સુરૂપં ગલિતરિપક્ષં
સદા વિનીતં નૃપતેરભીષ્ટમ્ ॥ ૭૧॥

સૌરેણ દૃષ્ટો બહુમન્દભાજં
મીનાશ્રિતો ભૂતનયઃ પ્રસૂતે ।
સદાતુર શોકપરં કૃતઘ્નં
સુદિર્ઘસૂત્રં વ્યસનૈઃ સમેતમ્ ॥ ૭૨॥

ઇતિ શ્રીવૃદ્ધયવને ભૌમદર્શનચારઃ ॥

---

આધ્યાય ૧૨

બુધદર્શનચારધ્યાયઃ

મેષં ગતો જ્ઞો રવિણા ચ દૃષ્ટઃ
કરોતિ મર્ત્યં કૃપણસ્વભાવમ્ ।
દુષ્ટાશયં બન્ધુજનેન યુક્તં
ભયાકુલં મિત્યમુદારદુઃખમ્ ॥ ૧॥

બુધોઽજસંસ્થઃ સુજનં ચ દૃષ્ટઃ
કરોતિ મર્ત્યં સુજનં સુવિજ્ઞમ્ ।
શાસ્ત્રાનુરક્તં કૃષિકર્મદક્ષં
સુરદ્વિજાનાં પ્રણતં સદૈવ ॥ ૨॥

ભૌમેન દૃષ્ટઃ શશિજોઽજસંસ્થો
હર્ષાધિકારૈઃ કુરુતે પ્રપીડામ્ ।
નરં તથા સર્વજનૈર્વિમુક્તં
પરાજિતં વૈરિભિરેવ નિત્યમ્ ॥ ૩॥

જીવેન દૃષ્ટોઽજગતસ્ત સૌમ્યો
નરં વિધત્તેઽતિધનપ્રગલ્ભમ્ ।
હિતં દ્વિજાનાં સતતં કૃતજ્ઞં
નશાન્વિતં પાર્થિવપૂજિતં ચ ॥ ૪॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ સૌમ્યો
મેષાશ્રિતો યાનધનૈઃ સમેતમ્ ।
નરં મહાધાન્યહયૈઃ સમેતં
વિમુલ્લપાપં બહુધર્મયુક્તમ્ ॥ ૫॥

સૌરેણ દૃષ્ટઃ શશિજઃ પ્રસૂતે
મેષાશ્રિતઃ કીર્તિવિવર્જિતં ચ ।
પ્રભૂતરોગં ગતંસૌખ્યમિષ્ટં
પ્રપીડિતં ચૌરનરેચરાદ્યૈઃ ॥ ૬॥

વૃષસ્થિતઃ સોમસુતોઽર્કદૃષ્ટો
નરં પ્રસૂતે ક્ષતજૈઃ સમેતમ્ ।

વક્ષોગુદાંઘ્રિપ્રભૈશ્ચ રોગૈઃ
સમ્પીડિતં ધાન્યકલત્રહીનમ્ ॥ ૭॥

બુધો વૃષથઃ શશિના ચ દૃષ્ટઃ
કરોતિ મર્ત્યં પ્રથિતં નૃલોકે ।
સત્યાધિકં સૌખ્યવિવેકયુક્તં
શ્રિયાધિકં પુણ્યવિધૌ પ્રગલ્ભમ્ ॥ ૮॥

ભૌમેન દૃષ્ટઃ શશિજો વૃષસ્થો
નરં પ્રસૂતે વિકૃતસ્વભાવમ્ ।
પ્રભૂતવૈરં વ્યસનાભિભૂતં
પાષણ્ડિભિઃ સઙ્ગતમેવ નિત્યમ્ ॥ ૯॥

વૃષશ્રિતઃ સોમસુતઃ પ્રસૂતે
જીવેન દૃષ્ટઃ ક્ષિતિવસ્ત્રભાજમ્ ।
દેવાતિથિશ્રેષ્ઠજનાનુરક્તં
સ્વધર્મમુખ્યં પ્રણતં પ્રજાનામ્ ॥ ૧૦॥

શુક્રેણ દૃષ્ટઃ પ્રણતારિપક્ષં
નરં પ્રસૂતે શશિજો વૃષથ્ઃ ।
નરેન્દ્રપૂજ્યં વિબુધૈઃ સમેતં
પ્રધાનકર્મણમભિષ્ટલાભમ્ ॥ ૧૧॥

સૌરેણ દૃષ્ટઃ શશિજઃ પ્રસૂતે
વૃષ ગતઃ પાપધનં મનુષ્યમ્ ।
સુતિર્થયાનાસનવસ્ત્રલાભૈ-
ર્વિવર્જિતં નીચજનપ્રસેવ્યમ્ ॥ ૧૨॥

સૂર્યેણ દૃષ્ટો મિથુને ચ સૌમ્યે
નરં સુવાતે સુતવિપ્રયુક્તમ્ ।
કુચૈલદેહં વિકૃતાનુરકારં
વિવર્જિતં સત્યધનેન નિત્યમ્ ॥ ૧૩॥

ચન્દ્રેણ દૃષ્ટઃ શશિજો નૃયુગ્મે
કરોતિ નાનાવિધલાભભાજમ્ ।
નિતાન્તસૌખ્યૈઃ સહિતં પ્રગલ્ભં
તીર્થાનુરક્તં સુભગં મનોજ્ઞમ્ ॥ ૧૪॥

ભૌમેન દૃષ્ટો મિથુને બુધસ્તુ
પ્રિયં પ્રસૂતે નૃપસજ્જનાનામ્ ।
નરં પરૈર્વર્જિતમિષ્ટધર્મ
સરક્ષિતં બન્ધજનૈઃ સદૈવ ॥ ૧૫॥

જીવેન દૃષ્ટો તુ સૌમ્યઃ
કરોતિ નાનાવિધમપ્રગલ્ભમ્ ।
કલત્રપુત્રાપ્તિસુખં સુરૂપં
પ્રિયંવદં દાનવિચક્ષણં ચ ॥ ૧૬॥

શુક્રેણ દૃષ્ટો મિથુને પ્રસૂતે
બુધો વિવાહાર્થપરં મનુષ્યમ્ ।
સ્ત્રીવલ્લભં ભૂતિયશો..........યભાજં
પ્રસન્નચિન્તમ્ દ્વિજવ્લ્લભં ચ ॥ ૧૭॥

સૌરેણ દૃષ્ટઃ શશિજો વિધત્તે
ક્ષુચ્છસ્ત્રપીડાસહિતં નૃયુગ્મે ।
નરં પ્રશંસાર્થવિવેકહીનં
કૃતઘ્નમિષ્ટૈઃ પરિવર્જિતં ચ ॥ ૧૮॥

કર્કાશ્રિતઃ સોમ્સુતોઽર્કદૃષ્ટો
નરં પ્રસૂતે વ્યસનાભિભૂતમ્ ।
અધર્મચેષ્ટં  વિકૃતસ્વભાવં
મદાતિગં દુઃકૃતસેવનેન ॥ ૧૯॥

કર્કાશ્રિતઃ સોમસુતો વિધત્તે
ચન્દ્રેનઃ દૃષ્ટઃ સુતદારયુક્તમ્ ।
ત્રિણામભીષ્ટં સુરતાનુરક્તં
પ્રસન્નૈત્તં ગતસાધ્વસં ચ ॥ ૨૦॥

કર્કાશ્રિતઃ સોમસુતો વિધત્તે
ભૌમેન દૃષ્ટઃ પરદારરક્તમ્ ।
ચલસ્વભાવં વિપરીતચેષ્ટં
પરાઙ્મુખં દેવ્ગુરુદ્વિજાનામ્ ॥ ૨૧॥

જીવેણ દૃષ્ટઃ શશિજો વિધત્તે

કર્કાશ્રિતઃ પુણ્યપરં મનુષ્યમ્ ।
ચતુષ્પદાશુદ્ધિજભોજનાદ્યં
સુપૂજિતં સાહુજનેન નિત્યમ્ ॥ ૨૨॥

શુક્રેણ દૃષ્ટઃ શશિજઃ પ્રસૂતે
કર્કાશ્રિતો વાજિધનામ્બરાઢ્યમ્ ।
સ્ત્રીપુત્રવસ્ત્રપ્રણયેન યુક્તં
સુસંસ્કૃતં પાર્થિવસાધુલોકૈઃ ॥ ૨૩॥

સૌરેણ દૃષ્ટઃ શશિજસ્થુ કર્કે
દારિદ્ર્યનિદ્રાલસસેવિતાઙ્ગમ્ ।
ઉત્સાહહીનં બહુછિદ્રયુક્તં
વિવર્જિતં માનધનૈઃ સદૈવ ॥ ૨૪॥

સિંહસ્થિતઃ સોમસુતો વિધત્તે
સૂર્યેણ દૃષ્ટઃ કૃપણસ્વભાવમ્ ।
સુદીર્ઘયુક્તં ગુરુરોગયુક્ત
વિનાકૃતં સત્યદમવ્રતૈશ્ચ ॥ ૨૫॥

ચન્દ્રેણ દૃષ્ટઃ શશિજશ્ચ સિંહે
કરોતિ મર્ત્યં ગુણગૌરવાઘમ્ ।
સુતીર્થસૌખ્યામલલબ્ધયુક્તં
વિશુધ્દબુદ્ધિં સતતં નયજ્ઞમ્ ॥ ૨૬॥

ભૌમેન દૃષ્ટઃ ખલુ સિંહસંસ્થો
બુધો વિધત્તે બહુશોકભાજમ્ ।
વિચર્ચિકાપામીનપીડિતાઙ્ગં
સદાતુરં પુણ્યધનૈર્વિહીનન્ ॥ ૨૭॥

જીવેન દૃષ્ટઃ ખલુ સિંહસંસ્થઃ
કરોતિ સૌમ્યઃ સુતદાસભાજમ્ ।
સુધામસત્યં પ્રભયા સમેતં
નતં નરૈઃ સર્વોખૈઃ સમેતમ્ ॥ ૨૮॥

શુક્રેન દૃષ્ટઃ પ્રણતં સુરાણાં
બુધો વિધત્તે ખલુ સિંહરાશૌ ।
બુધ્દાન્વિતં શીલધનં સુરૂપં

વ્યપેતદુઃખં ગતસાધ્વસં ચ ॥ ૨૯॥

સૌરેણ દૃષ્ટઃ શશિજો હરિસ્થઃ
કરોતિ મર્ત્યં કૃપણં સુદીનમ્ ।
વ્યયાધિકં કામયુતં વિશીલં
ત્યક્તં નયેનાર્થવિવર્જિતં ચ ॥ ૩૦॥

કન્યાશ્રિતઃ સોમસુતો વિધત્તે
સૂર્યેણ દૃષ્ટઃ પ્રભયા વિહીનમ્ ।
સેવાતુરં ક્લેશયુતૈઃ કુભૃત્યૈ-
ર્વિરક્તપુરં સતતં સુદુઃખમ્ ॥ ૩૧॥

ચન્દ્રેણ દૃષ્ટઃ શશિજો વિધત્તે
કન્યાશ્રિતઃ સત્યપરં મનુષ્યમ્ ।
દેવાનુરક્તં સકલૈર્વિયુક્તં
પ્રભૂતમિત્રં નૃપવલ્લભં ચ ॥ ૩૨॥

ભૌમેન દૃષ્ટઃ ખલુ કન્યકસ્થો
નરં વિધત્તે સરુજં ચ સૌમ્યઃ ।
કોપાધિકં કામસૂતપ્રદેહં
ભયાન્વિતં વંધિતમાકુલં ચ ॥ ૩૩॥

જીવેન દૃષ્ટઃ પ્રકરોતિ સૌમ્યો
નરં સુશિલં સતતં ગતારિમ્ ।
પ્રભૂતસૌમ્યં પ્રણતારિપક્ષં
નિતાન્તમોજઃસહિતં પ્રગલ્ભમ્ ॥ ૩૪॥

શુક્રેણ દૃષ્ટઃ ખલુ કન્યકસ્થો
બુધો વિધત્તે બહુધર્મભાજમ્ ।
વિધાનવિદ્યાપશુપુત્રયુક્તં
સુસઙ્ગતં સાધુજનેન નિત્યમ્ ॥ ૩૫॥

મન્દેન દૃષ્ટઃ શશિજઃ સમન્દં
કન્યાશ્રિતઃ સંજનયેન્મનુષ્યમ્ ।
વિરક્તચેષ્ટં ગતધર્મસૌખ્યં
ભયાધિકં પાપમતિં સદૈવ ॥ ૩૬॥

તુલાશ્રિતઃ સોમસુતો વિધત્તે
સૂર્યેણ દૃષ્ટઃ પ્રભયા વિહીનમ્ ।
પ્રભૂતદુઃખં વ્યસનૈઃ સમેતં
કામાતુરં નિન્દ્યતમં નૃલોકે ॥ ૩૭॥

ચન્દ્રેણ દૃષ્ટઃ શશિજઃ પ્રસૂતે
તુલાશ્રિતઃ સત્યધનં મનુષ્યમ્ ।
પ્રિયાતિથિં દેવગુરુપ્રસક્તં
નયાધિકં બ્રાહ્મણસંમતં ચ ॥ ૩૮॥

ભૌમેન દૃષ્ટઃ શશિજઃ પ્રસૂતે
તુલાશ્રિતઃ પાપરતં મનુષ્યમ્ ।
વિષાદભાજં ગતસાધુભાજં
મહાવ્યયં સાધુવિવર્જિતં ચ ॥ ૩૯॥

જીવેન દૃષ્ટઃ શશિજઃ પ્રસૂતે
તુલાશ્રિતઃ સત્યપરં મનુષ્યમ્ ।
પાપૈર્ન યુક્તં સુતસૌખ્યભાજં
નયપ્રધાનં બહુસંશ્રિતં ચ ॥ ૪૦॥

શુક્રેણ દૃષ્ટઃ સુવિવેકયુક્તં
કરોતિ સૌમ્યસ્તુલગો મનુષ્યમ્ ।
ચતુષ્પદાઢ્યં સુતવિત્તયુક્તં
ગુણાનુરક્તં પ્રિયબન્ધવં ચ ॥ ૪૧॥

સૌરેણ દૃષ્ટઃ શશિજ પ્રસૂતે
નરં નિતાન્તં કલહેન યુક્તમ્ ।
તુલાશ્રિતઃ કૃત્રિમધર્મભાજં
પાષણ્ડસઙ્ગાનુરતં સદૈવ ॥ ૪૨॥

બુધોઽલિસંસ્થો રવિણા ચ દૃષ્ટો
નરં પ્રસૂતે સુખવિત્તહીનમ્ ।
સુતીવ્રશોકં ગતમાનભોગં
પ્રભૂતવૈરં પ્રિયસાહસં ચ ॥ ૪૩॥

ચન્દ્રેણ દૃષ્ટોઽલિગતઃ પ્રસૂતે
બુધો નરં બુદ્ધિવિવેકયુક્તમ્ ।

સુદ્વિજાનાં પ્રણતં પ્રગલ્ભં
સદાશ્રુતં માનધનં નયજ્ઞમ્ ॥ ૪૪ ॥

ભૌમેન દૃષ્ટોઽલિગતઃ પ્રસૂતે
બુધો નરં બુદ્ધિવિવેકહીનમ્ ।
સદાનુરં સાધુજનપ્રમુક્તં
ભયાકુલં નિન્દિતમાનસત્ત્વમ્ ॥ ૪૫ ॥

જીવેન દૃષ્ટઃ ખલુ સોમપુત્રો
નરં પ્રસૂતેઽલિગતઃ સુશિલમ્ ।
વિચક્ષણં નીતિપરં પ્રધાનં
સુતાર્થયુક્તં સતતં સુશિલમ્ ॥ ૪૬ ॥

શુક્રેણ દૃષ્ટોઽલિગતો બુધસ્તુ
નરં પ્રસૂતેઽતિધનૈઃ સમૃદ્ધમ્ ।
પ્રસન્નચિન્તં પ્રણતં ગતારિં
પ્રિયાતિથિં પ્રસ્તુમિષ્ટધર્મમ્ ॥ ૪૭ ॥

સૌરેણ દૃષ્ટોઽલિગતઃ પ્રસૂતે
બુધો પ્રવૃદ્ધિં શુભદં મનુષ્યમ્ ।
કુકર્મરક્તં મુનિના વિરક્તં
મહાપ્રતાપં પ્રણતં રિપૂનામ્ ॥ ૪૮ ॥

સૂર્યેણ દૃષ્ટઃ શશિજઃ પ્રસૂતે
હયાશ્રિતઃ ક્લેશવિધર્મયુક્તમ્ ।
નરં કુમિત્રૈઃ સહીતં ગતારિં
વિહીનકોશં ભયસંયુતં ચ ॥ ૪૯ ॥

ચન્દ્રેણ દૃષ્ટો હયગઃ પ્રસૂતે
બુધઃ પ્રસન્નં સુધનં મનુષ્યમ્ ।
સુધર્મયુક્તં કૃતસાધુસઙ્ગં
સદાનુરક્તં પતિસજ્જનાનામ્ ॥ ૫૦ ॥

ભૌમેન દૃષ્ટો પ્રસૂતે
બુધો ધનાઢ્યં પ્રથિતં મનુષ્યમ્ ।
હિતં સ્વવર્ગે પ્રચુરપ્રતાપં
વિદ્યાનુરક્તં ભયવર્જિતં ચ ॥ ૫૧ ॥

જીવેન દૃષ્ટો હયગઃ પ્રસૂતે
બુધઃ પ્રભૂતાર્થનયેન યુક્તમ્ ।
નરં સુવર્ણમ્બરરત્નભાજં
જિતેન્દ્રયં સ્નાનપરં સદૈવ ॥ ૫૨॥

શુક્રેણ દૃષ્ટો હયગઃ પ્રસૂતે
બુધોઽતિમાન્યં નૃપમાનાજમ્ ।
નરં વિધિચં પ્રણતારિપક્ષં
સુસંમતં દેવગુરુદ્વિજાનામ્ ॥ ૫૩॥

સૌરેણ દૃષ્ટઃ શશિજો હયસ્થો
ગતપ્રભાવં જનયેન્મનુષ્યમ્ ।
પરાન્નરક્તં બહુદાનભાજં
પ્રજ્ઞાવિહીનં ગતબાન્ધવં ચ ॥ ૫૪॥

મૃગાશ્રિતઃ સોમસુતોઽર્કદૃષ્ટઃ
કરોતિ મર્ત્યં પ્રભુદુઃખભાજમ્ ।
વ્યપેતશીલં સતતં કૃતઘ્નં
વિવર્જિતં સત્યદયાનયૈશ્ચ ॥ ૫૫॥

બુધ્દો મૃગસ્થઃ શશિના ચ દૃષ્ટઃ
કરોતિ મર્ત્યં સુખસમ્પ્રગલ્ભમ્ ।
પ્રિયાન્તચિન્તમ્ તીર્થકથાનુરક્તં
પ્રશાન્તચિન્તમ્ વિનયેન યુક્તમ્ ॥ ૫૬॥

ભૌમેન દૃષ્ટો મૃગગઃ પ્રસૂતે
સૌમ્યો ન સૌમ્યં શુભવિત્તહીનમ્ ।
સુગુહ્યરોગાર્દિતમેવ નિત્યં
પ્રિયાવિહીનં ભયસંયુતં ચ ॥ ૫૭॥

જીવેન દૃષ્ટો મૃગગો બુધશ્ચ
નરં પ્રસૂતે બહુપુત્રયુક્તમ્ ।
સન્તુષ્ટચિન્તં વ્યસનેન હીનં
નૃપપ્રિયં બન્ધુહિતં સદૈવ ॥ ૫૮॥

શુક્રેણ દૃષ્ટો મકરે બુધસ્તુ

કરોતિ મર્ત્યં વિજિતારિપક્ષમ્ ।
જિતેન્દ્રિયં વૃત્તિકરં દ્વિજાનાં
સદાનુકૂલં વિભવૈઃ સમેતમ્ ॥ ૫૯॥

સૌરેણ દૃષ્ટઃ પ્રકરોતિ સૌમ્યો
મૃગાશ્રિતઃ પાપરતં મનુષ્યમ્ ।
શિરોક્ષિરોગૈઃ સહિતં સુદુષ્ટં
વિહીનવિત્તં ભયસંયુતં ચ ॥ ૬૦॥

ઘટાશ્રિતઃ સોમસુતોઽર્કદૃષ્ટઃ
કરોતિ મર્ત્યં બહુનીચરક્તમ્ ।
શ્રિયા વિહીનં સુજનૈર્વિયુક્તં
વિવર્જિતં પુણ્યસુખેન નિત્યમ્ ॥ ૬૧॥

ઘટાશ્રિતઃ સોમસુતઃ પ્રદૃષ્ટ-
શ્ચન્દ્રેણ ધત્તે સુભગં મનુષ્યમ્ ।
સુરક્ષિતં પુણ્યધનૈઃ સમેતં
નયાનુરક્તં પ્રવરં સુદારમ્ ॥ ૬૨॥

ભૌમેન દૃષ્ટો ઘટગઃ પ્રસૂતે
બુધઃ સુબુદ્ધિં ચ સુખાર્થહીનમ્ ।
સદારુજં ક્રૂરમતિં મનુષ્યં
સમ્પીડિતં શ્લેષ્મકૃતૈર્વિકારૈઃ ॥ ૬૩॥

જીવેન દૃષ્ટઃ શશિજઃ પ્રસૂતે
ઘટાશ્રિતઃ શ્રીસહિતં મનુષ્યમ્ ।
સ્ત્રીણામભીષ્ટં સુરતાનુરક્તં
ધર્માશ્રિતં શાસ્ત્રસુલાલસં ચ ॥ ૬૪॥

શુક્રેણ દૃષ્ટઃ શશિજઃ પ્રસૂતે
નરં પ્રશાન્તં પરમપ્રભાવમ્ ।
નરેન્દ્રપૂજ્યં પ્રણતં દ્વિજાનાં
સુશ્લાઘિતં બન્દિજનેન નિત્યમ્ ॥ ૬૫॥

મન્દેન દૃષ્ટઃ શશિજો ઘટસ્થઃ
કરોતિ મર્ત્યં બહુમન્દભાજમ્ ।
પ્રભૂતદુઃખં ધનધાન્યહીનં

પરાઙ્મુખં દેવગુરુદ્વિજાનનામ્ ॥ ૬૬॥

સૂર્યેણ દૃષ્ટો હ્યષગો બુધસ્તુ
કરોતિ મર્ત્યં વિકૃતસ્વભાવમ્ ।
અતીવ પિત્તજ્વરવાતરોગૈઃ
સમ્પીડિતાઙ્ગં પ્રભયા વિહીનમ્ ॥ ૬૭॥

ચન્દ્રેણ દૃષ્ટઃ પ્રકરોતિ સૌમ્યો
મીનાશ્રિતઃ સત્યપરં મનુષ્યમ્ ।
સુબન્ધુપૂજાસુરકાર્યદક્ષં
દયાન્વિતં પ્રીતિકરં જનાનામ્ ॥ ૬૮॥

ભૌમેન દૃષ્ટો હ્યષગસ્તુ સૌમ્યઃ
કરોતિ નાનાવિધરોગભાજમ્ ।
વિહીનવર્ણં કફરક્તરોગૈઃ
સમ્પીડિતં માનવિવર્જિતં ચ ॥ ૬૯॥

દેવેજ્યદૃષ્ટઃ શશિજઃ પ્રસૂતે
મીનાશ્રિતઃ સર્વકલાસુ દક્ષમ્ ।
નરં સુપુણ્યાશ્રિતમિષ્ટચિન્તં
સદાનુરક્તં નૃપબાન્ધવાનામ્ ॥ ૭૦॥

.............................. ॥ ૭૧॥

સૌરેણ દૃષ્ટઃ શશિજો હ્યષસ્થઃ
કરોતિ સમ્પીડિતમુગ્રરોગૈઃ ।
શિરોક્ષિહસ્તાંઘ્રિરુજાવિકારૈઃ
સમ્પીડિતં નષ્ટધનં વિરૂપમ્ ॥ ૭૨॥

ઇતિ શ્રીવૃધ્દ્ધયવને બુધદર્શનચારઃ ॥

---

આધ્યાય ૧૩
ગુરુદર્શનચારધ્યાયઃ
મેષં ગતો દેવગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ પશુપુત્રહીનમ્ ।
નરં ભયાર્તં ઘૃણયા વિહીનં

વિવર્જિતં સત્યસુખેન નિત્યમ્ ॥ ૧॥

જીવોઽજસંસ્થઃ શશિના ચ દૃષ્ટઃ
કરોતિ સાત્યાન્વિતમિષ્ટધર્મમ્ ।
નરં પ્રગલ્ભં બહુશાસ્ત્રરક્તં
નૃપપ્રસાદૈઃ સાહિતં સદૈવ ॥ ૨॥

મેષં ગતો દેવગુરુઃ પ્રસૂતે
ભૌમેન દૃષ્ટો બહુશોકયુક્તમ્ ।
નરં ધનૈર્વર્જિતમિષ્ટપાપં
પાષણ્ડિનાં ભક્તમનલ્પદુઃખમ્ ॥ ૩॥

સૌમ્યેણ દૃષ્ટોઽજગતઃ સુરેજ્યો
નરં પ્રસૂતે સુતદારસૌખ્યૈઃ ।
સમૃદ્ધિમન્તં ગતશોકમોહં
હિતં સ્વવર્ગે ઘૃણયા સમેતમ્ ॥ ૪॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ જીવો
મેષાશ્રિત પુણ્યધનૈર્વિહીનમ્ ।
પ્રણષ્ટદારં ગતબન્ધુવર્ગં
પ્રણષ્ટમેધાવનિનાથચૌરૈઃ ॥ ૫॥

મેષાશ્રિતો દેવગુરુર્વિધત્તે
સૌરેણ દૃષ્ટો બહુધાન્યયુક્તમ્ ।
વિક્ષાધનં પુત્રયુતં કૃશાઙ્ગં
સ્ત્રીલંપદં પાનરતં નરં ચ ॥ ૬॥

વૃષાશ્રિતો દેવગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો વિધનં મનુષ્યમ્ ।
ક્રિયાવિહીનં કુજનાનુરક્તં
કુમિત્રભાજં કુધનાકુલં ચ ॥ ૭॥

વૃષાશ્રિતો દેવગુરુઃ પ્રસૂતે
ચન્દ્રેણ દૃષ્ટઃ સુરકર્મદક્ષમ્ ।
નરં નયચં સુધનેન યુક્તં
વિવર્જિતં રોગપરં સદૈવ ॥ ૮॥

ભૌમેન દૃષ્ટો સુરેજ્યઃ
કરોતિ ભીતં કૃપણં મનુષ્યમ્ ।
બહુપ્રમાદં નિયમૈર્વિહીનં
સદા ભૃતં જ્ઞાતિવિવર્જિતં ચ ॥ ૯॥

બુધેન દૃષ્ટો વૃષગઃ સુરેજ્યઃ
કરોતિ મર્ત્યં સુતસૌખ્યશુક્તમ્ ।
વિભાસમેતં નિયમપ્રસક્તં
નિતાન્તમુત્કૃષ્ટધનૈઃ સમેતમ્ ॥ ૧૦॥

શુક્રેણ દૃષ્ટો વૃષગઃ સુરેજ્યઃ
કરોતિ મર્ત્યં વ્રતસંયતં ચ ।
મહાધનં દાનરતં પ્રસ્..........
વિવેકિનં પ્રાણભૃતાં વરિષ્ટમ્ ॥ ૧૧॥

સૌરેણ દૃષ્ટો વૃષગઃ સુરેજ્યઃ
કરોતિ દીનં વિધતં મનુષ્યમ્ ।
વ્યપેતલજ્જં ધૃતિસત્યવર્જં
નિસર્ગદુષ્ટં પ્રિયમાધ્વસમ્ ॥ ૧૨॥

નૃયુગ્મસંસ્થઃ પ્રકરોતિ જીવઃ
સૂર્યેણ દૃષ્ટઃ પ્રણયેન હીનમ્ ।
વિવર્જિતં શૌચદયાભિમાનૈઃ
સમ્પીડિતં દુર્ગતિમેવ નિત્યમ્ ॥ ૧૩॥

ચન્દ્રેણ દૃષ્ટો મિથુને સુરેજ્યઃ
કરોતિ વિદ્યાવિનયેન યુક્તમ્ ।
નરં પ્રસિદ્ધં પ્રચુરાન્નપાનં
વિહીનદોષં સુરભક્તિચિન્તમ્ ॥ ૧૪॥

ભૌમેન દૃષ્ટો મિથુને સુરેજ્યઃ
કરોતિ મર્ત્યં વ્યથિતં નૃશંસમ્ ।
રોગાવૃતં પુણ્યયશોવિહીનં
ગતપ્રભં હાનિયુતં સદૈવ ॥ ૧૫॥

બુધેન દૃષ્ટો મિથુને સુરેજ્યઃ
કરોતિ મર્ત્યં બહુબુદ્ધિભાજમ્ ।

વિપ્રાનુરક્તં પ્રણતં વિહીન
સત્યાધિકં પૂજિતમેવ ભૂપૈઃ ॥ ૧૬॥

શુક્રેણ દૃષ્ટો મિથુને સુરેજ્યઃ
કરોતિ નાનાવિધવિત્તયુક્તમ્ ।
નરં નિતાંતં બહુશીલયુક્તં
ગુણાનુરક્તં પૃથુમેવ લોકે ॥ ૧૭॥

સૌરેણ દૃષ્ટઃ પ્રકરોતિ જીવો
દુઃખેન યુક્તં વ્યસનાભિભૂતમ્ ।
દયાવિહીનં પતિતાનુરક્તં
વિહીનવર્ણં જ્વરપિત્તભાજમ્ ॥ ૧૮॥

સુરેજ્યમન્ત્રી રવિણા ચ દૃષ્ટઃ
કર્કાશ્રિતસ્તીપ્રકરં મનુષ્યમ્ ।
વિમુક્તલજ્જં વિનયેન હીનં
સદાતુરં બાન્ધવવર્જિતં ચ ॥ ૧૯॥

ચન્દ્રેણ દૃષ્ટઃ ખલુ કર્કસંસ્થઃ
કરોતિ જીવો વિભવં મનુષ્યમ્ ।
મનોશ્ચદેહં સુરવિદ્વિભક્તં
કૃપાપરં સાધુસમન્વિતં ચ ॥ ૨૦॥

ભૌમેન દૃષ્ટો ગુરુરેવ કર્કે
નરં પ્રસૂતે બહુપાપભાજમ્ ।
જલોદરલ્લહગુદાક્ષિરોગૈઃ
સમ્પીડિતાઙ્ગં ગુણવર્જિતં ચ ॥ ૨૧॥

બુધેન દૃષ્ટઃ ખલુ કર્કસંસ્થો
ગુરુપ્રસક્તં નૃપલોકભાજમ્ ।
હિરણ્યવસ્ત્રામણિમુક્તલાભૈઃ
સમન્વિતં સત્યપરં સદૈવ ॥ ૨૨॥

શુક્રેણ દૃષ્ટઃ સુરરાજમન્ત્રી
કર્કાશ્રિતઃ સ્ફીતિવતં મનુષ્યમ્ ।
કરોતિ પુષ્ટં સુરભોજનાનાં
સુરક્તપૌરં પ્રથિતં નૃલોકે ॥ ૨૩॥

સૌરેણ દૃષ્ટઃ ખલુ કર્કરાશૌ
જીવઃ સુવતે બહુતર્કકં ચ ।
સુદીર્ઘપૌરૈર્નૃપચૌરદુષ્ટૈઃ
પ્રપીડિતં નિન્દિતમેવ નિત્યમ્ ॥ ૨૪॥

સિંહસ્થિતો દેવગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ પતિતસ્વભાવમ્ ।
વિહીનધર્મં પ્રકરોતિ વૈરં
માનાન્ત્યયુક્તં પ્રણતં ચ નીચે ॥ ૨૫॥

ચન્દ્રેણ દૃષ્ટો હરિગઃ સુરેજ્યઃ
કરોતિ મર્ત્યં સુખવર્ધિતાઙ્ગમ્ ।
સૌભાગ્યયુક્તં બહુમાનભાજં
સુસંમતં સાધુજનસ્ય નિત્યમ્ ॥ ૨૬॥

સિંહસ્થિતો દેવગુરુઃ પ્રસૂતે
કુજેન દૃષ્ટઃ પ્રચુરપ્રતાપમ્ ।
વિહીનવર્ણં નયવિપ્રયુક્તં
વિવર્જિતં સાધુસમાગમેન ॥ ૨૭॥

બુધેન દૃષ્ટઃ કુરુતે સુરેજ્યઃ
સિંહસ્થિતઃ સત્યપરં મનુષ્યમ્ ।
વિશાલકીર્તિં કૃતધર્મકાર્યં
નરેન્દ્રપૂજ્યં સુહૃદપ્રયુક્તમ્ ॥ ૨૮॥

શુક્રેણ દૃષ્ટો હરિગઃ સુરેજ્યો
નરં વિધત્તે મણિરત્નભાજમ્ ।
શય્યાનુરક્તં બહુમિત્રપક્ષં
વિપાદિતારિં પ્રભુતાસમેતમ્ ॥ ૨૯॥

સૌરેણ દૃષ્ટો હરિગઃ સુરેજ્યઃ
કરોતિ મર્ત્યં વિધિહીનકૃત્યમ્ ।
કૌલપ્રભાવં સુજનૈર્વિમુક્તં
વિદ્વેષશીલં નિજબાન્ધવાનામ્ ॥ ૩૦॥

કન્યાશ્રિતઃ સૂર્યનિરીક્ષિતશ્ચ

કરોતિ જીવઃ સતતં કુશીલમ્ ।
નરં પ્રસૂતે કુજલૈઃ સમેતં
વિપન્નશીલં પરુષસ્વભાવમ્ ॥ ૩૧॥

ચન્દ્રેણ દૃષ્ટઃ ખલુ કન્યકાયાં
જીવો વિધત્તે જયસમ્પ્ર..........
સુસાધુપૂજ્યં નૃપતેરભિષ્ટં
વિવર્જિતં પાપજનેન નિત્યમ્ ॥ ૩૨॥

ભૌમેન દૃષ્ટઃ સુરરાજમન્ત્રી
કન્યાશ્રિતસ્તીવ્રરુજાસમેતમ્ ।
નરં પ્રસૂતે નયધર્મહીનં
વિપન્નશીલં નૃપપીડિતં ચ ॥ ૩૩॥

બુધેન દૃષ્ટઃ પ્રકરોતિ જીવો
નરં પ્રગલ્ભં સુતદારયુક્તમ્ ।
સ્વબન્ધુમુખ્યં બહુકીર્તિભાજં
સદા હિતં બાન્ધવસજ્જનાનામ્ ॥ ૩૪॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ જીવઃ
કન્યાશ્રિતઃ સર્વજનૈઃ પ્રશસ્તમ્ ।
નરં સુશાસ્ત્રાનુરતં પ્રગલ્ભં
વ્યપેતદુઃખં કપદેન હીનમ્ ॥ ૩૫॥

કન્યાશ્રિતો દેવગુરુઃ પ્રસૂતે
સૌરેણ દૃષ્ટઃ પ્રચુરાર્તિયુક્તમ્ ।
વ્યાપચલજ્જં વિગતપ્રતાપં
કલિપ્રિયં દુષ્ટમતિં નૃશંસમ્ ॥ ૩૬॥

તુલાશ્રિતો દેવગુરુઃ સુવાતે
સૂર્યેણ દૃષ્ટઃ કુવિભઃ પ્રદુઃખમ્ ।
નરં સુશોકૈઃ સહિતં સપાપં
માયાધિકં કૃત્રિમસૌહૃદં ચ ॥ ૩૭॥

ચન્દ્રેણ દૃષ્ટસ્તુલગસ્તુ જીવો
નરં પ્રસૂતે વિભવૈઃ સમેતમ્ ।
વ્યથાવિહીનં નતશત્રુપક્ષં

મહાધનં સત્યપરં સદૈવ ॥ ૩૮॥

ભૌમેન દૃષ્ટસ્તુલગસ્તુ જીવો
નરં પ્રસૂતે કલહૈઃ સમેતમ્ ।
નિન્દ્યં કૃશં પુણ્યયશોવિહીનં
સુસંસ્કૃતં નીચજનૈઃ સદૈવ ॥ ૩૯॥

બુધેન દૃષ્ટસ્તુલગઃ સુરેજ્યો
નરં પ્રસક્તં વિનયે પ્રસૂતે ।
સુતીર્થભાજં બહુમિત્રવર્ગં
શાસ્ત્રાનુરક્તં બહુબાન્ધવં ચ ॥ ૪૦॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ જીવ-
સ્તુલાશ્રિતઃ સત્યધનં પ્રસૂતે ।
ગુણાનુરક્તં વિવિધાનપાનૈઃ
સંવર્ધિતાઙ્ગં ગુરુદેવભક્તમ્ ॥ ૪૧॥

સૌરેણ દૃષ્ટઃ પ્રકરોતિ જીવ-
સ્તુલાશ્રિતઃ ક્લેશભુવા સમેતમ્ ।
વિહીનપક્ષં સુતદારહીનં
સદા નરં રોગસમન્વિતં ચ ॥ ૪૨॥

જીવોઽલિસંસ્થઃ પ્રકરોતિ મ્..........
સૂર્યેણ દૃષ્ટઃ કૃપણં મનુષ્યઃ ।
વાતામયક્લેશસુપીડિતાઙ્ગં
ગતપ્રધાનં મલિનં કુચૈલમ્ ॥ ૪૩॥

ચન્દ્રેણ દૃષ્ટોઽલિગતઃ સુરેજ્યઃ
કરોતિ મર્ત્યં ગતપાપસઙ્ગમ્ ।
સૌભાગ્યયુક્તં વિનયૈઃ સમેતં
પ્રભૂતમિત્રં ગતશોકમોહમ્ ॥ ૪૪॥

ભૌમેન દૃષ્ટોઽલિગતઃ પ્રસૂતે
જીવો જિતં સ્ત્રીતનયૈશ્ચ નિત્યમ્ ।
વિવેકહીનં ગતમાનલાભં
વિરૂપચેષ્ટં પિશુનસ્ત્વભાવમ્ ॥ ૪૫॥

બુધેન દૃષ્ટોઽલિગત પ્રસૂતે
જીવો યુતં બન્દિજનેન નિત્યમ્ ।
વિરુદ્ધકર્મં પરુષપ્રતાપં
સમ્પાદિતં સર્વકલાસુ દક્ષમ્ ॥ ૪૬॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ જીવો
જિતેન્દ્રિયં જીવદયાસમેતમ્ ।
પ્રભૂતલાભં વિકૃતૈર્વિયુક્તં
ચતુષ્પદગ્રામધનૈઃ સમેતમ્ ॥ ૪૭॥

મન્દેન દૃષ્ટઃ સુરરાજમન્ત્રી
કરોતો મર્ત્યં જ્વરપીડિતાઙ્ગમ્ ।
મન્દાલિસંસ્થઃ પ્રભયા સમેતં
બહુવ્યયં શાસ્ત્રવિવર્જિતં ચ ॥ ૪૮॥

ચાપાશ્રિતો દેવગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો ગતમાનભાજમ્ ।
સ્વધર્મહીનં પરધર્મરક્તં
નાનાવિધૈઃ કર્મસુખૈર્વિહીનમ્ ॥ ૪૯॥

ચન્દ્રેણ દૃષ્ટો હયગઃ પ્રસૂતે
જીવો જનાઢ્યં નિયમૈઃ સમેતમ્ ।
યતિદ્વિજપ્રવ્રજિતનુરક્તં ..........
મધ્યે સદા તીર્થરતં પ્રસિદ્ધમ્ ॥ ૫૦॥

જીવો હયસ્થઃ ક્ષિતિજેન દૃષ્ટો
નરં પ્રસૂતેઽતિખલં સપાપમ્ ।
પ્રપંચમાયાસહિતં નિતાંતં
કૃતાપરાધનં નૃપસાધુલોકૈઃ ॥ ૫૧॥

બુધેન દૃષ્ટો હયગઃ સુરેજ્યઃ
કરોતિ મર્ત્યં બહુસૌખ્યયુક્તમ્ ।
વિનીતમત્મદ્ભુતલાભભાજન્
પ્રભૂતમૂર્તિં સદયં ચ નિત્યમ્ ॥ ૫૨॥

શુક્રેણ દૃષ્ટો હયગોઽથ જીવો
નરં સુવાતે શુચિમન્તલાભમ્ ।

સત્યાનુરક્તં સુખવૃત્તગાત્રં
સુરદ્વિજેન્દ્રૈઃ પ્રણતં ચ તેષામ્ ॥ ૫૩॥

ચાપાશ્રિતો દેવગુરુઃ પ્રસૂતે
સૌરેણ દૃષ્ટઃ પરદારરક્તમ્ ।
વિહીનસત્યં મતિવિપ્રયુક્ત-
મૃણાધિકં વ્યાધિયુતં તદન્તમ્ ॥ ૫૪॥

[ મૃગેણસંસ્થિત સુરરાજમન્ત્રી
સૂર્યેણ દૃષ્ટઃ ચપલસ્વભાવં
વાતાદિપિડાભયમુગ્રતા ચ
સ્વબાન્ધવૈર્મિત્રવિરક્તતા ચ ॥ ૫૫॥

ચન્દ્રેણ દૃષ્ટો મૃગરાશિતાંગવૈઃ
ગુરુર્ઃ પ્રયુક્તો ધન્લાભતા ચ ।
માનં વિવેકં સ્વજનં સુખં ચ
શત્રુક્ષયં દેવગુરોશ્ચ ભક્તિમ્ ॥ ૫૬॥

જીવઃ પ્રસૂતે મૃગલગ્નગે ચ
ભૌમેન દૃષ્ટઃ કુરુતે ભયં ચ ।
શત્રું વિવાદં નિજબન્ધુવૈરં
વેશ્યાનુરક્તં મતિવિભ્રમં ચ ॥ ૫૭॥

બુધેન દૃષ્ટઃ પ્રભુતાસમેતં
ચ સંસ્થો મૃગરાશિકશ્ચ ।
વાણિજ્યદક્ષં વિવિધં વિલાસં
ક્ષેત્રાધિલાભં ધનવલ્લભં ચ ॥ ૫૮॥

શુક્રેણ દૃષ્ટઃ સુરરાજમન્ત્રી
મૃગેણસંસ્થઃ દ્વિજદેવભક્તમ્ ।
વલ્લભકામિનીનાં
પુત્રૈઃ મિત્ર..........ચ રાજ્યલાભમ્ ॥ ૫૯॥

મૃગેણસંસ્થઃ સુરરાજમન્ત્રી
શૌરેણ દૃષ્ટઃ ભયમુગ્રતા ચ ।
જનાપવાદં નૃપચૌરકાગ્નિ
સ્ત્રીણાં વિવાદે ધનધાન્યનાશમ્ ॥ ૬૦॥ ]

ઘટસ્થિતો દેવગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ સુતદારદુઃખૈઃ ।
સમ્પીડિતાઙ્ગં ગતબુદ્ધિચિન્તં
વિરક્તપૌરં નિજબન્ધુહીનમ્ ॥ ૬૧॥

ચન્દ્રેણ દૃષ્ટો ઘટગઃ પ્રસૂતે
સુરેજ્યમન્ત્રી નયનાભિરામમ્ ।
અકલ્પષં શાસ્ત્રકથાનુરક્તં
પ્રિયવદં સાધુજનસ્ય નિત્યમ્ ॥ ૬૨॥

ભૌમેન દૃષ્ટો ઘટગઃ
કરોતિ મર્ત્યં બહુદાનમુગ્રમ્ ।
..........પેતવિઘ્નં કૃપયા વિહીનં
વિલજ્જમત્યુદ્ધતકામસક્તન ॥ ૬૩॥

બુધેન દૃષ્ટો ઘટગઃ સુરેજ્યઃ
કરોતિ સિદ્ધા સહિતં સનાચમ્ ।
નરં વિશિષ્ટાર્થપરં સુરૂપં
સદાનુકંપાસહિતં વિધિજ્ઞમ્ ॥ ૬૪॥

શુક્રેણ દૃષ્ટો ઘટગ સુરેજ્યઃ
કરોતિ મેધાવિનમલ્પભગમ્ ।
નરં નિરીહં સતતં સુદાત્તં
મનસ્વિનં પાર્થિવકાર્યદક્ષમ્ ॥ ૬૫॥

સૌરેણ દૃષ્ટો ઘટગોઽથ જીવઃ
કરોતિ રોગૈર્વિવિધૈઃ સમેતમ્ ।
સુકર્મતપ્તં પ્રભુતાવિહીનં
વિવર્જિતં ભોગનયૈઃ સદૈવ ॥ ૬૬॥

જીવો હ્યષસ્થો રવિણા ચ દૃષ્ટઃ
કરોતિ નાનાવિધમુગ્રતાપમ્ ।
છર્દિપ્રકોપં જ્વરદાહ્મુગ્રં
મહાભયં પાર્થિવજં સદૈવ ॥ ૬૭॥

ચન્દ્રેણ દૃષ્ટઃ સુરપૂજિતાઙ્ગો
હ્યષસ્થિતઃ સંજનયેન્મનુષ્યમ્ ।

પ્રિયંવદં સત્યસુખાર્થયુક્તં
સ્ત્રીણામ્ભીષ્ટં રતિલાલસં ચ ॥ ૬૮॥

ભૌમેન દૃષ્ટો હ્યષગઃ પ્રસૂતે
સુરેજ્યમન્ત્રી જ્વરયા સમેતમ્ ।
મહાતિસારજ્વરમીહિતાઙ્ગં
મિત્રેન યુક્તં નયવર્જિતં ચ ॥ ૬૯॥

બુધેન દૃષ્ટઃ પ્રકરોતિ જીવો
મીનસ્થિતઃ શૌચપરં મનુષ્યમ્ ।
પ્રિયાતિથિં માનધનૈઃ સમેતં
વિરાગચિન્તં સુરવિપ્રભક્તમ્ ॥ ૭૦॥

શુક્રેણ દૃષ્ટો હ્યષગઃ ઉરેજ્યો
નરં પ્રસૂતે વિવિધાર્થયુક્તમ્ ।
ગુણાધિકં પ્રાણાદયાસમેતં
સદાનુકૂલં પિતૃમાતૃભક્તમ્ ॥ ૭૧॥

જીવો હ્યષસ્થો રવિપુત્રદૃષ્ટો
નરં સુવાતે વિકૃતસ્વભાવમ્ ।
વિવર્જિતં દારસુખેન નિત્યં
વિધાવિહીનં સતતં નૃલોકે ॥ ૭૨॥

ઇતિ શ્રીવૃધ્દ્ધયવને ગુરુદર્શનચારઃ ॥

---

આધ્યાય ૧૪

શુક્રદર્શનચારધ્યાયઃ

મેષસ્થિતો દૈત્યગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ કૃપણસ્વભાવમ્ ।
નરં નિતાન્તં બહુકોપયુક્તં
વિવાદશીલં ગુરુતલ્પગં ચ ॥ ૧॥

ચન્દ્રેણ દૃષ્ટો ભૃગુજોઽજસંસ્થો
નરં પ્રસૂતે વિનયાર્થયુક્તમ્ ।
બહુપ્રસાદં રહિતાપવાદં
નરેન્દ્રકર્મોધતમેવ નિત્યમ્ ॥ ૨॥

ભૌમેન દૃષ્ટઃ ખલુ મેષસંસ્થઃ
શુક્રઃ પ્રસૂતે વિધનં મનુષ્યમ્ ।
સમ્પીડિતં રક્તવિકારશોકૈ
ર્વિરાજિતં નીચજનેન નિત્યમ્ ॥ ૩॥

મેષાશ્રિતઃ સોમસુતેન દૃષ્ટઃ
શુક્રઃ પ્રસૂતે સતતં સુશીલમ્ ।
નરં નયજ્ઞં નિજબન્ધુપૂજ્યં
મનોજ્ઞરૂપં પ્રથિતં વિલોકે ॥ ૪॥

જીવેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
મેષં ગતઃ સહ્યમુદારચિન્તમ્ ।
મહાપ્રભાવં વિજિતારિપક્ષં
કૃતચમોજસ્વિનમિષ્ટધર્મમ્ ॥ ૫॥

સૌરેણ દૃષ્ટઃ ખલુ મેષસંસ્થો
નરં પ્રસૂતે ભૃગુજઃ સકોપમ્ ।
વિરુધ્ધચેષ્ઠં ખલુ શ..........ઉ........
ક્ષીણં કૃશં બન્ધુજનેન સક્તમ્ ॥ ૬॥

વૃષસ્થિતો ભાસ્કરદૃષ્ટ એવ
કરોતિ શુક્રઃ પ્રણતં સુ.......... ।
નરં પ્રજાપૂજિતમદ્ભાર્થં
પ્રિયંકરં સાધુજનેન નિત્યમ્ ॥ ૭॥

ચન્દ્રેણ દૃષ્ટો ભૃગુજઃ પ્રસૂતે
વૃષં ગતઃ કીર્તિધનૈઃ સમેતમ્ ।
નરં પ્રગલ્ભં પ્રણતારિપચં
શ્રિયાધિકં બાન્ધવવલ્લભં ચ ॥ ૮॥

ભૌમેન દૃષ્ટો ભૃગુજો વૃષસ્થઃ
કરોતિ હીનં પશુવિત્તદારૈઃ ।
નરં સદા સ્ત્રીજિતમુગ્રવૈરં
વિવર્જિતં ભૂમિપદાતિલાભૈઃ ॥ ૯॥

બુધેન દૃષ્ટો ભૃગુજો વૃષસ્થઃ

કરોતિ બુદ્ધ્યા સહિતં સુસત્યમ્ ।
નરં સુદેહં બહુવિત્તભાજં
પરાક્રમપ્રાપ્તયશોર્થમાનમ્ ॥ ૧૦॥

જીવેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
વૃષં ગતઃ કીર્તિધનૈઃ સમેતમ્ ।
નરં પ્રગલ્ભં પ્રણતારિપક્ષં
શ્રિયાધિકં બાન્ધવવલ્લભં ચ ॥ ૧૧॥

સૌરેણ દૃષ્ટો ભૃગુજો વૃષસ્થો
નરં સુવાતે ગતપૌરુષં ચ ।
વૃદ્ધ્યા વિહીનં વિકૃતસ્વભાવં
વિવર્જિતાઙ્ગં વિભવોત્થભોગૈઃ ॥ ૧૨॥

તૃતીયરાશૌ ભૃગુજઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો જ્વરપીડિતાઙ્ગમ્ ।
ગતાનુરાગં મલિનસ્વભાવં
પ્રમાદિતં નીચજનૈઃ સદૈવ ॥ ૧૩॥

ચન્દ્રેણ દૃષ્ટો મિથુનેઽથ શુક્રો
નરં પ્રસૂતે બહુભોગભાજમ્ ।
સ્વભાવશુદ્ધિં વિનિધૃષ્ટરોગં
જિતેન્દ્રિયં નીતિવિશારદં ચ ॥ ૧૪॥

ભૌમેન દૃષ્ટઃ પ્રકરોતિ શુક્રો
રાશૌ તૃતીયે પુરૂષં વિરૂપમ્ ।
રોગાભિભૂતં બહુદૈન્યભાજં
વિવર્જિતં માનધને.......... નિત્યમ્ ॥ ૧૫॥

બુધેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
તૃતીયરાશૌ સુભગં મનોજ્ઞમ્ ।
પ્રસિદ્ધવીર્યં ગુણસત્યયુક્તં
પ્રભાવીનં સૌખ્યયુતં સદૈવ ॥ ૧૬॥

જીવેન દૃષ્ટઃ પ્રકરોતિ શુક્રો
રાશૌ તૃતીયે ધનવસ્ત્રલભમ્ ।
નરં કૃતનં પ્રચુરપ્રભાવં

સુસંયતં સર્વસુખૈઃ સમેત .......... ॥ ૧૭॥

મન્દેન દૃષ્ટો ભૃગુજસ્તૃતીયે
રાશૌ સુરોગાભિહતં મનુષ્યમ્ ।
સદાતુરં બાન્ધવપક્ષતુષ્ટં
સદા વિહીનં પતિતસ્વભાવમ્ ॥ ૧૮॥

કર્કસ્થિતો ભાર્ગવજોઽર્કદૃષ્ટઃ
કુર્યાત્ કુશીલં કૃપણસ્વભાવમ્ ।
વિવર્જિતાઙ્ગં સુખભોગવસ્ત્રૈઃ
પ્રપીડિતં બન્ધુભિરેવ નિત્યમ્ ॥ ૧૯॥

ચન્દ્રેણ દૃષ્ટો ભૃગુજસ્તુ કર્કે
કરોતિ મર્ત્યં ધનવાજિયુક્તમ્ ।
સુસાધુસઙ્ગં પ્રવરાન્નપાનં
હિતં દ્વિજાનાં પરમં પ્રહૃષ્ટમ્ ॥ ૨૦॥

ભૌમેન દૃષ્ટઃ પ્રકરોતિ શુક્રઃ
કર્કથિતઃ પુષ્ટિયુતં મનુષ્યમ્ ।
સ્ત્રીણામભીષ્ટં સુરદેવભક્તં
સુરાક્ષિતાઙ્ગં વિવિધૈશ્ચ ભૃત્યૈઃ ॥ ૨૧॥

શિરોક્ષિજિહ્વાગુદરોગયુક્તં
સ્વભાવપાપં વિનયેન હીનમ્ ।
બુધેન દૃષ્ટઃ પ્રકરોતિ શુક્રઃ
કર્કસ્થિતઃ સત્યવિવર્જિતં ચ ॥ ૨૨॥

જીવેન દૃષ્ટઃ પ્રકરોતિ શુક્રઃ
કર્કાશ્રિતો સત્યધનં પ્રસૂતે ।
નરં વિશિષ્ટાન્વિતસાધુચેષ્ટં
સદાનુરક્તં યજનાર્થદાનૈઃ ॥ ૨૩॥

મન્દેન દૃષ્ટઃ પ્રકરોતિ શુક્રઃ
કર્કાશ્રિતસ્તીવ્રરુજાસમેતમ્ ।
મહારિપક્ષં ક્ષુધયાર્તદેહં
નિસર્ગમ્ન્દં વિગતપ્રવંચમ્ ॥ ૨૪॥

સિંહાશ્રિતઃ સત્યવિહીનમેવ
શુક્રઃ પ્રસૂતે રવિણા ચ દૃષ્ટઃ ।
હદ્વેગશોકજ્વરપીડિતાઙ્ગં
નરં મહાદોષસમન્વિતં ચ ॥ ૨૫॥

સિંહાશ્રિતો દાનવપૂજિતાઙ્ગો
દૃષ્ટોઽથ ચન્દ્રેણ નરં પ્રસૂતે ।
સુતીર્થસેવાનિરતં મનુષ્યં
દત્તં પિતૃણાં ચ સુધાવિહીનમ્ ॥ ૨૬॥

ભૌમેન દૃષ્ટઃ પ્રકરોતિ શુક્રઃ
સિંહાશ્રિતઃ શત્રુનિપીડિતાઙ્ગમ્ ।
નરં દરિદ્રં પિશુનાભિભૂતં
નિસ્તેજસં પાપવિવર્જિતાઙ્ગમ્ ॥ ૨૭॥

બુધેન દૃષ્ટઃ પ્રકરોતિ શુક્રઃ
સિંહે સુખાર્થં વિજિતારિપક્ષમ્ ।
કુલસ્વધર્મે પરમં પ્રહૃષ્ટં
વિવાદયુક્તં નૃપવલ્લભં ચ ॥ ૨૮॥

જીવેન દૃષ્ટો ભૃગુજો વિધત્તે
સિંહાશ્રિતઃ સત્ય્ધનેન યુક્તમ્ ।
નરં પ્રગલ્ભં વિભુતાસમેતં
કૃષિપ્રભાવાદ્બહુસૌખ્યયુક્તમ્ ॥ ૨૯॥

મન્દેન દૃષ્ટો ભૃગુજસ્તુ સિંહે
નરં પ્રસૂતે સુખપુત્રહીનમ્ ।
વિવર્જિતં ધર્મધનૈશ્ચ સત્યૈ-
ર્ગતપ્રભાવં સરુજં સદૈવ ॥ ૩૦॥

કન્યાશ્રિતો ભાસ્કરદૃષ્ટદેહો
નરં પ્રસૂતે ભૃગુજઃ સુતીવ્રમ્ ।
નયન હીનં ગતમાનસત્યં
સ્વબન્ધુમાર્ગેણ બહિષ્કૃતં ચ ॥ ૩૧॥

કન્યાશ્રિતો ભર્ગાવ ઇન્દુદૃષ્ટો
નરં સુવાતં સહિતં સુતાર્થૈઃ ।

પરાક્રમાપ્તૈર્વિધવૈઃ સમેતં
સુપૂજિતં સાધુજનેન નિત્યમ્ ॥ ૩૨॥

ભૌમેન દૃષ્ટો ભૃગુજસ્તુ કન્યે
કરોતિ મર્ત્યં સરુજં સકામમ્ ।
સદા વિરક્તં નિજબન્ધુવર્ગૈ-
ર્વિહીનવિત્તં બહુવૈરયુક્તમ્ ॥ ૩૩॥

કન્યાશ્રિતો દૈત્યગુરુસ્તુ સૌમ્ય-
દૃષ્ટઃ પ્રસૂતે સદયં સધર્મમ્ ।
મનોચદેહં બહુશાસ્ત્રરક્તં
સદા સુશીલં .......... યુક્તમ્ ॥ ૩૪॥

જીવેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
કન્યાશ્રિતઃ સત્યમુદારચેષ્ટમ્ ।
નરં નિતાન્તં નૃપમાનભાજં
ગતારિપક્ષં નિજવર્ગસખ્યમ્ ॥ ૩૫॥

મન્દેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
કન્યાશ્રિતઃ કાન્તિવિવર્જિતાઙ્ગમ્ ।
નરં સુનીચં પ્રણતં કૃતઘ્નં
વિવર્જિતં ભૂમિપમાનદાનૈઃ ॥ ૩૬॥

તુલાશ્રિતો દૈત્યગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટોऽભિભુજાસમેતમ્ ।
કરોતિ મર્ત્યં બહુદૈન્યયુક્તં
નયેન હીનં સતતં કુરક્તમ્ ॥ ૩૭॥

ચન્દ્રેણ દૃષ્ટઃ પ્રકરોતિ શુક્ર-
સ્તુલાશ્રિતઃ પ્રીતમલોલુપં ચ ।
નરં પ્રભાસત્યવિવેકયુક્તં
સુશિક્ષિતં સર્વકલાસુ નિત્યમ્ ॥ ૩૮॥

ભૌમેન દૃષ્ટો ભૃગુજસ્તુલાયાં
કરોતિ નીચૈર્વિજિતં વિશૂલમ્ ।
નયેન હીનં વિક્રિપાસમેતં
નરં નિરસ્તં સુજનૈઃ સદૈવ ॥ ૩૯॥

બુધેન દૃષ્ટઃ પ્રકરોતિ શુક્ર-
સ્તુલાશ્રિતઃ સૌખ્યનયેન યુક્તમ્ ।
નરં પ્રગલ્ભં પ્રચુરપ્રતાપં
વિપન્નરોગં પ્રિયદર્શનં ચ ॥ ૪૦॥

જીવેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
નરં સુસત્યં નૃપકાર્યદક્ષમ્ ।
પ્રભૂતલાભં વિજિતારિપક્ષં
જિતેન્દ્રિયં બાન્ધવવલ્લભં ચ ॥ ૪૧॥

સૌરેણ દૃષ્ટો ભૃગુજઃ પ્રસૂતે
નરં સુદુષ્ટં કૃપણસ્વભાવમ્ ।
માયાધિકં દમ્ભપરં વિહીનં
ધર્મેણ સત્યેન ચ પૌરુષેણ ॥ ૪૨॥

શુક્રોઽલિસંસ્થો રવિણા ચ દૃષ્ટો
નરં પ્રસૂતે મદનાતિદેહમ્ ।
વ્યયાન્વિતં પાપરતં કૃતઘ્નં
વ્યપેતલાભં ગતપૌરુષં ચ ॥ ૪૩॥

ચન્દ્રેણ દૃષ્ટોઽલિગતસ્તુ શુક્રો
નરં વિધત્તે પરમપ્રભાવમ્ ।
સદાનુરક્તં દ્વિજદેવતાનાં
તપસ્વિનં શીલહનૈઃ સમેતમ્ ॥ ૪૪॥

ભૌમેન દૃષ્ટહ્ પ્રકરોતિ શુક્રો
નરં કૃતાર્થાભિહતં નૃશંસમ્ ।
સદા કૃતઘ્નં કૃતદોષસઙ્ગં
વ્યપેતલજ્જં સતતં ચ રુધ્દ્ધમ્ ॥ ૪૫॥

બુધેન દૃષ્ટહ્ પ્રકરોતિ શુક્રઃ
કરોતિ મર્ત્યં ખલુ વૃશ્ચિકસ્થઃ
બુધ્દ્ધાન્વિતં પ્રીતિકરં પ્રસવં
સુતીર્થયુક્તં મહિમાધિકં ચ ॥ ૪૬॥

જીવેન દૃષ્ટોઽલિગતઃ પ્રસૂતે

શુક્રઃ સુકર્તાં નિવબન્ધુવર્ગૈઃ ।
નરં નિરીહં હતપાપસઙ્ગં
ગુણાશ્રયં ભૂતિસમન્વિતં ચ ॥ ૪૭ ॥

શુક્રોઽલિગઃ સૂર્યસુતેન દૃષ્ટો
મર્ત્યં પ્રસૂતેઽતિધનૈઃ સમેતમ્ ।
પ્રભૂતકોશં વિગતાર્તિપાપં
તીર્થાનુરક્તં દ્વિજવલ્લભં ચ ॥ ૪૮ ॥

ચાપાશ્રિતો દૈન્યગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ પરદારરક્તમ્ ।
નરં વ્યયૈઃ પીડિતમુગ્રરોગં
સદા જિતં દારનૃપાત્મજૈશ્ચ ॥ ૪૯ ॥

ચન્દ્રેણ દૃષ્ટઃ પ્રકરોતિ શુક્ર-
શ્ચાપાશ્રિતો વસ્ત્રધનૈઃ સમેતમ્ ।
નરં સુદેહં ગતપાપદેહં
વિચલણં ધર્મકથાસુ નિત્યમ્ ॥ ૫૦ ॥

ભૌમેન દૃષ્ટો હયગઃ પ્રસૂતે
શુક્રઃ કૃતઘ્નં વિગતપ્રભાવમ્ ।
શિરોર્તિછર્દિજ્વરદાહરોગૈઃ
સમ્પીડિતં ત્રાસકરં નરાણામ્ ॥ ૫૧ ॥

બુધેન દૃષ્ટઃ પ્રકરોતિ શુક્રો
ધનુર્ધરસ્થઃ પ્રકરોતિ મર્ત્યમ્ ।
પ્રભૂતલાભં સુધિયા સમેતં
ધર્માધિકં સાધુજનાનુરક્તમ્ ॥ ૫૨ ॥

સુરેજ્યદૃષ્ટો હયગઃ પ્રસૂતે
શુક્રઃ પ્રસઙ્ગ પ્રાણતપ્રગલ્ભમ્ ।
દ્વિજાનરાર્થં કૃતકર્મસંઘં
શાન્તં મહાશાસ્ત્રરતં સદૈવ ॥ ૫૩ ॥

મન્દેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
ચાપાશ્રિતો હાનિ ..........
નરં ઉતાર્થૈ રહિતં કુરૂપં

પ્રધાનવૈરં મતિવર્જિતં ચ ॥ ૫૪॥

મૃગાશ્રિતો દૈત્યગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો ભૃણરોગયુક્તમ્ ।
નરં સુદોષાન્વિતમિષ્ટશત્રું
વિવેકહીનં ગતસાધ્વસં ચ ॥ ૫૫॥

ચન્દ્રેણ દૃષ્ટો ભૃગુજઃ પ્રસૂતે
મૃગાશ્રિતો માતૃપિતૃપ્રભુક્તમ્ ।
નરં સદા સ્ત્રીદયિતં મનોજ્ઞં
મેધાવિનં વિદ્યરતં સદૈવ ॥ ૫૬॥

ભૌમેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
મૃગાશ્રિતોઽતિવ્યસનૈઃ સમેતમ્ ।
ગતારિં ગતમાનશૌર્યં ..........
મહાવિપક્ષં હતવત્સલં ચ ॥ ૫૭॥

બુધેન દૃષ્ટઃ પ્રકરોતિ શુક્રો
મૃગાશ્રિતઃ સાધુજને સુરક્તમ્ ।
ધર્મસ્વભાવં બહુબુધિભાજં
નયાધિકં પાર્થિવવા..........અં ચ ॥ ૫૮॥

જીવેન દૃષ્ટઃ પ્રકરોતિ શુક્રો
મૃગાશ્રિતો દારસુતાર્થયુક્તમ્ ।
અનષ્ટદેહં વિગતોદ્યમં ચ
દયાધિકં પુણ્યપરં નિતાન્તમ્ ॥ ૫૯॥

મન્દેન દૃષ્ટઃ પ્રકરોતિ શુક્રો
નરં હસપ્રાપ્યમનલ્પદુઃખમ્ ।
વિહીનધર્માર્થયશોનુરાગં
પ્રદ્વેષશીલં સતતં દ્વિજાનામ્ ॥ ૬૦॥

ઘટશ્રિતો દૈત્યગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટો ભયશોકયુક્તમ્ ।
નરં નિરાહારતયાણુદેહં
શ્લેષ્માધિકં કીર્તિવિવર્જિતં ચ ॥ ૬૧॥

ચન્દ્રેણ દૃષ્ટો ઘટગસ્તુ શુક્રો
નરં પ્રસૂતે નયનાભિરામમ્ ।
નરં હિતં સાધુજનસ્ય નિત્યં
નરેન્દ્રપૂજ્યં સતતં સુખાર્થમ્ ॥ ૬૨॥

ભૌમેન દૃષ્ટો ઘટગશ્ચ શુક્રો
નરં ભયાર્તં ગતવિત્તભોગમ્ ।
વિહીનકોશં દયિતાવિહીનં
સુગુહ્યરોગાભિહિતં કરોતિ ॥ ૬૩॥

બુધેન દૃષ્ટો ઘટગોઽથ શુક્રઃ
કરોતિ સત્યાધિકમીષ્ટધર્મમ્ ।
પ્રભૂતમિત્રં પ્રચુરાન્નપાનં
નરં વિનિતં સુતસૌખ્યયુક્તમ્ ॥ ૬૪॥

જીવેણ દૃષ્ટઃ પ્રકરોતિ શુક્રો
નરં પ્રિયૈઃ સંયુતમેવ નિત્યમ્ ।
ઘટસ્યધાન્યપ્રવરૈઃ સમેતં
વિશુદ્ધિભાજં ગતપાપસઙ્ગમ્ ॥ ૬૫॥

મન્દેન દૃષ્ટો ઘટગઃ પ્રસૂતે
શુક્રઃ ક્રિયાહીનમનલ્પશોકમ્ ।
વિવર્જિતં ધર્મધનાર્થસૌખ્યૈઃ
સુદુષ્ટભાવં સદયં સદૈવ ॥ ૬૬॥

મીનાશ્રિતો દૈત્યગુરુઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ પ્રણમેન હીનમ્ ।
સુનિષ્ઠુરં કોપપરં સુદુષ્ટં
ધર્માતિગં ધર્મગુરુપ્રભાવમ્ ॥ ૬૭॥

ચન્દ્રેણ દૃષ્ટો હ્યષગઃ પ્રસૂતે
શુક્રઃ સુરૂપં સુભગં મનુષ્યમ્ ।
દેવેજ્યસક્તં સુતમિત્રહીનં
દયાધિકં પુણ્યપરં સદૈવ ॥ ૬૮॥

ભૌમેન દૃષ્ટઃ પ્રકરોતિ મીને
શુક્રો વિહીનં પશુપુત્રદારૈઃ ।

વિગર્હિતં ધર્મક્રિયાવિરક્તં
સરોગદેહં સતતં કુચૈલમ્ ॥ ૬૯॥

બુધેન દૃષ્ટો હ્યષગો વિધત્તે
શુક્રઃ સુરૂપં વિનયપ્રધાનમ્ ।
સદાનુરક્તં દ્વિજલિઙ્ગિનાં ચ
ધર્માર્થભાજં ગુરુભક્તિયુક્તમ્ ॥ ૭૦॥

જીવેન દૃષ્ટો ભૃગુજઃ પ્રસૂતે
નરં પ્રિયં પુણ્યધનૈઃ સમેતમ્ ।
સુતાર્થવિધાવિભવૈઃ સમેતં
પ્રજાધિકં સત્યપરં મનોજ્ઞમ્ ॥ ૭૧॥

સૌરેણ દૃષ્ટઃ પ્રકરોતિ શુક્રો
નરં હ્યષસ્થઃ સુતસત્યહીનમ્ ।
ચૌરાવનીશૈર્હૃતવિત્તસારં
રોગાતુરં બુદ્ધિવિવર્જિતં ચ ॥ ૭૨॥

ઇતિ શ્રીવૃધ્દ્યવને શુક્રદર્શનચારઃ ॥

---

આધ્યાય ૧૫
શનૈશ્ચરદર્શનચારધ્યાયઃ
મેષં ગતઃ સૂર્યસુતો વિધત્તે
સૂર્યેણ દૃષ્ટો વિકૃતાનુરૂપમ્ ।
પ્રવાસશીલં વિજિતં સ્વદારૈ-
ર્વ્યપેતલજ્જં બહુસાધ્વસં ચ ॥ ૧॥

મેષં ગતઃ સૂર્યસુતો વિધત્તે
ચન્દ્રેણ દૃષ્ટઃ સુનયં વિહીનમ્ ।
નરં સુરૂપં બહુલાભભાજં
ગુણાનુરક્તં બહુસાધુમિત્રમ્ ॥ ૨॥

મન્દોઽથ મેષે ક્ષિતિજેન દૃષ્ટો
નરં પ્રસૂતે જ્વરપીડિતાઙ્ગમ્ ।
છર્દિપ્રકોપપ્રભવૈશ્ચ રોગૈઃ
સમન્વિતં દ્વેષકરં ગુરુણામ્ ॥ ૩॥

બુધેન દૃષ્ટો રવિજોઽજસંસ્થઃ
કરોતિ બુદ્ધ્યા સહિતં મનુષ્યમ્ ।
પ્રસન્નદેહં નૃપતેરભીષ્ટં
કૃતશ્રમોજોધિકમેવ નિત્યમ્ ॥ ૪॥

શનૈશ્ચરો મેષગતઃ પ્રસૂતે
જીવેન દૃષ્ટઃ પ્રબરં પ્રગલ્ભમ્ ।
નરં સુસત્યં સુભગં પ્રશાન્તં
સદાનુકૂલં દ્વિજબાન્ધવાનામ્ ॥ ૫॥

શુક્રેણ દૃષ્ટો રવિજઃ પ્રસૂતે
મેષં ગતઃ શાસ્ત્રપથાનુરક્તમ્ ।
પ્રભૂતમિત્રં વિજિતારિપક્ષં
સદાનુગં સાધુતપસ્વિનાં ચ ॥ ૬॥

વૃષં ગતોઽર્કિ દિનપેન દૃષ્ટો
નરં પ્રસૂતે કઠિનસ્વભાવમ્ ।
પરાનરક્તં વિષયાર્તદેહં
પ્રપંચશીલં કુટિલસ્વભાવમ્ ॥ ૭॥

વૃષં ગતઃ સૂર્યસુતોઽર્થદુષ્ટં
કરોતિ મર્ત્યં શશિના ચ દૃષ્ટઃ ।
સદ્વસ્ત્રમન્નાશનભોજનં ચ
શ્લાઘ્યં સતાં દમ્ભવિવર્જિતમ્ ચ ॥ ૮॥

ભૌમેન દૃષ્ટો ગવિ સૂર્યસૂનુઃ
કરોતિ કીર્ત્યા રહિતં મનુષ્યમ્ ।
સુદુષ્ટભાવં વિધિના વિહીનં
પરાન્નયોષિદ્ધનલાલસં ચ ॥ ૯॥

બુધેન દૃષ્ટો ગવિ સૂર્યપુત્રો
નરં પ્રસૂતે કૃષિવિત્તભાજમ્ ।
નાનાસુપુણ્યૈઃ સહિતં સુદાનં
સતામભીષ્ટં સુરતૈઃ સમેતમ્ ॥ ૧૦॥

જીવેન દૃષ્ટો વૃષગોઽથ સૌરિઃ

કરોતિ ધર્માધિકમદ્ભુતર્થમ્ ।
નરં ગુરુણાં વિનયપ્રસક્તં
સદાતિથિં દાનપરપ્રસક્તમ્ ॥ ૧૧॥

શુક્રેણ દૃષ્ટો રવિજઃ પ્રસૂતે
હતારિપક્ષં પિતૃમાતૃભક્તમ્ ।
મનોજ્ઞવસ્ત્રં સુતસૌખ્યભાજં
વિવર્જિતં પાપજનેન મિત્યમ્ ॥ ૧૨॥

મન્દોઽર્કદૃષ્ટો મિથુને પ્રસૂતે
નરં કલત્રાકુલિતં સદૈવ ।
વિ..........ગિનં ક્લેશરુજાસમેતં
ભયાન્વિતં બાન્ધવવર્જિતં ચ ॥ ૧૩॥

ચન્દ્રેણ દૃષ્ટો રવિજો મૃયુગ્મે
સતામભીષ્ટં જનયેન્મનુષ્યમ્ ।
વિ..........પ્રતાપાર્થસિખૈઃ સમેતં
નિસર્ગવિચાનપરં સદૈવ ॥ ૧૪॥

ભૌમેન દૃષ્ટો રવિજો નૃયુગ્મે
નરં પ્રસૂતે વિભવેન હીનમ્ ।
પ્રભૂતકોપં ગુરુરોગભાજં
સદા કુશીલં વિભવૈર્વિહીનમ્ ॥ ૧૫॥

બુધેન દૃષ્ટો રવિજો નૃયુગ્મે
કરોતિ સત્યં સુધિયા સમેતમ્ ।
નરં નિધિગ્રામપુરાર્થભાજં
સુરૂપદેહં નૃપકાર્યદક્ષમ્ ॥ ૧૬॥

જીવેન દૃષ્ટો રવિજો નૃયુગ્મે
નરં પ્રસૂતે મણિવિદ્રુમાદ્યૈઃ ।
સમન્વિતં ધર્મકથાનુરક્તં
પ્રિયાતિથિં શંસિતમેવ લોકે ॥ ૧૭॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ સૌર-
સ્તૃતીયરાશૌ સતતં ધનાઢ્યમ્ ।
નરં નિલામં સુખસિદ્ધિયુક્તં

મહાનુકંપં પ્રણયપ્રપન્નમ્ ॥ ૧૮॥

કર્કાશ્રિતઃ સૂર્યસુતો વિધત્તે
સૂર્યેણ દૃષ્ટઃ ક્ષતપીડિતાઙ્ગમ્ ।
જ્વરાતિસારાકુલમેવ નિત્યં
પ્રદ્વેષશીલં ગતધર્મકૃત્યમ્ ॥ ૧૯॥

ચન્દ્રેણ દૃષ્ટો રવિજઃ પ્રસૂતે
કર્કાશ્રિતઃ કીર્તિધનૈરુપેતમ્ ।
નરં સુધર્માતિરતં પ્રધાનં
વિવર્જિતં નીચજનપ્રસઙ્ગૈઃ ॥ ૨૦॥

ભૌમેન દૃષ્ટો રવિજઃ સુવાતે
કર્કાશ્રિતો ઘાતપરં મનુષ્યમ્ ।
દેવાદશીલં સતતં વૃથાઢ્યં
મિથ્યાધિકં કામપરં કૃતઘ્નમ્ ॥ ૨૧॥

બુધેન દૃષ્ટો રવિજસ્તુ કર્કે
હિરણ્યરત્નૈશ્ચ યુતં કરોતિ ।
નરં નિરીહં સુરલોકપૂજ્યં
મહાજનૈઃ સેવિતમત્યુદારમ્ ॥ ૨૨॥

જીવેન દૃષ્ટો રવિજઃ સુવાતે
કર્કે ગતઃ સર્વસુતૈઃ સુમેતમ્ ।
વિધાનબુધિં પશુસઙ્ગયુક્તં
સદાનુરક્તં દ્વિજબાન્ધવાનામ્ ॥ ૨૩॥

શુક્રેણ દૃષ્ટો રવિજઃ પ્રસૂતે
કર્કાશ્રિતો નિતિપરં મનુષ્યમ્ ।
સુરૂપદારં હતપાપવર્ગં
જિતેન્દ્રિયં સત્યકથાનુરક્તમ્ ॥ ૨૪॥

સિંહાશ્રિતો ભાસ્કરિરર્કદૃષ્ટઃ
કરોતિ કામાધિકમલ્પધર્મમ્ ।
નરં વિવેકાકૃતિવર્જિતાઙ્ગઃ
ગુણૈર્વિહીનં પરભક્તિકં ચ ॥ ૨૫॥

ચન્દ્રેણ દૃષ્ટો હરિભેઽર્કસૂનુઃ
કરોતિ મર્ત્યં પરમાર્થસખ્યમ્ ।
નરં પ્રધાનં સ્વકુલસ્ય મધ્યે
માયાવિહીનં શુભકર્મદક્ષમ્ ॥ ૨૬॥

ભૌમેન દૃષ્ટઃ પ્રકરોતિ મર્તુઅં
સિંહસ્થિતોઽર્કિસ્તુ રુજાસમેતમ્ ।
વિહીનવર્ણં પ્રચુરામયાઢ્યં
નરં સદાકારવિવર્જિતાઙ્ગમ્ ॥ ૨૭॥

બુધેન દૃષ્ટો રવિજઃ સુવાતે
નરં સુદક્ષં પ્રિયવિપ્રદેવમ્ ।
સ્વબન્ધુસૌખ્યં બહુદાનભાજં
વિષક્રિયવ્યાકુલિતં પ્રધાનમ્ ॥ ૨૮॥

જીવેન દૃષ્ટો રવિજઃ સુવાતે
સિંહાશ્રિતસ્ત્રાણપરં દ્વિજાનામ્ ।
ક્રિયાસમેતં વરતીર્થયુક્તં
વિવર્જિતં દુષ્ટસમાગમેન ॥ ૨૯॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ સૌરઃ
સિંહસ્થિતો ધાન્યધનપ્રધાનમ્ ।
નરં સુવિક્ષં ગુરુદાનરક્તં
સુપૂજિતાઙ્ગં નૃપસાધુવાદૈઃ ॥ ૩૦॥

કન્યાશ્રિતઃ સૂર્યસુતઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ કફપિત્તભાજમ્ ।
વિધાવિહીનમૃણવૃત્તિભાજં
વિહીનધર્મં ચ ખલં મનુષ્યમ્ ॥ ૩૧॥

કન્યાશ્રિતઃ સૂર્યસુતઃ પ્રસૂતે
ચન્દ્રેણ દૃષ્ટઃ પ્રભયા સમેતમ્ ।
નરં સુધર્માનુરતં નિતાન્તં
સ્વધર્મરક્તં પ્રિયસઙ્ગયુક્તમ્ ॥ ૩૨॥

કન્યાશ્રિતઃ સૂર્યસુતઃ સુવાતે
ભૌમેન દૃષ્ટોઽતિશૃણં પ્રસૂતે ।

નરં પ્રધાનૈઃ પરિહીનમાનં
સુનિષ્ઠુરં પાપરતં કુબુદ્ધિમ્ ॥ ૩૩॥

બુધેન દૃષ્ટો રવિજઃ સુવાતે
નરં પ્રશંસાભ્યધિકં સુરૂપમ્ ।
જનેષુ પૂજ્યં સુધિયા સમેતં
કુલપ્રધાનં બહુબુદ્ધિયુક્તમ્ ॥ ૩૪॥

જીવેન દૃષ્ટઃ પ્રકરોતિ સૌરિઃ
સદા સુશીલં ભયવર્જિતાઙ્ગમ્ ।
ગુણાનુગં ચૈવ તુ શાસ્ત્રરક્તં
પ્રભૂતલાભં જનવલ્લભં ચ ॥ ૩૫॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ સૌરઃ
કન્યાં ગતઃ કાન્તિધિયા સમેતમ્ ।
નરં હિરણ્યાર્થસમૃદ્ધિયુક્તં
પ્રિયં રતં પાપજનાનુષઙ્ગમ્ ॥ ૩૬॥

તુલાસ્થિતો ધર્મસુખં સુવાતે
પ્રભૂતમિત્રં પ્રચુરાન્નપાનમ્ ।
સુરપ્રિયં બ્રાહ્મણદેવરક્તં
મહાજનૈઃ સેવિતમિષ્ટભક્તમ્ ॥ ૩૭॥

ચન્દ્રેણ દૃષ્ટઃ પ્રકરોતિ સૌર-
સ્તુલાશ્રિતઃ સત્યદયાસમેતમ્ ।
પ્રભૂતવિત્તં પ્રચુરપ્રભાવં
હતદ્વિષં ભૃત્યયુતં સુરક્તમ્ ॥ ૩૮॥

ભૌમેન દૃષ્ટઃ પ્રકરોતિ મન્દઃ
સરોગયુક્તં વિકૃતાનુકારમ્ ।
પિત્તજ્વરશ્લેષ્મભયાર્તિયુક્તં
દયાવિહીનં ગતમાનલાભમ્ ॥ ૩૯॥

બુધેન દૃષ્ટો રવિજઃ સુવાતે
તુલાશ્રિતો હસ્તિહયાર્થભાજમ્ ।
નરં વિદગ્ધં નુતમેવ લોકૈઃ
સતામભીષ્ટ ગુણવૃદ્ધિરક્તમ્ ॥ ૪૦॥

જીવેન દૃષ્ટઃ પ્રકરોતિ મન્દ-
સ્તુલાશ્રિતો દાનપરં મનુષ્યમ્ ।
સ્વભાવસૌખ્યં ક્ષમયા સમેતં
પતિપ્રિયં ધર્મવિશારદં ચ ॥ ૪૧॥

શુક્રેણ દૃષ્ટઃ પ્રકરોતિ મન્દ-
સ્તુલાશ્રિતઃ પાર્થિવલાભભજન્
સ્વવર્ગપૂજ્યં પરવર્ગહીનં
દયાશ્રિતં શંસિતમેવ ધીરૈઃ ॥ ૪૨॥

મન્દોઽલિસંસ્થો રવિણા ચ દૃષ્ટો
નરં પ્રસૂતે કુટિલપ્રભાવમ્ ।
વિરક્તપૌરં પરસેવયાઢ્યં
નૃશંસકર્માણમધર્મશીલમ્ ॥ ૪૩॥

ચન્દ્રેણ દૃષ્ટઃ રવિજોઽલિસંસ્થઃ
સુવીર્યવિપ્રૈશ્ચ ધિયા સમેતમ્ ।
દ્વિજાનુરક્તં વિવિધાન્નપાનં
સુરક્ષિતાઙ્ગં દ્વિજદેવકૃત્યૈઃ ॥ ૪૪॥

ભૌમેન દૃષ્ટો રવિજઃ પ્રસૂતે
નરં સુતિક્ષણં ખલુ વૃશ્ચિકસ્થઃ ।
સદાતુરં રુદ્રવપુર્નિતાન્ત ..........
વિદેશરક્તં સુરુજાસમેતમ્ ॥ ૪૫॥

.......... ॥ ૪૬॥

જીવેન દૃષ્ટઃ ખલુ વૃશ્ચિકસ્થો
મન્દો વિધત્તે ગુણમાનયુક્તમ્ ।
નરં નિરીહં સુતદારસૌખ્યૈઃ
સમન્વિતં યજ્ઞવિધાનરક્તમ્ ॥ ૪૭॥

શુક્રેણ દૃષ્ટોઽલિગતશ્ચ મન્દઃ
કરોતિ લાભૈઃ પ્રચુરૈઃ સમેતમ્ ।
પ્રિયાતિથિં વસ્ત્રવિહીનભાજં
ભયાધિકં કીર્તિધીયા સમેતમ્ ॥ ૪૮॥

ચાપાશ્રિતઃ સૂર્યસુતઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટઃ પરિહીનસત્યમ્ ।
નરં ક્રિયાહીનમુરુપ્રરોગં
રુગ્વ્યાકુલં શાસ્ત્રમતેન હીનમ્ ॥ ૪૯॥

ચન્દ્રેણ દૃષ્ટઃ પ્રકરોતિ મન્દો
નરં વિશેષાચરિતાનુરક્તમ્ ।
સુધર્મશીલં બહુશાસ્ત્રરક્તં
સુસંસ્કૃતં બાન્ધવભૂમિપાલૈઃ ॥ ૫૦॥

ચાપાશ્રિતઃ સૂર્યયુતો વિધત્તે
ભૌમેન દૃષ્ટઃ સુધિયા સમેતમ્ ।
સુનીતિરક્તં ચતુરં પ્રગલ્ભં
ધનિપ્રિયં કાન્તિવિવર્જિતં ચ ॥ ૫૧॥

બુધેન દૃષ્ટો રવિજઃ પ્રસૂતે
ચાપાશ્રિતસ્તીર્થકરાનુરક્તમ્ ।
નરં વિનીતં સુધિયા સમેતં
નૃપપ્રિયં બ્રાહ્મણસંમતં ચ ॥ ૫૨॥

જીવેન દૃષ્ટો રવિજો વિધત્તે
ધનુર્ધરસ્થઃ સુતમિત્રયુક્તમ્ ।
નરં ધનાશ્વપ્રધનૈઃ સમેતં
સદા વિહીનં કુજનાગમેન ॥ ૫૩॥

શુક્રેણ દૃષ્ટો હયગઃ પ્રસૂતે
શનિઃ સુદાતારમલોલુપં ચ ।
નરં પ્રતાપપ્રધનં પ્રસહ્યં
પ્રભૂતવિત્તં સતતં નિરીહમ્ ॥ ૫૪॥

ચન્દ્રો મૃગસ્થો રવિણા ચ દૃષ્ટો
નરં પ્રસૂતે તનયાર્તિયુક્તમ્ ।
વિષાદભાજં વિજિતં ખલાદ્યૈ-
ર્વીર્યેણ હીનં સતતં ભયાર્તમ્ ॥ ૫૫॥

ચન્દ્રેણ દૃષ્ટઃ પ્રકરોતિ મન્દો

મૃગાશ્રિતઃ પ્રાણયુતં મનુષ્યમ્ ।
સુતાર્થયુક્તં મહીમાસમેતં
વિધાનુરક્તં બહુવિત્તભાજમ્ ॥ ૫૬॥

ભૌમેન દૃષ્ટોઽર્કસુતો મૃગસ્થો
નરં વિધત્તે ધૃણરોગભાજમ્ ।
વિહીનપક્ષં ક્ષતજાર્તદેહં
પ્રપંચશીલં ભયસંયુતં ચ ॥ ૫૭॥

બુધેન દૃષ્ટો મકરે પ્રસૂતે
મન્દો વિધિજ્ઞં પરમં પ્રદક્ષમ્ ।
ગુણાધિકં કીર્તિસુખૈઃ સમેતં
સદાનુરક્તં દ્વિજબાન્ધવાનામ્ ॥ ૫૮॥

મન્દઃ સુરેજ્યેન મૃગેઽપિ દૃષ્ટઃ
પ્રભૂતવિન્તં જનયેન્મનુષ્યમ્ ।
નરેન્દ્રપૂજ્યં સુતસૌખ્યયુક્તં
સતાં પ્રિયં શીલધનૈઃ સદૈવ ॥ ૫૯॥

શુક્રેણ દૃષ્ટો મકરેઽર્કસૂનુઃ
કરોતિ મર્ત્યં ધનસૌખ્યયુક્તમ્ ।
તેજોધિકં સત્યમુદારદાનં
ચિન્તપ્રસન્નં પ્રણતં દ્વિજાનામ્ ॥ ૬૦॥

ઘટાશ્રિતો ભાસ્કરજઃ પ્રસૂતે
સૂર્યેણ દૃષ્ટોઽથવિહીનસત્યમ્ ।
વિવર્જિતં માનધનૈઃ સુકૃષ્ટૈઃ
સ્ત્રીણાં સ્વભાવં સુહૃદપ્રયુક્તમ્ ॥ ૬૧॥

ચન્દ્રેણ દૃષ્ટો ઘટગઃ પ્રસૂતે
મન્દો વિહીનં રિપુભિર્મનુષ્યમ્ ।
ધર્મજ્ઞજં દાનપરં ગતારિં
સદાનુરક્તં કૃષિવિત્તવર્ગૈઃ ॥ ૬૨॥

ભૌમેન દૃષ્ટો ઘટગોઽર્કસૂનુ-
ર્નરં પ્રસૂતેઽર્થધનં સદૈવ ।
શિરોર્તિપિત્તજ્વરજૈર્વિકારૈઃ

ક્રુધ્દ્ધં વિઉધ્દ્ધં ગતસૌહૃદં ચ ॥ ૬૩॥

બુધેન દૃષ્ટો ઘટગોઽથ મન્દો
નરં વિધત્તે વિધનં મનુષ્યમ્ ।
સત્યાધિકં વિશ્વવિધાનદક્ષં
સુરક્ષકં દેવગુરુદ્વિજાનામ્ ॥ ૬૪॥

જીવેન દૃષ્ટો ઘટગોઽથ મન્દો
નરં સુવાતેઽર્થયશોનુરક્તમ્ ।
હિતં ગુરુણાં નિરુજં સદૈવ
પ્રધાનયુક્તં નૃપકાર્યદક્ષમ્ ॥ ૬૫॥

શુક્રેણ દૃષ્ટો ઘટગોઽર્કસૂનુઃ
કરોતિ વિત્તાર્થયુતં મનુષ્યમ્ ।
નરં ગતાર્થં ધૃણયા સમેતં
ચરિત્રશીલં સતતં ચ દુષ્ટમ્ ॥ ૬૬॥

મીનસ્થિતઃ સૂર્યસુતોઽર્કદૃષ્ટો
નરં પ્રસૂતે કઠિનં કૃતઘ્નમ્ ।
વિવેકહીનં ગતબન્ધુવર્ગં
સુદીર્ઘસૂત્રં ગતમિષ્ટ.......... ॥ ૬૭॥

ચન્દ્રેણ દૃષ્ટો હ્યષગોઽર્કસૂનુ-
ર્નરં પ્રસૂતે વિભવૈઃ પ્રધાનૈઃ
મુખ્યં પ્રગલ્ભં ધનધાન્યભાજં
વિધાધિકં પ્રીતિકરં જનાનામ્ ॥ ૬૮॥

ભૌમેન દૃષ્તો રવિજઃ પ્રસૂતે
માનાશ્રિતઃ શસ્ત્રભયાર્તદેહમ્ ।
સરોગયુક્તં કૃપણસ્વભાવં
પરાજિતં નીચજનેન નિત્યમ્ ॥ ૬૯॥

બુધેન દૃષ્ટઃ કુરુતેઽર્કસૂનુ-
ર્મીનસ્થિતસ્તીર્થવ્રતૈરુપેતમ્ ।
નરં પ્રધાનં સ્વકુલસ્ય મધ્યે
સ્થિરસ્વભાવં ગતપાપરૂપમ્ ॥ ૭૦॥

જીવેન દૃષ્ટઃ પ્રકરોતિ મન્દો
નરં સુવીર્યાધિકમિષ્તસત્યમ્ ।
લાભૈઃ સમેતં વિવિધપ્રધાનં
પુરોગવં બાન્ધવસજ્જનાનામ્ ॥ ૭૧॥

શુક્રેણ દૃષ્ટઃ હ્યષગઃ પ્રસૂતે
મન્દોઽધિમન્દં સતતં મનુષ્યમ્ ।
સુધર્મશીલં વિજિતારિપક્ષં
ચ્યુતં ત્રિલોકે વિવિધપ્રતાપમ્ ॥ ૭૨॥

ઇતિ શ્રીવૃધ્દ્યવને શનૈશ્ચરદર્શનચારઃ ॥

---

આધ્યાય ૧૬

ગ્રહાણાં ભાવાધ્યાયઃ

મૂર્તિસ્થિતઃ સંજનયેહિનેશો
નરં સરોગં વિકલં મહેર્ષ્યમ્ ।
પ્રભૂતકોપં જડુશત્રુપક્ષં
પ્રભાવિહીનં પરતર્કકં ચ ॥ ૧॥

દ્વિતીયસંસ્થઃ કુરુતેઽર્થહીનં
સૂર્યઃ પ્રસિધ્દ્વા રહિતં કૃતઘ્નમ્ ।
શ્રધ્દ્વાવિહીનં વિગતસ્વભાવં
કુમિત્રયુક્તં પરવાચકં ચ ॥ ૨॥

સૂર્યસ્તૃતીયઃ કુરુતે મનુષ્યં
નિરોગદેહં સુતબન્ધુહીનમ્ ।
પરોપકારં પ્રણતં પ્રસિધ્દ્વિં
વિવેકવિધાભ્યધિકં સદૈવ ॥ ૩॥

ચતુર્થગઃ સંજનયેત્ કૃતઘ્નં
હિંસ્રં સદા શીલવિવર્જિતાઙ્ગમ્ ।
સ્ત્રીભિર્જિતં યુધ્દ્વપરં કુદેહં
વિવર્જિતં સત્યધનેન નિત્યમ્ ॥ ૪॥

સુતસ્થિતઃ સ્વલ્પસુત પ્રસૂતે
દિવાધિનાથઃ પ્રણયેન હીનમ્ ।

કુકૃત્યરક્તં વ્યસનાભિભૂતં
પિત્તાધિકં ભૂરિવિપક્ષયુક્તમ્ ॥ ૫॥

રિપુસ્થિતો વાસરપઃ પ્રસૂતે
હતારિપક્ષં પુરુષં સુરૂપમ્ ।
વિનીતવેષં સુજનૈઃ સમેતં
પ્રિયાતિથિં બાન્ધવસંમતં ચ ॥ ૬॥

કલત્રગસ્તિક્ષ્ણકરઃ પ્રસૂતે
કુરૂપદેહં કુકલત્રભાજમ્ ।
કફાનિલાભ્યાં પરિપીડિતાં
કામાર્તદેહં ગતસૌહૃદં ચ ॥ ૭॥

.......... સૂર્યઃ ખલુ ........
વિદેશરક્તં પુરુષં પ્રહીનમ્ ।
પ્રપીડિતં ક્ષુત્પ્રભવૈશ્ચ રોગૈ-
ર્જનાનુરાગેણ વિવર્જિતં ચ ॥ ૮॥

ધર્માશ્રિતસ્તીક્ષ્ણકરઃ પ્રસીદ્ધં
કરોતિ મર્ત્યં નૃપતેરભીષ્ટમ્ ।
પરોત્થવિત્તેન સદા સમેતં
નિરસ્તધર્મં મતિવર્જિતં ચ ॥ ૯॥

કર્માશ્રિતો વાસરપઃ પ્રસૂતે
સુકર્મભાજં વિનયૈઃ સમેતમ્ ।
પ્રભૂતમિત્રં સુભગં સુકાન્તં
નયાધિકં દેવગુરુપ્રભક્તમ્ ॥ ૧૦॥

લાભાશ્રિતઃ સંજનયેદિનેશઃ
પ્રભૂતલાભં સુભગં નિરીહમ્ ।
સુભોજનાછાદનવાહનાઢ્યં
પ્રિયંવદં કામવિચક્ષણં ચ ॥ ૧૧॥

વ્યયાશ્રિતઃ સંજનયેહિનેશો
વ્યયૈઃ સમેતં કુજનોદ્ભવૈશ્ચ ।
પ્રપીડિતં વૈરિભિરેવ નિત્યં
કુકર્મરક્તં કુજનં તથૈવ ॥ ૧૨॥

મૂર્તિસ્થિતો રાત્રિપતિઃ પ્રસૂતે
સમ્પૂર્ણવિંશઃ સુભગં સુકાન્તમ્ ।
તીક્ષ્ણક્ષયાઙ્ગં બહુપાપયુક્તં
વિહીનપક્ષં ગતસૌહૃદં ચ ॥ ૧૩॥

દ્વિતીયસંસ્થઃ કુરુતે શશાઙ્કઃ
કોશાન્વિતં સર્વસમૃદ્ધિયુક્તમ્ ।
પ્રિયંવદં બ્રાહ્મણદેવભક્તં
મહાપ્રભાવં બહુસૌહૃદં ચ ॥ ૧૪॥

તારાધિપઃ સંજનયેત્તૃતીયઃ
સુરૂપદેહં સુભગં મનોજ્ઞમ્ ।
સ્ત્રીવલ્લભં સર્વકલાસુ દક્ષં
પ્રજાસ્વભીષ્ટં બહુપુત્રપૌત્રમ્ ॥ ૧૫॥

સુખસ્થિતઃ સંજનયેચ્છશાઙ્કઃ
પ્રભૂતસૌખ્યં પુરૂષં પ્રધાનમ્ ।
સ્ત્રીણામભીષ્ટં ગુરુદેવભક્તં
નયપ્રધાનં ગતવૈરરોગમ્ ॥ ૧૬॥

ચન્દ્રઃ સુતસ્થઃ સતતં પ્રસૂતે
વિદ્યાધિકં બ્રાહ્મણદેવભક્તમ્ ।
શુદ્ધસ્વભાવં વિજિતારિપક્ષં
પ્રિયંવદં પાર્થિવવલ્લભં ચ ॥ ૧૭॥

ષષ્ઠઃ શશાઙ્કઃ કુરુતેઽલ્પજીવં
રોગાધિકં શત્રુનિપીડિતાઙ્ગમ્ ।
કુરૂપદેહં કુધિયા સમેતં
સૌખ્યૈર્વિહીનં પરવાંચકં ચ ॥ ૧૮॥

કલત્રગઃ સંજનયેચ્છશાઙ્કો
ધર્મધ્વજં ભૂરિદયાસમેતમ્ ।
પ્રસન્નમૂર્તિં વિભવાન્વિતં ચ
પ્રખ્યાતકીર્તિં સુધિયા સમેતમ્ ॥ ૧૯॥

ચન્દ્રોઽષ્ટમસ્થઃ  કુરૂતેઽલ્પવીર્યં

સ્વલ્પાયુષં સત્યદયાવિહીનમ્ ।
સ્નેહૈર્વિહીનં પરદારરક્તં
વૃથાટનં બાન્ધવવર્જિતં ચ ॥ ૨૦॥

ધર્માશ્રિતઃ સંજન્યેચ્છશાઙ્કઃ
પ્રભૂતમિત્રં પ્રચુરાન્નપાનમ્ ।
પ્રસિધ્દ્ધિયુક્તં પ્રણતારિપક્ષં
પ્રશંસિતં સાધુજનેન નિત્યમ્ ॥ ૨૧॥

આકાશસંસ્થઃ કુરુતે શશાઙ્કો
ભૂપપ્રિયં બાન્ધવમાનપુષ્ટમ્ ।
પ્રિયાતિથિં પ્રીતિકરં ગુરુણાં
સદૈવ ભક્તં વરદેવતાનામ્ ॥ ૨૨॥

લાભાશ્રિતઃ સંનયયેધ્દ્ધિમાંશુઃ
પ્રભૂતલાભં ખલુ શીતરશ્મિઃ ।
સરૂપદેહં સુજનાનુરક્ત-
મુદારચિન્તં હતશત્રુપક્ષમ્ ॥ ૨૩॥

વ્યયાશ્રિતઃ શીતકરઃ  પ્રસૂતે
વ્યયૈરનિષ્ટૈઃ સહિતં કૃતઘ્નમ્ ।
વૈરપ્રધાનં બહુશત્રુપક્ષં
સ્વલ્પાયુષં સત્યવિહીનવેષમ્ ॥ ૨૪॥

હોરાશ્રિતો ભૂતનયઃ પ્રસૂતે
રક્તોત્થરોગૈઃ પરિપીડિતાઙ્ગમ્ ।
પિત્તાનિલાભ્યાં સહિતં કુરૂપં
વિહીનશક્તિં મતિવર્જિતં ચ ॥ ૨૫॥

ધનસ્થિતો ભૂતનયઃ પ્રસૂતે
ધનૈર્વિહીનં જનતાવિરુધ્દ્ધમ્ ।
કઠોરવાચાનિરતં કુયુધ્દ્ધિં
પ્રભાવિહીનં ગતસૌહૃદં ચ ॥ ૨૬॥

કરોતિ ભૌમઃ સહજાશ્રિતશ્ચ
નિરોગદેહં વિજયપ્રધાનમ્ ।
નરેન્દ્રમાનાન્વિતમિષ્ટધર્મં

પ્રભૂતકોપં સતતં સુદાન્તમ્ ॥ ૨૭॥

સુખસ્થિતઃ સંજનયેશ્ચ વક્રઃ
સુખૈર્વિહીનં હતવીર્યમેવ ।
સુબુધ્દ્ધિહીનં ગતબન્ધુવર્ગં
વ્યયાશ્રિતં કામપરં મનુષ્યમ્ ॥ ૨૮॥

સુતથિતઃ સંજનયેશ્ચ વક્રઃ
સુતૈર્વિહીનં પુરુષં સદૈવ ।
પાપૈઃ સમેતં પરતર્કકં ચ
વિદ્યાવિહીનં ગતસૌહૃદં ચ ॥ ૨૯॥

રિપુસ્થિતઃ સંજનયેધતારિં
કુલપ્રધાનં પ્રિયદર્શનં ચ ।
સંશ્લાઘિતં સાધુજનેન નિત્યં
વિનીતવેષં સતતં સુશીલમ્ ॥ ૩૦॥

કલત્રસંસ્થઃ ક્ષિતિજઃ પ્રસૂતે
વિદેશભાજં કુકલત્રયુક્તમ્ ।
વિવાદશીલં બહુશત્રુપક્ષં
નીચાનુરક્તં પ્રિયસાહસં ચ ॥ ૩૧॥

મૃત્યુસ્થિતઃ સંજનયેત્ ક્ષિતીજઃ
શસ્ત્રાર્તદેહં પ્રભયા સમેતમ્ ।
કુપાર્થિવાસ..........મમિત્રચેષ્ઠં
કૃપાવિહીનં ગતસૌહૃદં ચ ॥ ૩૨॥

ધર્માશ્રિતઃ સંજનયેત્ કુધર્મં
ભૌમં કુમિત્રં ગતબન્ધુવર્ગમ્ ।
ભાગ્યૈર્વિહીનં વિગતાભિમાનં
પ્રતપ્ત મતિવર્જિતં ચ ॥ ૩૩॥

કર્માશ્રિતો ભૂતનયઃ પ્રસૂતે
કુકર્મરક્તં કુધિયા સમેતમ્ ।
જનાપ્વાદે નિરતં કૃતઘ્નં
વૃથાશ્રમં બાન્ધવનિન્દિતં ચ ॥ ૩૪॥

લાભાશ્રિતઃ પાર્થિવલાભપુષ્ટં
નરં પ્રસૂતે ક્ષિતિપં સદૈવ ।
હતારિપક્ષં નિજબન્ધુમાન્યં
પ્રશસ્યશીલં પ્રથિતાભિમાનમ્ ॥ ૩૫॥

વ્યયાશ્રિતઃ સંજનયેત્ ક્ષિતિજો
વ્યયાધિકં ભૂરિરિપુપ્રયુક્તમ્ ।
પ્રભૂતપાપવ્યસનૈઃ સમેતં
મર્ષાધિકં ધર્મવિવર્જિતં ચ ॥ ૩૬॥

તનુસ્થિતઃ સોમસુતઃ સુવાતે
પ્રાજ્ઞાધિકં માનિનમિષ્ટધર્મમ્ ।
મહાપ્રભાવં વૃજિનૈર્વિહીનં
ગુણોત્કટં પાર્થિવસંમતં ચ ॥ ૩૭॥

ધનસ્થિતઃ સંજ્નયેચ્છશાઙ્કું
પ્રભૂતકોશં સ્વજનાનુરક્તમ્ ।
પ્રિયંવદં બ્રાહ્મણદેવભક્તં
મનસ્વિનં કીર્તિકર સદૈવ ॥ ૩૮॥

તૃતીયગઃ સોમસુતઃ પ્રસિદ્ધં
નરં પ્રસૂતે પ્રણતં વિનીતમ્ ।
પ્રભૂતમિત્રં પ્રમદાન્વભીષ્ટં
માયાપ્રપંચૈઃ રહિતં નિરીહમ્ ॥ ૩૯॥

બુધો વિધત્તે બહુબુદ્ધિયુક્તં
પાતાલગઃ પુષ્ટશરીરિણં ચ ।
કૃષિપ્રિયાલાભસુખં ..........
વ્યાધિપ્રમુક્તં પરમર્દનં ચ ॥ ૪૦॥

સ્વલ્પાત્મજં સંજનયે
સુતસ્થિતઃ સોમસુતોऽલ્પવીર્યમ્ ।
કીનાશમર્ત્યં બહુપાપસક્તં
ક્ષુધાલિમિષ્ટૈઃ પરિવર્જિતં ચ ॥ ૪૧॥

રિપુસ્થિતો ભૂરિરિપું પ્રસૂતે
બુદ્ધાં વિરુદ્ધં કલહપ્રયુક્તમ્ ।

પ્રિયામિષં બ્રાહ્મણભક્તિહીનં
સદાતુરં કામનિપીડિતં ચ ॥ ૪૨॥

કલત્રગઃ સોમસુતઃ સુસત્યં
નરં પ્રસૂતે લઘુભોગભાજમ્ ।
પતિવ્રતાકાન્તમભીષ્ટહીનં
પરોપકારં પ્રણતં સદૈવ ॥ ૪૩॥

રન્ધ્રાન્વિતો રન્ધ્રયુતં નિતાન્તં
બુધઃ પ્રસૂતે સરુજં મનુષ્યમ્ ।
કફાનિલાભ્યં પરિપીડિતાઙ્ગં
કૃશંવિવર્ણં કુલઘાતકં ચ ॥ ૪૪॥

ભાગ્યાશ્રિતઃ સત્યગુણૈઃ સમેતં
ચન્દ્રાત્મજઃ પ્રીતિકરં મનુષ્યમ્ ।
જિતેન્દ્રિયં સાધુજનાનુરક્તં
કૃષિપ્રધાનં ચ પ્રગલ્ભમેવ ॥ ૪૫॥

નભસ્તલસ્થઃ કુરુતેઽથ ચન્દ્રઃ
સુરૂપદેહં સુભગં સુશીલમ્ ।
શય્યાસનાછાદનવાહનાઢ્યં
સ્ત્રીણામભીષ્ટં સુનયાન્વિતં ચ ॥ ૪૬॥

આયસ્થિતઃ સંજનયેનમનુષ્યં
બુધો વિવેકાઢ્યમતીવકાન્તમ્ ।
રોગપ્રમુક્તં પ્રથિતાભિમાનં
નૃપક્રિયાકૃત્યવિચક્ષણં ચ ॥ ૪૭॥

વ્યયાશ્રિતો ભૂરિદરિદ્રભાજં
બુધઃ પ્રસૂતે વિષયપ્રસક્તમ્ ।
પરાભિભૂતં નિજબન્ધુવર્ગૈઃ
કુરૂપદેહં કુધિયા યુતં ચ ॥ ૪૮॥

જીવઃ પ્રસૂતે તનુગઃ સુકાન્તં
સૌભાગ્યોપચિતં દયાલુમ્ ।
પ્રસિદ્ધિયુક્તં હતશત્રુપક્ષં
સુકીર્તિકર્તારમતીવ હૃષ્ટમ્ ॥ ૪૯॥

કોશાશ્રિતઃ સ્યાત્ સુરરાજમન્ત્રી
સુવિત્તદાતા ચ સુખપ્રદશ્ચ ।
નાશાય પાપસ્ય ચ શત્રુરાશેઃ
પરોપજાતસ્ય ચ દૂષણાય ॥ ૫૦॥

તૃતીયગો દેવપતિપ્રપૂજ્યો
મેધાન્વિતં સંજનયેત્ સુવિશ્રમ્ ।
કુલપ્રધાનં પ્રમદાનુમાન્યં
પ્રસિદ્ધમુર્વિતલમણ્ડનં ચ ॥ ૫૧॥

સુખાશ્રિતઃ સંજનયેત્ સુસૌ..........ં
દેવેશમન્ત્રી નૃપતેરભીષ્ટમ્ ।
પ્રિયાતિથિં બાન્ધવલોકમાન્યં
પ્રભૂતયાનાસનભોજનં ચ ॥ ૫૨॥

.......... સુરરાજમન્ત્રી
સુતસ્થિતઃ સંજનયેન્મનુષ્યમ્ ।
પ્રખ્યાતિયુક્તં પ્રભયા સમેતં
પ્રિયંવદં બ્રાહ્મણસંમતં ચ ॥ ૫૩॥

ષષ્ઠાશ્રિતો ભૂરિરિપુપ્રયુક્તં
કરોતિ મર્ત્યં બહુરોગયુક્તમ્ ।
વિદેશસેવાનિરતં કૃતઘ્નં
સદૈવ સૂતે જડતાસમેતમ્ ॥ ૫૪॥

સુરૂપદારં સુમતિં સુશીલં
કામાશ્રિતો દેવગુરુઃ પ્રસૂતે ।
પ્રખ્યાતકીર્તિં વૃજિનેન હીનં
સત્યાશ્રિતં દેવગુરુપ્રભક્તમ્ ॥ ૫૫॥

મૃત્યુસ્થિતો દેવગુરુઃ પ્રસૂતે
ખલં  સુબુદ્ધા રહિતં મનુષ્યમ્ ।
વિદ્યાવિવેકાગમદ્ભષકં ચ
પ્રભાવિહીનં પરવંચનોક્તમ્ ॥ ૫૬॥

ધર્માશ્રિતો દેવગુરુઃ સુવાતે

ધર્મમિણં સત્યદયાસમેતમ્ ।
નાનાધણૈઃ સંયુતમિષ્ટબન્ધું
પ્રતાપીનં સાધુજનપ્રસક્તમ્ ॥ ૫૭॥

કર્માશ્રિતો દેવગુરુઃ પ્રસૂતે
સુકર્મભાજં જનતાપ્રધાનમ્ ।
નરેન્દ્રમાન્યં પ્રભુતાસમેતં
દેવદ્વિજાનાં નિરતં નિરીહમ્ ॥ ૫૮॥

લાભાશ્રિતો લાભપરં પ્રસક્તં
સદૈવ સૂતો સુરરાનમન્ત્રી ।
પ્રભૂતયાનાસનવિત્તશંસા-
સુપૂર્ણહર્મ્યં પ્રમદાપ્રિયં ચ ॥ ૫૯॥

ગુરુઃ પ્રસૂતે વ્યયગો મનુષ્યં
વિદ્વેશશીલં પરવિત્તલુબ્ધમ્ ।
ઇર્ષ્યાધિકંપાપજનાનુરક્તં
કૃશં કૃતઘ્નં પરવંચકં ચ ॥ ૬૦॥

શુક્રસ્તનુસ્થઃ સુતનુ પ્રસૂતે
શાસ્ત્રાનુરક્તં પ્રચિતપ્રભાવમ્ ।
પ્રિયંવદં સર્વકલાસુ ..........
ક્ષતારિપક્ષં વિનયાન્વિતં ચ ॥ ૬૧॥

દ્વિતીયગો ભાર્ગવ એવ ધત્તે
ધનં વિચિત્રં સુજનનાનુરાગમ્ ।
સર્વણમુક્તામણિવસ્ત્રલાભં
વિમુક્તરોગં હતપાપચેષ્ટમ્ ॥ ૬૨॥

શુક્રમ્તૃતીયઃ પ્રણતારિપક્ષં
નરં પ્રસૂતે સુસુતં સુદાન્તમ્ ।
તેજવિનં ભૂરિદયાસમેતં
સુરૂપગાત્રં વિનયાન્વિતં ચ ॥ ૬૩॥

સુખાશ્રિતો ભાર્ગવનન્દનશ્ચ
સુખાનિ સર્વાણિ કરોતિ નિત્યમ્ ।
રોગક્ષયં સાધુજનેન સુખ્ય

સદાનુરક્તં ગુરુદેવતાનામ્ ॥ ૬૪॥

કરોતિ શુક્રઃ ખલુ પંચમસ્થઃ
સુતાન્ વિચિત્રાન્ પ્રચુરપ્રધાનમ્ ।
વચાતિમુખ્યાન્ ન ચ સર્વકાલં
પ્રભૂતમગ્ન્યાન્ પ્રચુરપ્રભાવાન્ ॥ ૬૫॥

ષષ્ઠો ભૃગુઃ સંજનયેત્ કુરૂપં
પ્રજ્ઞાવિહીનં જહતાપ્રધાનમ્ ।
સ્વલ્પાયુષં સ્વલ્પધિયા સમેતં
સત્યક્તશૌચં નિજભૃત્યયુક્તમ્ ॥ ૬૬॥

કામાશ્રિતઃ સંજનયેત્ પ્રસીદ્ધં
શુક્રઃ સુમૂર્તિં સુકલત્રભાજમ્ ।
સત્યાધિકં ભૂરિદયાસમેતં
પ્રશંસિતં સાધુજનૈઃ સદૈવ ॥ ૬૭॥

શુક્રોઽષ્ટમસ્થઃ કુરુતેઽલ્પસત્યં
વિદેશરક્તં વ્યસનાભિભૂતમ્ ।
સ્વલ્પાયુષં બન્ધુજનૈર્વિમુક્તં
સદારિયુક્તં ગુરુદેવકૃત્યમ્ ॥ ૬૮॥

ભાગ્યસ્થિતઃ સંજનયેન્મનુષ્યં
ભાગ્યૈઃ સમેતં વિવિધૈઃ સદૈવ ।
પ્રભૂતલાભં પ્રચુરાભિમાનં
પ્રસિદ્ધિયુક્તં પ્રણતારિપક્ષમ્ ॥ ૬૯॥

શુક્રઃ પ્રસૂતે ખલુ કર્મસંસ્થઃ
સુકર્મભાજં સુધનં મનુષ્યમ્ ।
સુશીલમાઢ્યં સુસુતં સુતાતં
સદૈવ સિદ્ધાન્વિતમિષ્ટધર્મમ્ ॥ ૭૦॥

આયસ્થિતો દૈત્યગુરુઃ પ્રસૂતે
પ્રભૂતમાયુષ્યમુદારચેષ્ટમ્ ।
કન્યાપ્રજં પાર્થિવમાનયુક્તં
ભુપ્રસિદ્ધં પ્રભુતાસમેતમ્ ॥ ૭૧॥

કરોતિ શુક્રો વ્યયગે મનુષ્યં
વ્યયાધિકં વીર્યવિહીનચેષ્ટમ્ ।
કન્યાપ્રજં વિત્તવિહીનમુગ્રં
વિવર્જિત શીલતનયા ચ નિત્યમ્ ॥ ૭૨॥

મન્દતનુસ્થઃ કુરુતે સુમન્દં
નીચાશ્રયં પાપકથાનુરક્તમ્ ।
રૌદ્રાકૃતિં રોગનિપીડિતાઙ્ગં
વિહીનસત્યં કુમતિં સદૈવ ॥ ૭૩॥

ધનસ્થિતઃ સૂર્યસુતઃ પ્રસૂતે
ધનૈર્વિહીનં બહુશત્રુભાજમ્ ।
નાનાપ્રકારૈર્વ્યસનૈઃ સમેતં
કૃશં વિવર્ણં ગતિવર્જિતં ચ ॥ ૭૪॥

દીર્ઘાયુષં સર્વકલાસ દક્ષં
પ્રસન્નચિન્ત .......... ।
સૌરસ્તૃતીયઃ કુરુતે સુકર્યં
વિત્તાન્વિતો ..........વિવર્જિતં ચ ॥ ૭૫॥

ચતુર્થગઃ સંજનયેન્મનુષ્યં
શનૈશ્ચરઃ સૌખ્યવિવર્જિતાઙ્ગમ્ ।
વિદેશવાસં ચ પરાભિભૂતં
સુદીનવૃત્તિં નિજબન્ધુહીનમ્ ॥ ૭૬॥

કરોતિ સૌરઃ ખલુ પંચમસ્થઃ
કુમિત્રભાજં ચ કુમિત્રયુક્તમ્ ।
વિહીનકોશં વિગતપ્રતાપં
વિવર્જિતં સર્વસુખેન નિત્યમ્ ॥ ૭૭॥

સૌરો રિપુસ્થો વિગતારિપક્ષં
કરોતિ મર્ત્યં નૃપતેરભીષ્ટમ્ ।
સદ્ભોજનાછાદનયાનયુક્ત
સ્વધર્મરક્તં સુધિયા સમેતમ્ ॥ ૭૮॥

કલત્રગઃ સૂર્યસુતો વિધત્તે
કુદારરક્તં કુધિયા સમેતમ્ ।

પાપાનુરક્તં વિનયેન હીનં
કુસઙ્ગતિં શાસ્ત્રવિવર્જિતં ચ ॥ ૭૯॥

મન્દોઽષ્ટમસ્થો બહુમત્તયુક્તં
સદા પ્રસૂતે વિગતપ્રભાવમ્ ।
રક્તપ્રકોપપેન નિપીડિતાઙ્ગં
ધિયા વિહીનં પરતર્કકં ચ ॥ ૮૦॥

ધર્માશ્રિતઃ સંજનયેત્ સદાર્કિઃ
સત્યક્તધર્મં જનતાવિરુધમ્ ।
ઇર્ષ્યાધિકં વિત્તધિયા વિહીનં
પ્રભૂતકોપં સુખવર્જિતાઙ્ગમ્ ॥ ૮૧॥

શનૈશ્ચરઃ કર્મગતઃ પ્રસૂતે
સુકર્મભાજં સુકલત્રયુક્તમ્ ।
સ્થિરસ્વભાવં સુનયપ્રધાનં
નરેન્દ્રપૂજ્યં પ્રચુરપ્રતાપમ્ ॥ ૮૨॥

શનૈશ્ચરો લાભગતઃ પ્રસૂતે
વિચિત્રલાભૈઃ સહિતં નિરીહમ્ ।
શાસ્ત્રાનુરક્તં વિજિતારિપક્ષં
પ્રશાંસિતં સાધુજનૈઃ સદૈવ ॥ ૮૩॥

કરોતિ સૌરિ વ્યયગો વિકોશ-
મસદ્વ્યયં પાપરતં કુમિત્રમ્ ।
સદૈવ દીનં પરપીડિતાઙ્ગં
સાધુપ્રચારૈઃ સકલૈર્વિહીનમ્ ॥ ૮૪॥

ઇતિ શ્રીવૃદ્ધયવને ગ્રહાણાં ભાવાધ્યાયઃ ॥

---

આધ્યાય ૧૭

સૂર્યચારાધ્યાયઃ

મેષં ગતોઽર્કઃ સમરપ્રચણ્ડં
નરં પ્રસૂતે ધનવીર્યયુક્તમ્ ।
શાસ્ત્રાર્ધવાક્કર્મસુ લબ્ધશબ્દં
જયૈષિણં સાધિતમુચ્છચેષ્ટમ્ ॥ ૧॥

વૃષં ગતોઽર્કઃ પ્રિયગન્ધમાલ્યં
મિષ્ટાશનાહ્લાદનલબ્ધસૌખ્યમ્ ।
સઙ્ગિતવિદ્યાભિરતં રતિજ્ઞં
નરં સુવાતે બહુમિત્રયુક્તમ્ ॥ ૨॥

બન્ધુપ્રિયં સાહસકર્મશિલં
મુખાક્ષિરોગોપહતં સપાપમ્ ।
તિષ્ઠન્ તૃતીયે દિનકૃત્ પ્રસૂતે
નરં શુભાચારગુણૈઃ સમેતમ્ ॥ ૩॥

મેધાવિનં વાહ્મધુરે વિનીતં
નૈપુણ્યવાક્સત્યગુણૈરુપેતમ્ ।
તિષ્ઠન્ રવિઃ કર્કટકે મનુષ્યં
કરોતિ નાનાવિધસૌખ્યભાજમ્ ॥ ૪॥

સિંહે તુ સૂર્યો જનયત્યરિઘ્નં
નરં ભૃશક્રોધસુદારચેષ્ટમ્ ।
સત્યાધિકં શૌર્યવિલબ્ધકીર્તિ-
મુત્સાહયુક્તં સતતં બલાઢ્યમ્ ॥ ૫॥

કન્યાશ્રિતો દુર્બલમલ્પસત્યં
રવિઃ પ્રસૂતે મૃદુદીનસત્ત્વમ્ ।
સ્ત્રીતુલ્યવીર્યં કૃપણસ્વભાવં
નિન્દાનુરક્તં સતતં ગુરૂણામ્ ॥ ૬॥

ભૃત્યક્ષયાર્તિં વ્યયશોકતપ્તં
પ્રકૃષ્ટનીચોપહતં પ્રતીષ્ટમ્ ।
તુલાધરસ્થો દિનકૃન્મનુષ્યં
કરોતિ નીચં વ્યસનાભિભૂતમ્ ॥ ૭॥

નિત્યં પ્રસૂતે મૃતિધર્મશિલં
સૂર્યોઽષ્તમસ્થો વનિતાસ્વભીષ્ટમ્ ।
નાનાર્થયુક્તં સુભગં મનુષ્યં
નૃપપ્રસાદપ્તસુખં જિતારિમ્ ॥ ૮॥

ધનુર્ધરસ્થો જનયેન્મુષ્યં

સૂર્યો નરેન્દ્રાભિમતં મહાન્તમ્ ।
શસ્ત્રાર્થશિક્ષાનિપુણં નિઘૃષ્ટં
પ્રાજ્ઞં સુનીતિવ્યનહારદક્ષમ્ ॥ ૯॥

મૃગાભિધાને સવિતા નિવિષ્ટો
વિપન્નશીલં જનયેન્મનુષ્યમ્ ।
અનીષ્ટકાર્યેષુ સદાનુરક્તં
મનોજ્ઞવિદ્વેષિણમલ્પસત્ત્વમ્ ॥ ૧૦॥

તિષ્ઠન્ રવિઃ કુમ્ભધરે પ્રસૂતે
નરં દૃઢદ્વેષવિરોધરોધમ્ ।
અનિશ્ચિતં કર્મસુ દુઃપ્રલાપં
વ્યયાન્વિતં પાપપરં કૃતઘ્નમ્ ॥ ૧૧॥

મીનાભિધાને સવિતા સુપુણ્યં
કર્યાન્મનુષ્યં હતશત્રુપક્ષમ્ ।
સુહૃદ્ગુરુપ્રીતિકરં સુવાક્યં
પ્રસન્નશીલં બહુધર્મવિત્તમ્ ॥ ૧૨॥

હોરં ગતોઽર્કઃ પ્રકરોતિ તીક્ષ્ણં
સ્વપિત્તરોગં સ્વજનાપમાનમ્ ।
ઇષ્ટૈર્વિયોગં કલહં ચ દુઃખં
ધનક્ષયં વૈરવશં પ્રસૂતમ્ ॥ ૧૩॥

હોરાં ગતો રાત્રિપતેર્દિનેશો
નરં વિધત્તે સતતં સુશીલમ્ ।
રોગૈર્વિમુક્તં વિગતારિપક્ષં
પ્રિયાતિથિં બન્ધુજનપ્રધાનમ્ ॥ ૧૪॥

રોગાભિભૂતં સવિતા કરોતિ
નરં ત્રિભાગે પ્રચુરં સ્વકીયે ।
હદ્વિગ્નચિન્તં પરદેશભાજં
ગતપ્રતાપં પ્રબલં નિતાર્ત્તમ્ ॥ ૧૫॥

ત્ર્યંશે નિધોર્વાસરપઃ પ્રસૂતે
ધર્મિષ્ઠમિષ્ટં સ્વજનૈર્વિપાપમ્ ।
ગીતપ્રિયં વાગ્મિનમૃદ્ધદારં

પ્રભૂતકોશં દયિતં નરાણામ્ ॥ ૧૬॥

દૃકાણગોઽર્કો ધરણીસુતસ્ય
યદા પ્રયાતઃ પ્રકરોત્યચારીન્ ।
અસૃગ્વ્યથાનીચસમાગમં ચ
પુત્રાર્થહાનિં સતતં નરાણામ્ ॥ ૧૭॥

ત્ર્યંશં ગતઃ સોમસુતસ્ય ભાનુઃ
સ્વધર્મશિલં પ્રકરોતિ મર્ત્યમ્ ।
બિલાસિનીકામપરં સદૈવ
વિચિત્રવાક્યં દ્વિજદેવભક્તમ્ ॥ ૧૮॥

બૃહસ્પતેસ્ત્ર્યંશભનુપ્રયાતો
ભાનુર્વિધત્તે મનુજં વિહીનમ્ ।
પ્રિયાતિથિં સર્વગુણૈઃ સમેતં
મેધાવિનં વાક્યવિશારદં ચ ॥ ૧૯॥

ત્ર્યંશસ્થિતો દૈત્યપુરોહિતસ્ય
ભાનુર્વિધત્તે સુખિનં મનુષ્યમ્ ।
સ્ત્રીવલ્લભં દેવગુરુપ્રસક્ત-
મારોગ્યદેહં બહુસત્યયુક્તમ્ ॥ ૨૦॥

દૃકાણમર્કઃ પ્રગતોઽર્કજસ્ય
પાપં પ્રસૂતે સરુજં કૃતઘ્નમ્ ।
નરં સુતાપવ્યસનોપતપ્તં
સુશીલિનં બન્ધુજનૈર્વિમુક્તમ્ ॥ ૨૧॥

નવામ્શકે સ્વે સવિતા પ્રસૂતે
નરં પરાભૂતમનાસૌખ્યમ્ ।
કલિપ્રિયં બહ્વૃણમધ્વશીલં
ગતપ્રભાવં બહુરોગાજમ્ ॥ ૨૨॥

નવાંશકે રાત્રિપતેર્વિવસ્વાં
કરોતિ મર્ત્યં સ્થિત એવ દક્ષમ્ ।
સુતાન્વિતં શાનયશોધનાઢ્યં
નૃપપ્રિયં મુખ્યતમં સ્વપક્ષે ॥ ૨૩॥

કુજસ્ય ભાનુર્નવભાગસંસ્થો
દરિદ્રરોગાભિહતં પ્રસૂતે ।
નિરાકૃતં દીનસુહૃપ્રકોપં
પાપાનુરક્તં ક્ષતજાતિર્ભાજમ્ ॥ ૨૪॥

તિષ્ઠન્ રવિઃ સોમસુતસ્ય ભાંશે
..........આકે વાતભયં કરોતિ ।
જિતારિપક્ષં સુતયાનુરક્ત
નરં સદા ભોગસુખૈઃ સમેતમ્ ॥ ૨૫॥

નવાંશકે દેવપુરોહિતસ્ય
તિષ્ઠન્ રવિઃ સત્યધનં પ્રસૂતે ।
તપોનુરક્તં કૃતિનામભિષ્ટં
જિન્તેન્દ્રિયં સર્વસુખાધિવાસમ્ ॥ ૨૬॥

ઇજ્યાન્વિતં બન્ધજનપ્રધાનં
વિવેકિનં ધર્મપરં જિતારિમ્ ।
નવાંશકે દૈત્યપુરોહિતસ્ય
નરં પ્રસૂતે સવિતા પ્રગલ્ભમ્ ॥ ૨૭॥

પરાજિતં નિર્ધનસત્યવીર્યં
કામાન્વિતં બન્ધુજનૈર્વિમુક્તમ્ ।
શનેર્નવંશે સવિતા પ્રસૂતે
નરં ખલં દુર્ગતિરોગભાજમ્ ॥ ૨૮॥

સૂર્યાંશકે સ્વે સવિતા પ્રસૂતે
નરં સુતીક્ષ્ણં પરિભીતચિન્તમ્ ।
પ્રભૂતસેવં ગતવીર્યર્પં
પરૈઃ સુદક્ષં મતિભૃદ્વિહીનમ્ ॥ ૨૯॥

સૂર્યાંશકે રાત્રિપતેર્વિવસ્વાન્
કરોતિ સૌમ્યં શુભક્રમદક્ષમ્ ।
વિક્ષાવિનીતં સતતં સુખાઢ્યં
પ્રસન્નચિન્ત વિભવૈઃ સમેતમ્ ॥ ૩૦॥

પ્રિયૈર્વિમુક્તં વધબન્ધયુક્તં
પાપનુરક્તં પુરુષં પ્રસૂતે ।

સૂર્યાંશકે ભૂતનયસ્ય ભાનુ-
ર્વિહીનસત્યં પરતર્કકં ચ ॥ ૩૧॥

સત્યાધિકં સર્વસુખૈઃ સમેતં
પ્રિયાતિથિં બ્રાહ્મણસંમતં ચ ।
સૂર્યાંશકે સોમસુતસ્ય ભાનુ-
સ્તિષ્ઠન્ પ્રસૂતે મનુજં સનાથમ્ ॥ ૩૨॥

સ્ત્રીવલ્લભઃ ગીતકલાસુ દક્ષં
ભોગાન્વિતં વસ્ત્રવિલેપનાઢ્યમ્ ।
સૂર્યાંશકે દેવગુરોર્વિનસ્વાન્
કરોતિ સત્યં વિનયપ્રધાનમ્ ॥ ૩૩॥

સુશિલ્પિનં ધર્મરતં સુદાન્તં
પ્રિયાતિથિં સર્વસંહ સુપુત્રમ્ ।
સૂર્યાંશકે દૈત્યગુરોઃ સુવાતે
ભાનુર્નરં પાર્થિવમાનયુક્તમ્ ॥ ૩૪॥

ક્લીબં કૃશં પાપરતં કૃતઘ્નં
શ્રિયાં વિહીનં સતતં કુચૈલમ્ ।
કરોતિ ભાનુર્બહુદુઃખયુક્તં
સૂર્યાંશકસ્યસ્તુ શનૈશ્ચરસ્ય ॥ ૩૫॥

ત્ર્યંશલ્લવસ્થો ધરણિસુતસ્ય
ભાનુર્વિધત્તેઽધમલ્પપુણ્યમ્ ।
વિત્તાધિવાસે ભૃતકં કુશીલં
રોગાધિકં સહ્યજનૈઃ સમેતમ્ ॥ ૩૬॥

ત્ર્યંશલ્લવે સૂર્યસુતસ્ય ભાનુ-
ર્નરં વિધત્તે વૃજિનાનુરક્તમ્ ।
વિહીનવિત્તં પરુષં કૃતઘ્નં
વિદેશશીલં ગતસૌહૃદં ચ ॥ ૩૭॥

ત્ર્યંશલ્લવે દેવપુરોહિતસ્ય
કરોતિ ભાનુઃ પ્રણયપ્રધાનમ્ ।
યશસ્કરં શૌર્યગુણૈઃ સમેતં
મહાધનં શાસ્ત્રરતં મનુષ્યમ્ ॥ ૩૮॥

હિરણ્યમુક્તામણિવસ્ત્રભાજં
સ્ત્રીણામભીષ્ટં સુરભક્તિયુક્તમ્ ।
ત્ર્યંશલ્લવસ્થઃ શશિજસ્ય્ ભાનુઃ
કરોતિ મર્ત્યં વિગતારિપક્ષમ્ ॥ ૩૯ ॥

ત્ર્યંશલ્લવે દૈત્યપુરોહિતસ્ય
કરોતિ સૂર્યં સુભગં મનુષ્યમ્ ।
નાનાર્થયુક્તં વરવાજિભાજં
નિરોગકાયં વ્રતિનામભીષ્ટમ્ ॥ ૪૦ ॥

કરોતી ભનુઃ સુહૃદસ્ય વીર્યત્
પ્રભૂતમિત્રં વિજિતારિપક્ષમ્ ।
સ્વબન્ધુપૂજ્યં ધનધાન્યયુક્તં
પુત્રાન્વિતં બ્રાહ્મનસંમેતં ચ ॥ ૪૧ ॥

ધીરં ગુરું સુપ્રજમપ્રભૃષ્યં
પ્રભૂતકોશં ગજવાજિપુષ્તમ્ ।
સ્વક્ષેત્રવીર્યઃ પ્રકરોતિ ભાનુ-
ર્નરં સદા સત્યગુણૈઃ સમેતમ્ ॥ ૪૨ ॥

સ્વતુઙ્ગવીર્યાત્ કુરુતે દિનેશો
નરં પ્રસિદં વિજિતારિપક્ષમ્ ।
પ્રિયાતિથિં પાર્થિવમાનયુક્તં
મહાધનં નીતિપરપ્રધાનમ્ ॥ ૪૩ ॥

નવાંશવીર્યપ્રબલો વિવસ્વાન્
નરં પ્રસૂતે સતતં મનોજ્ઞમ્ ।
વિચિત્રમાલ્યાભરણં સુખાઢ્યં
પ્રશન્તચિન્તં નિરુજં સુશીલમ્ ॥ ૪૪ ॥

શુભગ્રહાલોકનવીર્યયુક્તો
ભાનુઃ પ્રસૂતે નિરુજં મનુષ્યમ્ ।
સૌભાગ્યયુક્તં સુતલાભભાજં
નરેન્દ્રપૂજ્યં દ્વિજદેવભક્તમ્ ॥ ૪૫ ॥

પુંરશિતીર્થપ્રબલો વિવસ્વાન્

કરોતિ ભક્તં ગુરુસદ્વિજાનામ્ ।
નરં વિનીતં સુભગં મનુષ્યં
ધર્માન્વિતં પ્રીતિકરં શુશીલમ્ ॥ ૪૬॥

આશાબલાઢ્યઃ સવિતા પ્રસૂતે
નાનાર્થયુક્તં સતતં મનુષ્યમ્ ।
હસ્ત્યવમાલ્યમ્બરરત્નયુક્તં
યશોન્વિતં પાર્થિવમાનયુક્તમ્ ॥ ૪૭॥

ચેષ્ટાબલાઢ્યઃ પ્રકરોતિ ભાનુ-
ર્નરં સુચેષ્ટાનુગતિં ગતારિમ્ ।
પ્રભૂતમિત્રં ગતસવેદુઃખં
સુખાન્વિતં બાન્ધુસૌખ્યયુક્તમ્ ॥ ૪૮॥

કરોતિ ભાનુર્દિનવીર્યયુક્તો
નરં પ્રસિદ્ધં વિનયેન યુક્તમ્ ।
ધર્મનુરક્તં પ્રિય્વક્ગુવાક્યં
સદાનુકૂલં દાયેતં જનાનામ્ ॥ ૪૯॥

કરોતિ ભાનુઃ સ્વદીનસ્યઃ વીર્યાણ્
નરં પ્રગલ્ભં સુભગં સુકાન્તમ્ ।
પ્રભૂતવિત્તં પ્રિયમપ્રધૃષ્યં
વિદ્વેષણાં કીર્તિહરં નિતાન્તમ્ ॥ ૫૦॥

હોરાવતાઢ્યઃ પ્રકરોતિ ભાનુઃ
પ્રસિદ્ધેમત્યુન્નતવીર્યયુક્તમ્ ।
નરં નૃણામિષ્ટતમં સુવાક્યં
સ્તુત્યં સદા બન્દિજનસ્ય મર્ત્યમ્ ॥ ૫૧॥

દિનાહિપઃ પક્ષબલેન પુષ્ટઃ
પ્રભૂતપક્ષં પુરુષં પ્રધાનમ્ ।
સુચારુવાક્યં બહુકોશયુક્તં
વિક્ષાવિનીતં સુભગં મનોજ્ઞમ્ ॥ ૫૨॥

માસાબલાઢ્યઃ પ્રકરોતિ ભાનુ-
ર્નરં વિદગ્ધં ધનવાજિયુક્તમ્ ।
પ્રભૂતમિત્રં રણલબ્ધશબ્દ

મહાવિનિતં રતલાલસં ચ ॥ ૫૩ ॥

દિનાધિપો વર્ષબલેન યુક્તઃ
કરોતિ કૃત્યેષ શુભેશુ સક્તમ્ ।
નરં ગતારિં ગતદુઃખશોકં
નિત્યં સુપુષ્ટં દ્વિજદેવભક્તમ્ ॥ ૫૪ ॥

નિસ્ત્રિંશચેષ્ટં પિશુનવભાવં
પરાન્નરક્ત કટ્ઃઇનં દરિદ્રમ્ ।
ભાનુર્યદા મિત્રબલેન હીન-
સ્તદા નરં કામપરં પ્રસૂતે ॥ ૫૫ ॥

.......... ॥ ૫૬ ॥

.......... ॥ ૫૭ ॥

સૂર્યો નવાંશાન્મકવીર્યહીનઃ
કરોતિ મર્ત્યં પ્રિયવિગ્રહં ચ ।
વિષામિશસ્ત્રજ્વરપિત્તભાજં
પિતુર્નન્યા વિકૃતોપચારમ્ ॥ ૫૮ ॥

શુભગ્રહાલોકનવીર્યનઃ
કરોતિ ભાનુઃ સુકૃશં વિરૂપમ્ ।
હૃદ્રોગીણં બહ્વટનં ચ મૂર્ખં
કૃતાપરાધં સતતં સભીતમ્ ॥ ૫૯ ॥

ભાનુર્વિધત્તે નરવીર્યહીનઃ
શૌર્યેણ હીનં બહુભિઃ સમેતમ્ ।
પરાજિતં સર્વજનૈઃ પ્રહીન
સુતાર્થયાનૈર્ધનધાન્યવસ્ત્રૈઃ ॥ ૬૦ ॥

આશાબલપ્રોઝ્યત એવ સૂર્યઃ
સર્વાસુ દિક્ષ પ્રકરોતિ હાનિમ્ ।
મિથ્યાપ્રલપં વિદધાતિ બુદ્ધિ-
પરાઝ્મુખં સદ્વિજદેવભક્તમ્ ॥ ૬૧ ॥

ચેષ્ટાબલેન પ્રવિવર્જિતોઽર્કઃ
કરોતિ ચેષ્ટાં સતતં સુનિન્દ્યામ્ ।

નૃણાં તથા બુદ્ધિવિપર્યયં ચ
વિભૂષિતં સાધુજનેન વૈરમ્ ॥ ૬૨॥

દિવાબલેન પ્રવિવર્જિતોઽર્કઃ
કરોતિ મર્ત્યં મનુષ્યમ્ ।
હતપ્રતાપં સ્વજનૈર્વિહીનં
પરાઙ્ગનાસેવકભ્યુપેતમ્ ॥ ૬૩॥

સ્વવારવીર્યેણ વિવર્જિતોઽર્કઃ
કરોતિ મર્ત્યં સતતં કુચૈલમ્ ।
વિધર્મરક્તં બહુકૂટભાજં
સુહૃદ્ગુરૂણાં પ્રસભં સુદુષ્ટમ્ ॥ ૬૪॥

હોરબલેનૈવ વિવર્જિતોઽર્કઃ
કરોતિ મૂર્ખં પ્રણયેન હીનમ્ ।
વિદ્વેષિયુક્તં પરતર્કકં ચ
પ્રજ્ઞાવિહીનં પ્રખલં મનુષ્યમ્ ॥ ૬૫॥

દિનાધિપઃ પક્ષબલેન હીનઃ
કરોતિ મર્ત્યં સતતં સુદુઃખમ્ ।
સ્વપક્ષહીનં વિગતપ્રતાપં
માયાવિનં નિષ્ઠરવાક્યક્તમ્ ॥ ૬૬॥

સૂર્યો યદા માસબલેન હીન-
સ્તદા પ્રસૂતે વિકૃતં મનુષ્યમ્ ।
ધૂતક્રિયાનશિતભૂરિવિત્તં
વેશ્યાનુરક્તં સુજનેન હીનમ્ ॥ ૬૭॥

બહ્વાશિનં વ્યાધિભિરર્દિતાઙ્ગં
ચૌરાવનીશૈઃ પરિભૂતમેવ ।
દિનાધિપો વર્ષબલેન હીનો
દારિદ્યયુક્તં કુરુતે મનુષ્યમ્ ॥ ૬૮॥

ઇતિ શ્રીવૃધ્દ્યવને સૂર્યચારઃ ॥

ચન્દ્રચારાધ્યાયઃ

મેષે તુ ચન્દ્રઃ પુરુષં પ્રસૂતે
શુરં મુદાસત્ત્વબલૈરુપેતમ્ ।
ખ્યાતં બહુસ્ત્રીયુતભૃત્યવર્ગં
પ્રભાવિણં ત્યાગિનમૂર્જિતં ચ ॥ ૧॥

વૃષે શશિ ગર્વિતમિષ્ટદારં
સ્મિતાલ્પભાષં સુભગં પ્રસૂતે ।
નિજસ્વિનં બહ્વશિનં સુખેષં
મહાજનદ્રવ્યપરિગ્રહં ચ ॥ ૨॥

ચન્દ્રસ્તૃતીયે મધુરાભિધાનં
કાર્યાભિચારં નિપુણં પ્રસૂતે ।
..........
.......... ॥ ૩॥

તિષ્ઠન્ શશી કર્કિણિ કાર્યધીરં
સુમેધસં વાગ્વિશદં પ્રસૂતે ।
પ્રિયપ્રદાનં પ્રિયદર્શનં ચ
પ્રાજ્ઞં બહુશ્વાન્વિકીર્ણબુદ્ધિમ્ ॥ ૪॥

સિંહે શશી સત્ત્વબલોપપન્નં
નરં પ્રસૂતે નરબ્ધમાનમ્ ।
સિંહાનનાસ્યં પૃથુપીનકાયં
માંસ..........ઇયં દુઃપ્રસહં ક્ષુધાલુમ્ ॥ ૫॥

કન્યાં સમાશ્રિત્ય શશી પ્રસૂતે
નરં સુવાક્યં મધુરં વિનીતમ્ ।
સ્ત્રીલાલલિતૈઃ સુકુમારમૂર્તિ
સુમેધસં સાધનાભિરામમ્ ॥ ૬॥

તુલાધસ્થો જનયત્યુદાર
નરં શશી વાગ્મતીસત્ત્વયુક્તમ્ ।
મનસ્વિનં સાત્ત્વિકમન્ત્રેઅશીલં
શુચિં વિનીતં સુભગં સુરૂપમ્ ॥ ૭॥

નિશકરો વૃશ્ચિકગઃ સમૃદ્ધં

શૂરં નરં સાહસિકં પ્રસૂતે ।
ખ્યાતં સતામીશ્વરલબ્ધમાનં
ક્રૂરં પરાઘાતરુચિં પ્રચણ્ડમ્ ॥ ૮॥

ધનુર્ધરસ્થો નૃપલબ્ધમાનં
ચન્દ્રઃ પ્રસૂતે નરમુચ્છવૃત્તિમ્ ।
શૂરં શુચિં સત્યપરં વિનીતં
શ્રીમન્તમાઢ્યં ગુરુદેવભક્તમ્ ॥ ૯॥

તિષ્ઠન્ પ્રસૂતે મકરે શશાઙ્કો
નરં વનારણ્યજલાભિરામમ્ ।
સઙ્ગીતહાસ્યભીરતં સુવેષં
ખ્યાતં પરસ્ત્રીરતિલોલુપં ચ ॥ ૧૦॥

કુમ્ભે શશી રોષિણમલ્પસૌખ્યં
સૂતે કૃશં દુર્ભરમલ્પવિત્તમ્ ।
બહુક્રિયારમ્ભમજાતમિષ્ટં
પ્રદ્વિષ્ટબન્ધું ગુરુવંચકં ચ ॥ ૧૧॥

મીનદ્વયે પ્રત્યધીનમ્ સુસત્યં
પાણ્ડિત્યસામર્થ્યવરાર્થયુક્તમ્ ।
હ્રીદાનદાક્ષિણ્યપરં વિનીતં
નરં શશી વાહ્મધુરં પ્રસૂતે ॥ ૧૨॥

હોરાં ગતોઽર્કસ્ય કરોતિ ચન્દ્રો
નરં સકામં  વનિતાજિતં ચ ।
દોષાત્મકં બન્ધુજનૈર્વિમુક્તં
સવ્યાધિદેહં રિપુવર્ગગમ્યમ્ ॥ ૧૩॥

હોરાં ગતો રાત્રિપતિર્યદા સ્વાં
તદા નરં શીલતરં કરોતિ ।
સ્વધર્મરક્તં નૃપમાનયુક્ત
કૃતશમુત્સાહિનમપ્રહૃષ્યમ્ ॥ ૧૪॥

ત્ર્યંશે શશી વાસરપસ્ય નિત્યં
કરોતિ પાપં બહુશત્રુયુક્તમ્ ।
અલ્પર્થસત્ત્વં વિગુણં હૃતસ્વં

દૌર્ભાગ્યદેહં પરદારલુબ્ધમ્ ॥ ૧૫॥

કરોતિ વિશં બહુમિત્રવિન્તં
પુત્રાન્વિતં બન્ધુજનૈઃ સમેતમ્ ।
ત્ર્યાંશે સ્વકીયે સુખિનમ્ સુકાન્તં
નિશાહિપો મર્ત્યમલંધિતાશમ્ ॥ ૧૬॥

ત્ર્યંશે શશાઙ્કો વિચરન્ કુજસ્ય
નરં પ્રસૂતે વિગતપ્રતાપમ્ ।
હીનક્રિયં દુઃખશતિરુપેતં
પરાર્થલુબ્ધં ગતસૌહૃદં ચ ॥ ૧૭॥

દ્રેષ્કાણમાપ્તઃ પ્રકરોતિ ચન્દ્રઃ
સૌમ્યસ્ય સૌમ્યં સુભગં મનુષ્યમ્ ।
મેધાવિનં સર્વગુણૈઃ સમેતં
વિધાવિનં સર્વકલાસુ દક્ષમ્ ॥ ૧૮॥

ત્ર્યંશે ગુરો રાત્રિપતિઃ પ્રસૂતે
શાસ્ત્રાનુરક્તં મનુજં સુશીલમ્ ।
નાનાસુહૃત્સંસ્તુતમલ્પકોપં
પ્રિયાતિથિં દેવગુરુપ્રભક્તમ્ ॥ ૧૯॥

સિતસ્ય ચન્દ્રો વિચરન્ ત્રિભાગે
કરોતિ મર્ત્યં વરયાનયુક્તમ્ ।
સ્ત્રીવલ્લભં સત્યમુદારચેષ્ટં
કુલાધિકં પૂજ્યતમમ્ નૃપાણામ્ ॥ ૨૦॥

શનેર્યદા ત્ર્યંશમુપ્રયાત-
શ્ચન્દ્રસ્તદા રોગિપમેવ ધત્તે ।
દીનં દરિદ્રં વિકૃતં સપાપં
મહાપદં નિષ્ઠુરમવ મર્ત્યમ્ ॥ ૨૧॥

નવાંશકે રાત્રિપતિર્યદા સ્યાત્
સૂર્યસ્ય દુષ્ટં મનુજં પ્રસૂતે ।
સ્ત્રીચંચિન્તં પાપમતિં સદૈવ
પ્રણષ્ટવૃદ્ધિં વિજિતં પરૈશ્ચ ॥ ૨૨॥

નવામ્શકે સ્વે પ્રકરોતિ ચન્દ્રો
નરં સુરૂપં સુભગં સુશીલમ્ ।
સ્ત્રીસંમતં સર્વગુણૈઃ સમેતં
વિધાવિનીતં જનવલ્લભં ચ ॥ ૨૩॥

નવાંશકે ભૂમિસુતસ્ય ચન્દ્ર-
સ્ત્વસૃગ્રુગાર્તં પ્રકરોતિ મર્ત્યમ્ ।
ક્લીતં કૃશં વ્યાધિતમલ્પસત્ત્વં
શ્રીદુર્ભગં કામપરં સદૈવ ॥ ૨૪॥

સૌમ્યય ભાગે નવમે શશાઙ્કઃ
કરોતિ સૌમ્યં સતતં સુખાઢ્યમ્ ।
નિત્યં સુહૃદેવગુરુપ્રસક્તં ..........
મહાધનં મણ્ડિતમપ્રમેયમ્ ॥ ૨૫॥

ગુરોનવાંશ વિચરન્ શશાઙ્કો
નરં પ્રસૂતે બહુવિત્તયુક્તમ્ ।
પુત્રાન્વિતં પુણ્યધનિરુપેતં
પ્રિયાત્થિં સર્વજનાભિરામમ્ ॥ ૨૬॥

કરોતિ મર્ત્યં નયસત્યસારં
વિધાનિનીતં સુહૃદાં વરિષ્ઠમ્ ।
દ્વિજપ્રિયં રોગભયવ્યોપેતં
શુક્રસ્ય ભાગે નવમે શશાઙ્કઃ ॥ ૨૭॥

ચન્દ્રઃ શનેર્ભાગમનુપ્રયાતો
નવાખ્યમ્ત્યન્તદુરુક્તવાચમ્ ।
નરં પ્રસૂતે વિકૃતસ્વભાવં
પરાર્થલુબ્ધં વ્યસનૈઃ સમેતમ્ ॥ ૨૮॥

સૂર્યાંશકેઽર્કસ્ય નિશાધિનાથો
..........નકં ઉઃખયુતં મ્રુષ્યમ્ ।
પ્રમાદિનં મિત્રજનૈર્વિહીનં
સુદીર્ઘસૂત્રં સતતં કૃતઘ્નમ્ ॥ ૨૯॥

સૂર્યાંશકે સ્વે પ્રકરોતિ ચન્દ્રો
ધનાન્વિતં વાહ્મિનમલ્પશત્રુમ્ ।

નરં નિતાન્તં શુભપુત્રયુક્તં
સુવાહનાઢ્યં પરપક્ષહીનમ્ ॥ ૩૦॥

સૂર્યાંશકે ભૂમિસુતસ્ય ચન્દ્રઃ
કરોતિ નિત્યં બહુસૌખ્યયુક્તમ્ ।
વિચક્ષણં ભોગયુતં સુવેષં
સુધર્મશીલં સતતં સુશીલમ્ ॥ ૩૧॥

સૂર્યાંશકે સોમસુતસ્ય સોમઃ
સૌમ્યં પ્રસૂતે સુખિનં મનુષ્યમ્ ।
શિલ્પજ્ઞમત્યદ્ભુતકર્મયુક્તં
પ્રિયતિથિં વિશ્રુતમેવ નિત્યમ્ ॥ ૩૨॥

સૂર્યાંશકે દેવપુરોહિતસ્ય
નરં સુવેષં પ્રકરોતિ ચન્દ્રઃ ।
નૃપપ્રસાદં વિનયૈઃ સમેતં
સુચિત્રપાનં બહુમિત્રયુક્તમ્ ॥ ૩૩॥

સૂર્યાંશકે ભાર્ગવનન્દનસ્ય
નરં વિનીતં પ્રકરોતિ ચન્દ્રઃ ।
નૃપપ્રસાદૈઃ પ્રચુરૈઃ સમૃધં
હસ્ત્યશ્વયુક્તં પ્રચુરાન્નપાનમ્ ॥ ૩૪॥

શનૈશ્ચરસ્યાર્કવિભાગસંસ્થો
વિધુર્વિધત્તે ચ સપત્નયુક્તમ્ ।
કીનાશમાલસ્યતમં નિતાન્તં
સ્વબન્ધુવર્ગૈઃ પરિપીડિતં ચ ॥ ૩૫॥

ત્રિંશલ્લવે ભૂમિસુતસ્ય ચન્દ્રઃ
શ્રદ્ધાવિહીનં કુરુતેઽતિકૌલમ્ ।
મલિમ્લુચં નીચજનાનુરક્તં
રક્તાર્દિતં કોપપરં સુજિહ્મમ્ ॥ ૩૬॥

ત્રિંશદ્વિભાગેઽકસુતસ્ય ચન્દ્રો
વિરૂપદેહં મુખરં કરોતિ ।
બ્રહ્માશણં સ્થૂલચં સુજિહ્મં
પરાપવાદે નિરતં સદૈવ ॥ ૩૭॥

ત્રિંશલ્લવે રાત્રિપતિર્યદા સ્યા-
ન્મેધાવિનં ચૈવ તદા પ્રસૂતે ।
જીવસ્ય મર્ત્યં ભુવિ લબ્ધકીર્તિં
શ્રિયાધિકં પાર્થિવવલ્લભં ચ ॥ ૩૮॥

ત્રિંશાંશકે સોમસુતસ્ય મર્ત્યં
ચન્દ્રઃ પ્રસૂતે શુચિમપ્રમન્તમ્ ।
સ્ત્રીવલ્લભ ગીતકલાસ્યુ ..........
પ્રિયાતિથિં નિત્યમુદારચેષ્ટમ્ ॥ ૩૯॥

ત્રિંશાંશકસ્થો વિધુરાધત્તે
શુક્રસ્ય મર્ત્યં બહુવીર્યયુક્તમ્ ।
સુપુણ્યયુક્ત હયયાનયુક્ત..........
દયાધિકં સત્સુ સદાનુરક્તમ્ ॥ ૪૦॥

સુહૃદ્બલાચ્છીતમયૂખમાલી
નરં વિધત્તે બહુમિત્રયુક્તમ્ ।
સુહૃત્પ્રિયં પાર્થિવમાનપુષ્ટં
સુધાધિકં સાધુતરં સલજ્જમ્ ॥ ૪૧॥

સ્વસ્થાનવીર્યેણ યુતઃ શશાઙ્કો
નરં વિધત્તે વનિતાસમૃધ્ધમ્ ।
સ્વથાનપૂજ્યં પતિસઙ્ગરક્તં
નિત્યં પ્રશાન્તં ત્વૃતવાક્યમેવ ॥ ૪૨॥

સ્વતુઙ્ગસારેણ યુતઃ શશાઙ્કઃ
પ્રોત્તુઙ્ગકર્માણમહીનસત્ત્વમ્ ।
નરં પ્રસૂતે વિજદેવભક્તં
બહ્વશ્વયુક્તં સતતં સમૃધ્ધમ્ ॥ ૪૩॥

નવાંશપુષ્ટઃ પ્રબલઃ શશાઙ્કો
નરં વિધત્તે સુતયાનયુક્તમ્ ।
રોગૈર્વિમુક્તં સુકુમારદેહં
ભોગાધિકં સર્વકલાસુ દક્ષમ્ ॥ ૪૪॥

શુભગ્રહાલોકનસારયુક્ત-

ચન્દ્રો ભયૈર્વર્જિતમુત્તમમ્ ચ ।
હસ્ત્યશ્વયુક્તં પુરુષં પ્રસૂતે
શૂરં મહોત્સાહિનમૃધિમન્તમ્ ॥ ૪૫॥

સ્ત્રીક્ષેત્રવીર્યાત્ પ્રબલાચ્છશાઙ્કઃ
કુર્યાજ્જિતરાતિગણં ગુણાઢ્યમ્ ।
બહ્વન્નવિત્તં પ્રમદાસ્વભીષ્ટં
મર્ત્યં મહાલોકયુતં કરોતિ ॥ ૪૬॥

આશાબલાદ્રાત્રિપતિર્જિતારિં ..........
સ્વબન્ધુમાન્યં સુધૃતં સુલજ્જમ્ ।
મહાધન સર્વગુણાધિવાસ ..........
સ્ત્રીવલ્લભં માનધનં કરોતિ ॥ ૪૭॥

ચેષ્ટાબલાઢ્યો બહુમિત્રકોશં
ચન્દ્રો વિધત્તે નિરુજં મનુષ્યમ્ ।
ભૃત્યાધિલ સત્યરતં ..........
નિત્યં સુરારાધનતત્પરં ચ ॥ ૪૮॥

નિશાબલાઢ્યઃ પ્રબલઃ શશાઙ્કો
નરં પ્રસૂતે દ્યુતિતેજયુક્તમ્ ।
વસ્ત્રાન્નપાનૈર્વિવિધૈરુપેતં
સૌભાગ્યવન્તં બહુદાનશીલમ્ ॥ ૪૯॥

કરોતિ ચન્દ્રઃ સ્વદિનોદ્ભવેન
યુક્તઃ પ્રસક્તં સતતં મનુષ્યમ્ ।
મિત્રાધિકં સૌમ્યવપુઃ પ્રસિદ્ધં
નાનાર્થવૃદ્ધ્યા પરિપુષ્ટવિત્તમ્ ॥ ૫૦॥

હોરાબલાઢ્યો વિષમાર્ગદક્ષં
ગુરુપ્રિયં ગીતરતં સુકાન્તમ્ ।
મહાસહિષ્ણું કૃષિકર્મયુક્તં
ચન્દ્રઃ પ્રસૂતે સુતકન્યકાઢ્યમ્ ॥ ૫૧॥

હિમદ્યુતિર્માસબલેન કુર્યાત્
ક્રિયાન્વિતં કલ્પતરું સમૃદ્ધમ્ ।
શિલ્પાધિકં કીર્તિકરં સુદારં

પ્રિયાતિથિં તુષ્ટિપરં નયજ્ઞમ્ ॥ ૫૨॥

બન્દિસ્તુતં વર્ષબલાચ્છશાઙ્કો
નરં પ્રસૂતે શુભકર્મરક્તમ્ ।
દિવ્યાઙ્ગનાભોગરસાનુરક્તં
સત્ત્વાધિકં પાપજનૈર્વિમુક્તમ્ ॥ ૫૩॥

ચન્દ્રઃ સુહૃદ્વીર્યવિહીનમુર્તિઃ
કરોતિ દીનં પરતર્કકં ચ ।
સુદીર્ઘસૂત્રં વ્યસનૈરુપેતં
હિતાર્થશક્તિં પુરુષં સદૈવ ॥ ૫૪॥

સ્વસ્થાનવીર્યેણ વિહીનમૂર્તિ-
..........ઈનરતં સુવાતે ।
પરાભવાઢ્યં નૃપ્માનહીનં
કૃશં વિવેર્ણં કુસુહૃત્સમેતમ્ ॥ ૫૫॥

તુઙ્ગવીર્યેણ વિવર્જિતસ્તુ
ચન્દ્રઃ પ્રસૂતે કૃપણં મનુષ્યમ્ ।
નીચાનુરક્તં પરહીનસત્ત્વં
પ્રકીર્ણકામં બહુશોકભાજમ્ ॥ ૫૬॥

નવાંશવીર્યેણ વિવર્જિતસ્તુ
નયેનહીનં પુરુષં શશાઙ્કઃ ।
કરોતિ દુષ્ટં ચ તથા કૃતઘ્નં
ભીરું રુજાર્તં નૃપપીડિતં ચ ॥ ૫૭॥

શુભગ્રહાલોકનહીનમૂર્તિઃ
કરોતિ ચન્દ્રઃ સતતં કુરૂપમ્ ।
કુચલસુગ્ર કૃપણસ્વ ..........ં
પાપાનુરક્તં સુભુજં સદૈવ ॥ ૫૮॥

સ્ત્રીક્ષેત્રવીર્યેણ યદો વિહીન-
સ્તદા શશાઙ્કઃ પ્રકરોતિ પાપમ્ ।
દૌર્ભાગ્યક્તં દ્વિજભક્તિહીનં
વિહીનશક્તિ પરિપીડિતં ચ ॥ ૫૯॥

ચન્દ્રો દિશાવીર્યવિવર્જિતશ્ચ
વિદેશરક્તં પ્રકરોતિ મર્ત્યમ્ ।
વૃથાટનં દુર્ભગમલ્પકૃત્યં
કૃપાવિહીનં સુતમિત્રહીનમ્ ॥ ૬૦ ॥

ચેષ્ટાબલેનૈવ વિવર્જિતસ્તુ
ચન્દ્રઃ પ્રસૂતે સતતં કુચેષ્ટમ્ ।
વિદ્વેષભાજં પરદારરક્તં
નિત્યં ખલં પાર્થિવમાનહીનમ્ ॥ ૬૧ ॥

ચન્દ્રો નિશાવીર્યબલેન હીનઃ
કરોતિ નેત્રોદ્ભવરોગયુક્તમ્ ।
ચૌરપ્રમૃષ્ટાર્થચતુષ્પદાઢ્યં
સ્ત્રીલોકનિન્ધ વિકલં ખલં ચ ॥ ૬૨ ॥

સ્વવારવીર્યેણ વિવર્જિતસ્તુ
કરોતિ ચન્દ્રો બહુહાનિયુક્તમ્ ।
સેવારતં ધર્મસુખૈર્વિહીનં
પરાન્નભોક્તારમન્લ્પદોષમ્ ॥ ૬૩ ॥

હોરાબલેનૈવ વિહીનમૂર્તિ-
શ્ચન્દ્રસ્તુ મૂર્ખં મનુજં પ્રસૂતે ।
સદ્દુષ્ટભાજં સુવિહીનકોશ
સુહૃજ્જનૈસ્ત્યક્તમરિપ્રધાનમ્ ॥ ૬૪ ॥

ચન્દ્રો યદા માસબલેન હીન-
સ્તદા પ્રસૂતે વિકૃતં મનુષ્યમ્ ।
સુમન્દભાગ્યં વિજિતં પરૈશ્ચ
પ્રમાદિનં મન્દગતિં કૃતઘ્નમ્ ॥ ૬૫ ॥

ચન્દ્રો યદા વર્ષબલેન હીન-
સ્તદા સુવાતે ધનધાન્યહીનમ્ ।
મર્ત્યં સુભીરું વિજિતં ગતાર્થં
પરાભવૈકાસ્પદમેવ નિત્યમ્ ॥ ૬૬ ॥

ઇતિ શ્રીવૃધ્દ્યવને ચન્દ્રચારઃ ॥

આધ્યાય ૧૯

ભૌમચારાધ્યાયઃ

મેષે તુ ભૌમો રભસં પ્રચણ્ડં
શુરં નરં સાહસકર્મશીલમ્ ।
તેજસ્વિનં સાત્ત્વિકમુગ્રધૃષ્યં
દુર્મષણં દિનપરં પ્રસૂતે ॥ ૧॥

વૃષે સ્વબન્ધુપ્રતિબુદ્ધવૈરં
ભૌમઃ પુત્રોત્સાહકરં પ્રસૂતે ।
સુદુષ્ટશીલં બહુદુઃપ્રલાપં
પ્રભક્ષણે મન્દધનાત્મજં ચ ॥ ૨॥

સન્તુષ્તમાનો મિથુને પ્રસૂતે
ભૌમો મનુષ્યં બહુલપ્રવાસમ્ ।
નાનાર્થશિલ્પાસુ કલાસુ દક્ષં
બહુશ્રુતં વાક્યતિશારદં ચ ॥ ૩॥

સ્થિતઃ કુજઃ કર્કતકે કૃશાર્થં
કુર્વીત વૈકલ્પરુગાર્દિનં ચ ।
પુનઃ પુનર્વર્ધિતનિઃકૃતાથ
નરં પરાવેશનવિશ્રુતં ચ ॥ ૪॥

અઙ્ગારકઃ સિંહમુપેત્ય સૂતે
નરં વપુષ્મન્તમુદગ્રસત્ત્વમ્ ।
અમર્ષિણં શૂરમતિપ્રચણ્ડં
પરપ્રહર્તારમસંશયં ચ ॥ ૫॥

કન્યાં ગતો લોહિતમૂર્તિરા
પૂજ્યં સતામાર્જવમલ્પશૌર્યમ્ ।
પ્રિયપ્રતાપં પરગીતદક્ષં
નરં પ્રસૂતેવિવિધવ્યયં ચ ॥ ૬॥

તુલાધરસ્યસ્તુ કુજોઽધ્વશીલં
પ્રસક્તવાક્યં જનયત્યનિષ્ટમ્ ।
વિકત્થનં બહ્વનૃતં કુપુણ્ય

હીનાઙ્ગંમુત્સાદિતપૂર્વમિત્રમ્ ॥ ૭॥

ભૌમોઽષ્ટમે પાપમતિં કુવૃત્તં
કર્યાન્નરં બહ્વપરાધવૈરમ્ ।
શઠં વધદ્રોહકૃતાનુબન્ધ-
માચારસત્યં ભૃતધર્મશીલમ્ ॥ ૮॥

હોરાં ગતો ધન્વિનિ લોહિતાઙ્ગો
બહુક્ષતં ક્ષીણતનું પ્રસૂતે ।
શઠં નરં નિષ્ઠરવાક્યશીલં
વિપન્નદારાત્મજમસ્વતન્ત્રમ્ ॥ ૯॥

મૃગે તુ ભૌમઃ સુખિનં સુકાન્તં
નિરન્તરં શ્રેષ્ઠતમમ્ પ્રસૂતે ।
ધન્યં ધનોપાર્જણતો રમાઢ્યં
ચમૂપતિં વા મનુજેશ્વરં વા ॥ ૧૦॥

કુમ્ભે તુ ભૌમો વિકૃતં મનુષ્યં
સૂતે નરં દુર્ભગદર્શનં ચ ।
પૈશૂન્યવાદાનૃતવંચનાદિ-
દોષૈરજસ્રોપહતં મનુષ્યમ્ ॥ ૧૧॥

તિષ્ઠન્ કુજો મીનગતો રુજાર્તં
પ્રવાસિનં મન્દસુતં પ્રસૂતે ।
બહુદ્વિજાભ્યર્થનવંચનાદિ-
વિપન્નસર્વસ્વમતિક્ષ્ણરાગમ્ ॥ ૧૨॥

હોરાશ્રિતો વાસપસ્ય ભૌમો
વધપ્રિયં સાહસકર્મશીલમ્ ।
નરં સુવાતે બહુરોગયુક્તં
પિત્તાશ્રિતં તપ્તતનું નિતાન્તમ્ ॥ ૧૩॥

હોરાશ્રિતો રાત્રિપતેર્મહીજઃ
કરોતિ મર્ત્યં વિનયેન યુક્તમ્ ।
ભોક્તારમાઢ્યં વ્યવહારશીલં
ગતપ્રસૂતં વિગતારિપક્ષમ્ ॥ ૧૪॥

મુખાશિરોગૌપહતં સુશીલં
સ્વલ્પાત્મજં ક્લેશપરં ખલં ચ ।
ત્ર્યાંશે કુજો વાસરપસ્ય તિષ્ઠન્
કરોતિ મર્ત્યં વિગતપ્રતાપમ્ ॥ ૧૫॥

ક્રૂરં ખલં દ્વેષિણમિષ્ટધર્મં
ખ્યાતં નૃપાણાં સ્વગુણૈરુદારૈઃ ।
ત્ર્યંશે ચરન્ રાત્રિપતેર્નહીજો
નરં પ્રસૂતે વિગતારિપક્ષમ્ ॥ ૧૬॥

સ્વત્ર્યંશભાગે વિચરન્ મહીજો
દુઃખં પ્રસૂતે વિકૃતં મનુષ્યમ્ ।
સરહ્યરાગાતમસશ્ચ સખ્યં
વિદ્વેષીણં સાધુજનસ્ય નિત્યમ્ ॥ ૧૭॥

દ્રેષ્કાણકે સ્વે વિચરન્ મહિજઃ
કરોતિ મર્ત્યં બહુરોગયુક્તમ્ ।
પરાન્નરક્ત પ્રચુરપ્રકોપં
ગતપ્રતાપ સતતં કુશીલમ્ ॥ ૧૭અ॥

ત્ર્યંશે કુજઃ સોમસુતસ્ય તિષ્ઠન્
ગમ્ભીરસત્ત્વસ્થિતિમૃદ્ધિમન્તમ્ ।
નરં પ્રસૂતે બહુ .......... ઉ ........
નરેન્દ્રસન્માનસમન્વિતં ચ ॥ ૧૮॥

ત્ર્યંશે ગુરોર્ભૂમિસુતઃ પ્રસૂતે
નરં વિદગ્ધં પ્રથિતં કુવેષમ્ ।
સુશ્રૂષકં દેવગુરુદ્વિજાનાં
..........ચિન્તં મતિમન્તમેવ ॥ ૧૯॥

ત્ર્યંશે કુજો ભાર્ગવ ..........
નરં પ્રસૂતે વનિતાસ્વભીષ્ટમ્ ।
હિરણ્યલોહપ્રધનં પ્રસિદ્ધિં
ક્રિયાસુ ચાભિપ્રયતં પ્રગલ્ભમ્ ॥ ૨૦॥

નવાંશકે વાસરપસ્ય ભૌમો
લુબ્ધં કુયોષિદ્રતસઙ્ગવિત્તમ્ ।

તિષ્ઠન્ વિધત્તેઽલ્પસુખં મનુષ્યં
હૃદ્રોગિણં બદ્ધશનં શઠં ચ ॥ ૨૨॥

નવાંશકસ્થઃ પ્રકરોતિ ભૌમ-
શ્ચન્દ્રસ્ય કાન્તાસુખમાનયુક્તમ્ ।
સુહૃદ્વિજાતિચ્યપરં પ્રશાન્તં
પૂજ્યં સતાં બન્ધુહિતે રતં ચ ॥ ૨૩॥

નવાંશકે સ્વે વિચરન્ મહીજઃ
કરોતિ મર્ત્યં બહુરોગયુક્તમ્ ।
પરાન્નરક્ત પ્રચુરપ્રકોપ
ગતપ્રતાપં સતતં કુશીલમ્ ॥ ૨૪॥

બુધસ્ય ભૌમઃ પ્રચરન્નવાંશે
કરોતિ મર્ત્યં પ્રણતં દ્વિજાનામ્ ।
દ્રવ્યાન્વિતં ધીરમુદારસત્ત્વં
વિસ્તીર્ણસત્ત્વં સુભગં સુખાઢ્યમ્ ॥ ૨૫॥

ગુરોનવાંશે વિચરન્ મહીજઃ
કરોતિ મર્ત્યં વિવિધાન્નપાનમ્ ।
શૂરં પ્રચણ્ડં રણરઙ્ગરક્તં
ગતદ્વિષં યાનવરૈઃ સમેતમ્ ॥ ૨૬॥

શુક્રસ્ય ભાગે નવમે તુ ભૌમઃ
કરોતિ મર્ત્યં રતિલુબ્ધસૌખ્યમ્ ।
સુહૃદ્ગુરુપ્રીતિકરં સુવાક્યં
સુસાધરક્તં બહુભૃત્યયુક્તમ્ ॥ ૨૭॥

શનેર્નવાંશે વિગતો મહીજે
નરં સુવાતે બહુપાપયુક્તમ્ ।
ગુહ્યાશિરોગોપહતં સુદુષ્તં
પ્રિયાવિહીનં પરતર્કકં ચ ॥ ૨૮॥

પતિપ્રિયં કૂટરતં કુશિલં
ચરસ્થિત બદ્ધૃણબન્ધનં ચ ।
સૂર્યાંશકે વાસરપસ્યં ભૌમો
નરં પ્રસૂતે વિદેધૂર્તચેષ્ટમ્ ॥ ૨૯॥

સૂર્યાંશકે રાત્રિચરસ્ય ભૌમો
નરં પ્રસૂતે સુવપુઃ સુકાન્તમ્ ।
પ્રાચં બહુભ્રાતરમૂર્જિતં ચ
.......... ॥ ૩૦॥

દ્વાદશાંશે વિચરન્ મહિજઃ
સ્ત્રીદુર્ભગં પ્રેષ્યકમસ્વતન્ત્રમ્ ।
સ્ત્રીરૂપતુલ્યાકૃતિકર્મયુક્ત-
મસૃગ્રુગાર્તં વ્યસનૈઃ સમેતમ્ ॥ ૩૧॥

વ્યાયામશય્યામ્બરભૂષણાઢ્યં
ખ્યાતં સ્થિરસ્ફીતવરાઙ્ગનં ચ ।
સૂર્યાંશકે સોમસુતસ્ય ભૌમો
નરં પ્રસૂતે નૃપપીડિતસ્વમ્ ॥ ૩૨॥

પ્રખ્યાતબુદ્ધિં સુખિનં સ્વતન્ત્રં
કવિં વિવાદેઽપ્યનિવારિતં ચ ।
સૂર્યાંશકે દેવગુરોઃ કુજશ્ચ
પ્રભૂતવિત્તં સુભગં પ્રસૂતે ॥ ૩૩॥

સ્ત્રીણામભીષ્ટં મધુરં વિનીતં
દાનોપચારાદરમાનયુક્તમ્ ।
સૂર્યાંશકે ભૂમિસુતો ભૃગોશ્ચ
કરોતિ નિત્યં પ્રણતારિપક્ષમ્ ॥ ૩૪॥

સ્વબન્ધુવિદ્વેષવિવાદશીલં
બહુપ્રલાપ ચપલ કુશાલમ્ ।
સૂર્યાંશકસ્થો રવિજસ્ય ભૌમઃ
કરોતિ મર્ત્યં કલહાનુરક્તમ્ ॥ ૩૫॥

અનેકદિક્પદૃનવેશ્મચેષ્ટં
બહુવ્યયાનર્થપરં સદૈવ ।
ત્રિંશલ્લવે સ્વે પ્રકરોતિ ભૌમો
નરં કુરૂપં વ્યસનૈઃ સમેતમ્ ॥ ૩૬॥

લુબ્ધં પરસ્ત્રીનિરતં સદૈવ

વિદ્વેષિણં દુર્વનિતાપતિં ચ ।
ત્રિંશાંશકે સૂર્યસુતસ્ય ભૌમ-
સ્તિષ્ઠન્ વિધત્તે વિકૃતં મનુષ્યમ્ ॥ ૩૭॥

યજ્ઞવ્રતાધ્યાયનદાનશીલં
પુરોહિત પાર્થિવમન્ત્રિણં ચ ।
ત્રિંશાંશકે દેવગુરોર્મહીજઃ
કરોતિ મર્ત્યં બહુધર્મયુક્તમ્ ॥ ૩૮॥

દાતારમિષ્ટામ્બરગન્ધમાલ્યં
બહુપ્રજં બન્ધિહિતં સદૈવ ।
ત્રિંશલ્લવ સોમસુતસ્ય તિષ્ઠન્
કુજો વિધત્તે સુખદં પ્રસૂતે ॥ ૩૯॥

આલોખ્યવિધાનિપુણં સુશીલં
વાધપ્રિયં ગીતવિશારદં ચ ।
ત્રિંશલ્લવે વૈ ભૃગુજસ્ય ભૌમો
નરં પ્રસૂતે બહુપુત્રયુક્તમ્ ॥ ૪૦॥

ભૌમો યદા મિત્રબલેન યુક્તઃ
કરોતિ મર્ત્યં સુહૃદૈઃ સમેતમ્ ।
પ્રભૂતસૌખ્યેન યુતં સુરૂપં
ગુરુદ્વિજાચાર્યપરાયણં ચ ॥ ૪૧॥

સ્વક્ષેત્રવિર્યેણ યુતો મહીજ
કરોતિ મર્ત્યં સુતમાનયુક્તમ્ ।
સ્ત્રીભૂષણશ્વં રતિભૂરિદક્ષં
કલાલિપિજ્ઞં મધુરં ગતારિમ્ ॥ ૪૨॥

વિધાગમાઢ્યં સુતવિત્તયુક્તં
સુપુણ્યશીલં નિપુણપ્રયોગમ્ ।
સ્વતુઙ્ગવીર્યેણ યુતસ્તુ ભૌમઃ
કરોતિ મર્ત્યં પ્રણતં દ્વિજાનામ્ ॥ ૪૩॥

દેવદ્વિજાભ્યર્થનલબ્ધકીર્તિ
શૂરં સતામાશ્રયમાપ્તવિધમ્ ।
ભૌમઃ સ્વનવાંશકવીર્યયુક્તઃ

કરોતિ મર્ત્યં નૃપમાનયુક્તમ્ ॥ ૪૪॥

સુવૃત્તદાર ગતશત્રુક્ષ..........
કવિં નૃપામાત્યમહત્તરં વા ।
શુભગ્રહાલોકનવીર્યયુક્તો
ભૌમઃ પ્રસૂતે સુભગં મનુષ્યમ્ ॥ ૪૫॥

પુંક્ષેત્રવીર્યેણ યુતસ્તુ ભૌમો
નરં પ્રસૂતે દ્વિજદેવભક્તમ્ ।
પ્રભૂતગોજાતહિરણ્યધાન્યં
બહ્વઙ્ગનાનન્દનમદ્ભુતાર્થમ્ ॥ ૪૬॥

દિગ્વીર્યયુક્તઃ પ્રકરોતિ ભૌમો
નરં પ્રસૂતે સતતં સુશીલમ્ ।
કાત્તાશ્રમં ક્લેશસહં વિનીતં
..........આન્વિતં ધર્મપરાયણં ચ ॥ ૪૭॥

ચેષ્ટાબલાઢ્યઃ પ્રકરોતિ ભૌમો
નરં પ્રસૂતે સતતં કુમેષ્ટમ્ ।
હિતાનુકૂલં સુહૃદાં સતં ચ
નૈપુણ્યયુક્તં નિપુણં ક્રિયાસુ ॥ ૪૮॥

ભૌમો યદા રાત્રિબલેન યુક્ત-
સ્તદા પ્રસૂતે સુભગં મનુષ્યમ્ ।
આરામવાપીકરણાનુરક્તં
સ્ત્રીલાભયક્તં પ્રચુરાન્નયુક્તમ્ ॥ ૪૯॥

સ્વવારવીર્યપ્રબલો મહીજઃ
સ્મૃતિશ્રુતાચારમતિં સુશીલમ્ ।
નરં સુવાતે બહુભોગભાજં
કાન્તં પ્રિયં સ્થાનવિલોપનં ચ ॥ ૫૦॥

હોરાબલાઢ્યઃ પ્રકરોતિ ભૌમો
નરં નિતાન્તં સ્મૃતિશાસ્ત્રવિચમ્ ।
પ્રભૂતગોભૂમિસુતાઙ્ગનાઢ્યં
પ્રિયં વદં સર્વસહં મનુષ્યમ્ ॥ ૫૧॥

પ્રખ્યારમત્યન્તસુખાપભોગં
જિતારિમારક્ષકસાધુદારમ્ ।
સ્વમાસવીર્યેણ યુતો મહીજો
નરં વિધત્તે દયિતં નૃપાણામ્ ॥ ૫૨॥

આરો યદા વર્ષબલેન યુક્તઃ
કરોતિ મર્ત્યં ધનધાન્યયુક્તમ્ ।
હતત્વિષં તુષ્ટીપરં સહીષ્ણું
પ્રિયંવદં સર્વજનાનુકૂલમ્ ॥ ૫૩॥

ભૌમો યદા પક્ષબલેન પુષ્ટ-
સ્તદા પ્રસૂતે વિગતારિપક્ષમ્ ।
પ્રભું પ્રસિધ્દ્ધં ક્ષુતિમાનયુક્તં
શૂરં ધનાઢ્યં સ્વકુલપ્રધાનમ્ ॥ ૫૪॥

ભૌમો યદા મિત્રબલેન હીન-
સ્તદા કુમિત્રં જનઝ્મનુષ્યમ્ ।
ખલં કુરૂપં ધનધાન્યહીનં
દેવદ્વિજાનાં ચ તથા વિરક્તમ્ ॥ ૫૫॥

સ્વક્ષેત્રવીર્યેણ વિવર્જિતસ્તુ
ભૌમોઽતિકષ્ટં વિદધાતિ મર્ત્યમ્ ।
સ્ત્રીવલ્લભં બન્ધુજનવ્યપેતં
ગતાથશાક્તં વિજિતં વિપક્ષૈઃ ॥ ૫૬॥

સ્ત્રીપાનદોષપ્રભવૈરનથ-
ર્વ્યયાદિદોષૈઃ કલહૈર્વિચિત્રૈઃ ।
સમ્પીડ્યતે સર્વજનૈર્મનુષ્યો
ભૌમો યદા તુઙ્ગબલેન હીનઃ ॥ ૫૭॥

વિંશવીર્યેણ વિવર્જિતસ્તુ
ભૌમઃ પ્રસૂતે સુહૃજં મનુષ્યમ્ ।
પ્રપીડિતં શત્રુકૃતૈર્વિકારઃ
પરાભવૈર્મિત્રકૃતૈસ્તથૈવ ॥ ૫૮॥

શુભગ્રહાલોકનવીર્યહીનઃ
કરોતિ મર્ત્યં વિકૃતાઙ્ગમેવ ।

વિમુક્તધર્મં સહજાપરક્તં
વિગર્હિતં શીલપરિચ્યુતં ચ ॥ ૫૯॥

સ્વક્ષેત્રવીર્યપ્રવિવર્જિતસ્તુ..........
ભૌમઃ પ્રસૂતે ..........
હિંસાપરં બહ્વૃણશૂન્યકોશં
શ્રિયા વિમુક્તં રતિહીનસૌખ્યમ્ ॥ ૬૦॥

આશાબલેનૈવ વિવર્જિતસ્તુ
ભૌમઃ પ્રસૂતે હ્યધનં મનુષ્યમ્ ।
વૃદ્ધાઙ્ગનાસેવનમધ્વશીલં
પરાર્થચેષ્ટાસ્વતિકષ્ટભાજમ્ ॥ ૬૧॥

હૃદ્રોગિણં દુર્બલદેહયન્ત્રં
મૂર્છાસ્મૃતિં નીચપરિગ્રહં ચ ।
..........બલેન પ્રવિવર્જિતસ્તુ
ભૌમઃ પ્રસૂતે વિગતાભિમાનમ્ ॥ ૬૨॥

વિમુક્તધર્મં વિગતપ્રભાવં
દ્યૂતપ્રિયં પાપરતં કુશીલમ્ ।
સદા વિહીનઃ પ્રકરોતિ મર્ત્યં
ભૌમઃ સદા શત્રુવિમર્દિતં ચ ॥ ૬૩॥

સ્વવારવીર્યપ્રવિવજ્જિતસ્તુ
ભૌમઃ પ્રસૂતે વિકૃતં મનુષ્યમ્ ।
સાનોપભોગાભરણાઇબાહ્યં
પરાઙ્ગનોપાસનકર્મશીલમ્ ॥ ૬૪॥

.......... રાઙ્ગનાસઙ્ગમસક્તભાષ્યં
વીવ્રતઘ્નં વસુદારણ ચ ।
હોરાબલૈર્હીન..........ઉશ્ચ ભૌમઃ
કરોતિ મર્ત્યં વ્યસનૈઃ સમેતમ્ ॥ ૬૫॥

દ્વેષ્યં જગત્યદ્ભુતવેષચેષ્ટં
વિહીનસત્યં સુખલં કૃતઘ્નમ્ ।
ભૌમો યદા માસબલેન હીન-
સ્તદા પ્રસૂતે સરુજં મનુષ્યમ્ ॥ ૬૬॥

અનાત્મજં કર્મવિપક્ષદારં
પાપોધતં ધર્મફલવ્યપેતમ્ ।
કરોતિ ભૌમોऽબ્દબલેન હીનો
નરં નિતાન્તં પ્રિયસાહસં ચ ॥ ૬૭॥

શઠં પરોપાસનસઙ્ગહેપ્સું
સુહૃદમં સ્ત્રીગમનોર્સુકં ચ ।
સ્વપક્ષવીર્યેણ વિવર્જિતસ્તુ
ભૌમઃ પ્રસૂતેऽતિવિકર્મશીલમ્ ॥ ૬૮॥

ઇતિ શ્રીવૃધ્દ્યવને ભૌમચારઃ ॥

આધ્યાય ૨૦

બુધચારાધ્યાયઃ

મેષં ગતસ્ત્વિન્દુસુતા..........
કુર્યાત્ કૃશં બહ્વટનં શઠં ચ ।
મિથ્યાપ્રલાપં પ્રિયવિગ્રહાસ્ત્રં
ભૂરિત્રમોત્પન્નવિપન્નચિન્તમ્ ॥ ૧॥

વૃષં ગતસ્તુ પૃથુપીનકાન્તં
બુધો નરં ત્યાગિનમિષ્ટરમ્ ।
ગાન્ધર્વલીલારતિહાસ્યશીલં
દક્ષં પ્રગલ્ભં પ્રિયવલ્ગુવાક્યમ્ ॥ ૨॥

બુધઃ પ્રસૂતે મિથુને સુવાક્યં
નરં પ્રિયાભાષણમિષ્ટકેશમ્ ।
શિલ્પશ્રુતિજ્ઞાપકલાવિદગ્ધં
વિકત્થિનં માનિનમૂર્જિતં ચ ॥ ૩॥

ચતુર્થરાશૌ તુ શશાङ્કસૂનુ-
સ્તિષ્ઠન્ વિદેશાભિરતં પ્રસૂતે ।
પ્રાજ્ઞં કવિં સ્ત્રીરતિગેયવિત્તં
બહુક્રિયાસક્તમનસ્વિનં ચ ॥ ૪॥

બુધો નરં સિંહમુપેત્ય..........ઉ........

દલ્પસ્મૃતં ચાનકલાવિયુક્તમ્ ।
અત્માહસત્ત્વસ્થિત્તિવિત્તહીનં
જગત્યતિજ્ઞાતમસત્યવાક્યમ્ ॥ ૫॥

કન્યામપત્ય પ્રચુરં પ્રસૂતે
ર્મપ્રિયં વાગ્મિનમિન્દુસૂનુઃ ।
આલેખ્યલેખ્યશ્રુતિકાવ્યવિત્તં
વિજ્ઞાનશિલ્પાદિવિમિશ્રિતં ચ ॥ ૬॥

તુલાધરે શિલ્પવિવાદવન્તં
બુધો વિધત્તે ચપલં પ્રસૂતે ।
શઠપ્રચાર કૃતકોપચાર
પણ્યક્રિયોપાયવિધાનદક્ષમ્ ॥ ૭॥

બુધો નરં વૃશ્ચિકમેત્ય કર્યા-
દમર્ણદુઃખત્રમશોકતપ્તમ્ ।
વિદ્વિષ્ટકર્માણમસાધશીલં
પારુષ્યદમ્ભચ્છલનિશ્ચિતમ્ ॥ ૮॥

ધનુર્ધરસ્થિસ્ત બુધો મનુષ્યં
વિખ્યાતશબ્દિં જનયત્યુદારમ્ ।
શાસ્ત્રાર્થાશિલ્પશ્રુતિશૌર્યયુક્તં
મેધાવિન નાક્યવિશારદં ચ ॥ ૯॥

બુધો મૃગસ્થો જનયત્યનર્થં
નીચં પરપ્રેષ્યમસત્યચેષ્ટમ્ ।
મુર્ખં કલાશિલ્પગુણૈર્વિહીનં
નિરુદ્યમસ્થં પિશુનસ્વભાનમ્ ॥ ૧૦॥

કુમ્ભે તુ સૌમ્યઃ શુચિશીલહીનં
નરં પ્રસૂતે પરિભૂતમન્યૈઃ ।
વાગ્બુદ્ધિકર્મોપહતં હતાશં
પ્રહીનલજ્જં રતિદુર્ભગં ચ ॥ ૧૧॥

મીનદ્વયસ્થસ્તુ બુધો મનુષ્ય-
માચારશોભાભિરતં પ્રસૂતે ।
દેશાનુગં વાહ્મીનકર્મસાધું

દરિદ્રમિષ્ટપ્રજમ્લ્પમિષ્ટમ્ ॥ ૧૨॥

હોરં બુધો વાસરપસ્ય યાત-
સ્તીવ્રં ખલં કામપરં વિશીલમ્ ।
ગતપ્રતાપં બહુપાપરક્તં
દેવદ્વિજાનાં પરિનિન્દકં ચ ॥ ૧૩॥

હોરાં ગતો રાત્રિપતેસ્તુ સૌમ્યો
નરં પ્રસૂતે સુભગં સુશીલમ્ ।
વિશિષ્ટવાગ્બુદ્ધિગુણં નયશ્ચં
પ્રિયાતિથિં નિત્યમુદારચેષ્ટમ્ ॥ ૧૪॥

ત્ર્યંશે બુધો વાસરપસ્ય તિષ્ઠન્
નરં પ્રસૂતે પરિવાદયુક્તમ્ ।
ક્રૂરં હતારિં સરણં કુરૂપં
કૂટાનુરક્તં ચ સદા સકામમ્ ॥ ૧૫॥

ત્ર્યંશે બુધો રાત્રિ..........
નરં પ્રસૂતે વિગતારિપક્ષમ્ ।
મુશ્રૂષકં દેવગુરુદ્વિજાનાં
કુલપ્રધાનં બહુપુત્રયુક્તમ્ ॥ ૧૬॥

બુધો યદા ભૂમિસુતસ્ય સંસ્થો
ભાગે તૃતીયે પ્રકરોતિ મર્ત્યમ્ ।
માઙ્ગલ્યધર્મં શ્રુતિધર્મબાહ્યં
વબન્ધુમાનં સમ્પદા વિયુક્તમ્ ॥ ૧૭॥

સ્વવહ્નિભોગેન્દુસુતઃ સુવાતે
સુરૂપદેહં સુભગં મનુષ્યમ્ ।
યશ્વવ્રતાદિષ્વનુરક્તચેષ્ટં
દાતારમાર્યં બહુમિત્રપક્ષમ્ ॥ ૧૮॥

તૃતીયભાગે સુરપૂજિતસ્ય
બુધો વિધત્તે પ્રસભં મનુષ્યમ્ ।
સ્ત્રીવલ્લભં શુભ્રમલંઘ્યવીર્યં
પ્રભૂતકોશં વિવિધાર્થયુક્તમ્ ॥ ૧૯॥

ભાગે તૃતીયે શશિજઃ સિતસ્ય
તિષ્ઠન્ પ્રસૂતે સુવિદગ્ધમેવ ।
મર્ત્યં મહાધામનિધિં ગતારિં
પ્રસન્નચિન્તં નૃપવલ્લભં ચ ॥ ૨૦॥

ત્ર્યંશે શનેઃ સોમસુતઃ પ્રયાતઃ
કરોતિ મર્ત્યં સઘૃણં
વિષાદિનં દુર્બલદેહસત્ત્વં
પ્રવાસિનં વિક્રયવિગ્રહં ચ ॥ ૨૧॥

ચરન્ નવાંશે દિનપસ્ય સૌમ્ય
કરોતિ પાપં વિકૃત મનુષ્યમ્ ।
સ્ત્રીદુર્ભગં બન્ધુજનૈર્વિમુક્તં
પ્રસક્તશીલં હતશક્તિદર્પમ્ ॥ ૨૨॥

ચન્દ્રાંશકે સ્યાન્ નવમે યદૈન્દવ-
સ્તદા વિધત્તે સુસુખ નિતાન્તં
ખ્યાતં વપુષ્મન્તમુદારચેષ્ટં
જેતારમીજ્યં સુહૃદાં સતાં ચ ॥ ૨૩॥

નવાંશકે ભૂમિસુતય સૌમ્યો
નરં વિધત્તે રુધિરાર્તદેહમ્ ।
વિકર્મશીલં સુહૃદામભીષ્ટં
દ્વેષ્યં ખલં પાર્થિવપીડિતં ચ ॥ ૨૪॥

નવાંશકે સ્વે પ્રકરોતિ સૌમ્યઃ
સૌમ્યં સુરૂપં સુભગં મનુષ્યમ્ ।
દેવદ્વિજાતોપ્રણતં પ્રસન્ન
પ્રિયાતિથિં બ્રહ્મણસંમતં ચ ॥ ૨૫॥

નવાંશકસ્યઃ સુરપૂજિતસ્ય
સૌમ્યઃ પ્રસૂતે સુખિનં મનુષ્યમ્ ।
નાનાર્થલાભં પ્રભુત્પ્રતાપં
સુમિત્રયુક્તં પ્રસુતં સુશિલમ્ ॥ ૨૬॥

શુક્રસ્ય ભાગે નવમે બુધસ્તુ
કરોતિ મર્ત્યં વિવિધાર્થયુક્તમ્ ।

પ્રભૂતામત્ર દ્વિજપૂજનપ્સુ..........
સુતાન્વિતં નિત્યમુદારચેષ્ટમ્ ॥ ૨૭॥

સૌરસ્ય ભાગે નવમે ચ તિષ્ઠન્
કરોતિ સૌમ્યોઽતિરુજં મનુષ્યમ્ ।
કુશિલ્પિનં સાધુગુણૈરયોગ્યં
પરાઙ્ગનાસક્તમનર્થયુક્તમ્ ॥ ૨૮॥

સૂર્યાંશકસ્થો વિદધાતિ સૌમ્યો
નૃણાં રવેઃ પાપમતિં ન સૌખ્યમ્ ।
કુમિત્રસઙ્ગં રિપુપક્ષવૃદ્ધિં
યશોર્વિ.......... સતસંશયં ચ ॥ ૨૯॥

સૂર્યાંશકે શાતકરસ ..........ઔ........
નરં વિધત્તે વિવિ..........તાપમ્ ।
સતાર્થયુક્તં રતિસૌખ્યભાજં
વિશિષ્ટશીલં વિનયૈઃ સમેતમ્ ॥ ૩૦॥

સૂર્યાંશક ભૂમિસુતસ્ય સૌમ્યો
નરં વિધત્તેઽતિશઠં વિશિલમ્ ।
ગતશ્રિયં બન્ધુજનેન નિત્યં
પાપાત્મકં રોગસમન્વિતં ચ ॥ ૩૧॥

સૂર્યાંશકે સ્વે પ્રકરોતિ સૌમ્યો
નરં .......... શાસ્ત્રરતં સદૈવ ।
કલાસુ દક્ષં પ્રણતારિપક્ષં
જીતેન્દ્રિયં શ્લાધ્યતમં સદૈવ ॥ ૩૨॥

સૂર્યાંશકે દેવપુરોહિતસ્ય
સૌમ્યઃ પ્રસૂતે સુતરાં સુશિલમ્ ।
મર્ત્યં મહાવૃત્તવિબુદ્ધિયુક્તં
પ્રિયાતિથિં ધર્મપરં સદૈવ ॥ ૩૩॥

સૂર્યાંશકે ભાર્ગવ એવ સૌમ્યઃ
કરોતિ મર્ત્યં પ્રચુરાન્નકોશમ્ ।
નૃપપ્રિયં સાધુજનાનુરક્તં
સદ્ધર્મશીલં બહુપુણ્યસૌખ્યમ્ ॥ ૩૪॥

સૂર્યાંશકે સૂર્યસુતસ્ય સૌમ્યજ઼્
કરોતિ દિનં કૃપગમનષ્યમ્ ।
વ્યપેતસિલં બહુરોગયુક્તં
..........અયાપટ નિદયાન........ ચ ॥ ૩૫॥

સૂર્યાંશકે વાસરપસ્ય સૌમ્યો
નરં પ્રસૂતે કુટિલં કુશીલમ્ ।
કુકર્મરક્તં કુજનપ્રસક્તં
કુસ્ત્રીષુ રક્તં નૃપમાનયુક્તમ્ ॥ ૩૫અ॥

સૂર્યાંશકસ્થઃ શશિનશ્ચ સૌમ્યો
નરં પ્રસૂતે સુતમાનયુક્તમ્ ।
શ્રિયાધિકં કાન્તિયુતં સુશિલં
પ્રપન્નમિત્રં પરદારરક્તમ્ ॥ ૩૫બ્॥

સૂર્યંશકે ભૂમિસુતસ્ય મર્ત્યં
સૌમ્યઃ પ્રસૂતે નિરુજાભિતપ્તમ્ ।
વિનાર્થયુક્તં વિગતપ્રતાપં
પાખણ્ડિનં દુર્જનવલ્લભં ચ ॥ ૩૫ચ્॥

સ્વસૂર્યભાગે વિચરન્ બુધસ્તુ
સુરૂપમેવ પ્રકરોતિ મર્ત્યમ્ ।
નૃપપ્રિયં સત્યરતં સુવાક્યં
સદાનુકૂલં દ્વિજદેવતાભ્યઃ ॥ ૩૫દ્॥

સૂર્યાંશકે દેવપુરોહિતસ્ય
બુધઃ પ્રસૂતે સુભગં મનુષ્યમ્ ।
વિક્ષાવિનીતં બહુશાસ્ત્રરક્તં
વિવેકિનં વિપ્રમતિં પ્રગલ્ભમ્ ॥ ૩૫એ॥

સૂર્યાંશકે દૈત્યપુરોહિતસ્ય
બુધો વિધત્તે બહુલાભયુક્તમ્ ।
ત્રીસૌખ્યયુક્તં પ્રણતારિપક્ષં
સુવર્ચસાં સાદિતમલ્પશત્રુમ્ ॥ ૩૫ફ઼્॥

રૌદ્રં સુકૃષ્ણં સતતં કુચૈ

માલમ્લુચ પાપરત સદૈવ ।
સૂર્યાંશકે સૂર્યસુતસ્ય સૌમ્યો
નરં વિધત્તેડતિખલં કૃતઘ્નમ્ ॥ ૩૫ગ્॥

ત્રિંશલ્લવસ્થોડવનિજસ્ય સૌમ્યો
નરં પ્રસૂતે કઠિનં કુરૂપમ્ ।
સતાર્થહીનં વ્યસનૈરુપેતં
પરાઙ્મુખં દેવગુરુદ્વિજાનામ્ ॥ ૩૬॥

ત્રિંશલ્લવસ્થોડર્કસુતસ્ય સૌમ્યઃ
કરોતિ તિષ્ઠન્ પરતર્કકં ચ ।
રૌદ્રક્રિયાસક્તમતિં પ્રચણ્ડં
દ્યૂતપ્રિયં વ્યાધિભિરર્દિતં ચ ॥ ૩૭॥

ચન્દ્રાર્મજો દેવપુરોહિતસ્ય
ત્રિંશાંશકસ્થઃ પ્રકરોતિ ધીરમ્ ।
સદા વિનીતં ગુણિનામભીષ્ટં
સ્વબન્ધુપૂજ્યં કુલસત્તમં ચ ॥ ૩૮॥

ત્રિંશાંશકે સ્વે શશિસૂનુરેવ
શ્રુતાર્થયુક્તં મનુજં સુવાતે ।
ગુણૈર્વિખ્યાતમલંઘ્યવીર્યં
પ્રસન્નમૂર્તિં સતતં સુશીલમ્ ॥ ૩૯॥

ત્રિંશલ્લવે દાનવપૂજિતસ્ય
સૌમ્યો વિધત્તે પ્રચુરપ્રતાપમ્ ।
પ્રભું પરક્ષેત્રવમાધનાનાં
પ્રદાનશિલં સુકલત્રયુક્તમ્ ॥ ૪૦॥

સ્વમિત્રવીર્યેણ યુતસ્તુ સૌમ્યઃ
કરોતિ મર્ત્યં બહુમિત્રયુક્તમ્ ।
પ્રદાનશિલં ગુરુદેવભક્તં
સુશ્રૂષકં સાધુજનં સદૈવ ॥ ૪૧॥

સૌમ્યો યદા ક્ષેત્રબલેન યુક્તઃ
કરોતિ મર્ત્યં પ્રિયમેન લોકે ।
સ્થિરક્રિયારમ્ભજનસ્વભાવં

વિખ્યાતશબ્દં દૃદમિત્રપક્ષમ્ ॥ ૪૨॥

સ્વતુઙ્ગવીર્યેણ યુતસ્તુ સૌમ્યો
નરં વિધત્તે પ્રમદાસ્વભિષ્ટમ્ ।
પ્રદાનશીલં ગુરુદેવભક્તં
સુશ્રૂષકં સાધુજનસ્ય નિત્યમ્ ॥ ૪૩॥

નવાંશવીર્યેણ યુતસ્તુ સૌમ્યો
નરં પ્રસૂતે સતતં મનોજ્ઞમ્ ।
શુચિં ક્ષમાસત્યરત કૃતજ્ઞ
મનસ્વિનં સર્વસુખાભિવાસમ્ ॥ ૪૪॥

શુભગ્રહાલોકનવીર્યયુક્તઃ
કરોતિ સૌમ્યઃ પ્રણતં મનુષ્યમ્ ।
શૂરં બહુક્લેશસહં રતશ્ચં
નૃપપ્રિયં પુણ્યમતિં સદૈવ ॥ ૪૫॥

વિચાનશાસ્ત્રશ્રુતકાવ્યશિલ્મ-
ગાન્ધર્વસઙ્ગિતકલાભિરામમ્ ।
પુંવીર્યયુક્તઃ પ્રકરોતિ સૌમ્યો
..........કીર્તિમ્ ॥ ૪૬॥

..........
સૌભાગ્યચાતુર્યગુણૈરૂપેતમ્ ।
અશાબલાઢ્યઃ પ્રકરોતિ સૌમ્યઃ
પ્રસન્નમૂર્તિં પ્રથિતં પૃથિવ્યામ્ ॥ ૪૭॥

ચેષ્ટાબલાઢ્યઃ પ્રકરોતિ સૌમ્યઃ
સ્ત્રીવલ્લભં ભૂપયુતં મનુષ્યમ્ ।
સ્વાચારધર્મપ્રચુરં પ્રગલ્ભં
સત્યાધિકં નીતિપરં સદૈવ ॥ ૪૮॥

.......... રાત્રિવીર્યપ્રબલસ્તુ સૌમ્યો
નરં પ્રસૂતે સતતં ધનાઢ્યમ્ ।
મિષ્ટાન્નપાનં પ્રિયગન્ધમાલ્યં
સેવાવિધજ્ઞં સુકૃતોપચારમ્ ॥ ૪૯॥

સ્વવારવીર્યેણ યુતસ્તુ સૌમ્યઃ
કરોતિ મર્ત્યં બહુધર્મશીલમ્ ।
પ્રિયપ્રદાનં પ્રિયદર્શનં ચ
પ્રાજ્ઞં બહુજ્ઞાનવિકીર્ણબુદ્ધિમ્ ॥ ૫૦॥

હોરાબલાઢ્યઃ પ્રકરોતિ સૌમ્યા
નરં નરાણામનિશં હિતોપ્સુમ્ ।
બહુશ્રમક્લેશસહ વિનાત
દુર્ધર્ષમન્યૈઃ પ્રણતારિપક્ષમ્ ॥ ૫૧॥

બુધો યદા પક્ષબલેન યુક્ત-
સ્તદા પ્રસૂતે બહુપક્ષયુક્તમ્ ।
જનપ્રિયં ધર્મપરં સુરૂપં
પ્રમાથિનં વૈરિગણસ્ય સમ્યક્ ॥ ૫૨॥

..........અસવીર્યપ્રબલસ્તુ સૌમ્યઃ
કરોતિ મર્ત્યં બહુવિત્તભાજમ્ ।
દેવદ્વિજેભ્યો નિરતં વિનીતં
..........અસ્વિનં સ્ત્રીસુભગં મનુષ્યમ્ ॥ ૫૩॥

સૌમ્યોઽબ્દવીર્યપ્રબલઃ પ્રસૂતે
નરં કલાકોવિદમદ્ભુતાર્થમ્ ।
સૌ..........
ગાન્ધર્વશિલં પ્રિયનૃત્યહાસ્થમ્ ॥ ૫૪॥

સ્ત્રીહેતુઃ ..........અસ્તિક્ષયક્તિકીર્તિ
જઘન્યરક્તં ચ ન સૌહૃદં ચ ।
સૌમ્યઃ સુહૃદ્વીર્યવિવર્જિતસ્તુ
નરં ઉવાતે વિષયપ્રસક્તમ્ ॥ ૫૫॥

વક્ષેત્રવીર્યેણ વિવર્જિતો જ્ઞઃ
કરોતિ મર્ત્યં વિગતાભિમાનમ્ ।
સ્ત્રીપાનદોષપ્રભવૈરનર્થૈ-
ર્વ્યાધ્યાદિવિદ્વેષયુતં સદૈવ ॥ ૫૬॥

સ્વતુઙ્ગવીર્યેણ વિવર્જિતો જ્ઞો
નરં પ્રસૂતેઽતિનિકૃષ્ટચેષ્ટમ્ ।

પ્રપીડિતં વંશસમુદ્રવૈશ્ચ
દારિરભાજં સતતં  કુચૈલમ્ ॥ ૫૭॥

નવામ્શવીર્યેણ વિવર્જિતો જ્ઞઃ
કઠોરવાક્યં જનયેન્મનુષ્યં
..........એ........સહજાઙ્ગરક્તં
વિગર્હિતં શીલપરિક્રિયાધિઃ ॥ ૫૮॥

શુભગ્રહાલોકનવર્જિતો જ્ઞઃ
કરોતિ મર્ત્યં સુહૃદામનીષ્ટમ્ ।
હિંસાપરં બહ્વૃણમલ્પકોશં
વિરક્તમિત્રં વિકૃતિપ્રગલ્ભમ્ ॥ ૫૯॥

પુંક્ષેત્રવીર્યેણ વિવર્જિતો જ્ઞઃ
કરોતિ ભીરું સતતં હતાશમ્ ।
ખલં વધદ્રોહકૃતાનુબન્..........ં
સ્વાચારસત્યશ્રુતિધર્મહીનમ્ ॥ ૬૦॥

દિગ્વીર્યહીનઃ પ્રકરોતિ સૌમ્યો
નરં હતાશં નયનષ્ટતમ્રમ્ ।
યુધોત્સુકં ચૌરગણાધિપં ચ
ક્રિયાવિહીનં પરદેશરક્તમ્ ॥ ૬૧॥

ચેષ્ટાબ્લેન પ્રવિવર્જિત્પ્ ચો
નરં સવાતેઽતિખલં કુચેષ્ટમ્ ।
શઠં તથા નિષ્ઠુરવાક્યશિલ
વિપન્નદારાત્મજસંઘતન્ત્રમ્ ॥ ૬૨॥

.......... ॥ ૬૩॥

સ્વવારવીર્યેણ વિવર્જિતો જ્ઞો
નરં પ્રસૂતે બહુકષ્ટભાજમ્ ।
.......... રુજ્વસહ્યં વિફલશ્રમાર્ત-
મન્યોન્યવૈરોપહતાત્મજન્તુમ્ ॥ ૬૪॥

હોરાબલેન પ્રવિવર્જિતો જ્ઞો
નરં પ્રસૂતે બહુશત્રુપક્ષમ્ ।

ભોગાન્વિતં દુઃખપરીતવૃત્તં
દ્યૂતપ્રિયં પ્રશ્રયસૌચહીનમ્ ॥ ૬૫॥

સ્વપક્ષવીર્યેણ વિવર્જિતો જ્ઞો
નરં પ્રસૂતે મલિનં સુદીનમ્ ।
પ્રભૂતદોષ સતતં રુજાર્તં
વિહીનપક્ષં બહુતર્કકં ચ ॥ ૬૬॥

સ્વમાસવીર્યેણ વિવર્જિતો જ્ઞઃ
કરોતિ મર્ત્યં કુટિલસ્વભાવમ્ ।
ગુરુદ્વિજાવજ્ઞકરં હિતજ્ઞ
પરાન્નરક્તં કૃપણસ્વભાવમ્ ॥ ૬૭॥

બુધો યદા વર્ષબલેન હીન-
સ્તદા પ્રસૂતે વિધનં મનુષ્યમ્ ।
નાનાર્થનાશૈઃ પરિપિડિતાઙ્ગં
ખલાનુરક્તં ગુરુભક્તિહીનમ્ ॥ ૬૮॥

ઇતિ શ્રીવૃધ્દ્ધયવને બુધચારઃ ॥

---

આધ્યાય ૨૧

ગુરુચારાધ્યાયઃ

મેષે ગુરુર્દેવનરં પ્રસૂતે
દુર્મર્ષણં શૌર્યબલસ્વભવમ્ ।
વિખ્યાતકર્માણમતિપ્રગલ્ભ-
મોજસ્વિનં બુદ્ધિગુણૈરુપેતમ્ ॥ ૧॥

વૃષે ગુરુઃ પાણ્ડુયશઃ પ્રતારં
નરં પ્રસૂતે સુભગં સુવેષમ્ ।
કાન્તં સ્વદારાભિરતં વિનીતં
દેવવિજાચાર્યકૃતોપચારમ્ ॥ ૨॥

તૃતીયરાશૌ ચ સુરેજ્યમન્ત્રી
નૈપુણ્યદાક્ષિણ્યપરં પ્રસૂતે ।
સુમેધસં વાગ્મિનમાહિતાર્થં
કૃપાપરં બુદ્ધિગુણાન્વિતં ચ ॥ ૩॥

તિષ્ઠન્ ગુરુઃ કર્કટકે સુરૂપં
વિદ્વાંસમોજોબલવીર્યયુક્તમ્ ।
પ્રાજ્ઞં પ્રસૂતે પ્રિયધર્મભાજં
યશન્વિતં લોકપુરસ્કૃતં ચ ॥ ૪॥

સિંહં ગતો દેવગુરુઃ પ્રવીરં
નરં પ્રસૂતે સ્થિરહ્..........અસત્ત્વમ્ ।
વિદ્વાંસમાલક્ષ્યમુદારનુગ્ર
શૂરં બહુસ્નિગ્ધસુહૃજ્જનં ચ ॥ ૫॥

ષષ્ઠે ક્રિયાજ્ઞાનવિશુધ્દ્ધબુધ્દ્ધિં
મેધાવિનં કર્મકથાભિરામમ્ ।
શાસ્ત્રાર્થશિલ્પશ્રુતિકાવ્યચિન્તં
સુદર્શનં દેવગુરુઃ પ્રસૂતે ॥ ૬॥

તુલે વિચિત્રાર્થબહુપ્રલાપં
ગુરુઃ પ્રસંખ્યાતધિયં પ્રસૂતે ।
કાન્તં શુભાચારરતં વિનીતં
પ્રાજ્ઞં વણિક્સાર્થમહત્તરં ચ ॥ ૭॥

ગુરૂર્નરં વૃશ્ચિકમભ્યુપેતઃ
ક્ષુદ્રં પ્રસૂતે બહુશત્રુપક્ષમ્ ।
સુહૃચ્છલદ્રોહરતં કુશીલં
પ્રપંચકં હિંસ્રમનિષ્ટદારમ્ ॥ ૮॥

ધનુધરસ્યસ્તુ ગુરુઃ પ્રસૂતે
પ્રિયોપહારંશ્રુતધર્મશીલમ્ ।
યજ્ઞવ્રતાચાર્યમસંસ્થિતાર્થં
દાતારમાર્યં બહુમિત્રપક્ષમ્ ॥ ૯॥

ગુરુર્મૃગે માર્દવમલ્પવીર્યં
નીચક્રિયાચારરતં દુરન્તમ્ ।
મૂર્ખં પરાજ્ઞકરમર્થહીનં
બહુશ્રમં ક્લેશસહં પ્રસૂતે ॥ ૧૦॥

કુમ્ભે તુ જીવઃ નૃશસ

વિદ્વેશશીલં જનયત્યસત્યમ્ ।
કુશિલ્પિનોપાશ્રયકર્કશં ચ
મુખ્યં ગણાનામતિનીચચેષ્તમ્ ॥ ૧૧॥

મીનદ્વયસ્થો ગુરુગૌરવજ્ઞં
ગુરુર્નરં શ્લાઘ્યધનં પ્રસૂતે ।
હૃષ્ટં સ્થિરારમ્ભમનિષ્ટદર્પં
વેદાર્થશસ્ત્રશ્રૂતિકાવ્યવિત્તમ્ ॥ ૧૨॥

હોરાં રવેર્દેવગુરુઃ પ્રયાતઃ
કરોતિ મર્ત્યં બહુરોષયુક્તમ્ ।
લુબ્ધં સ્વવાગ્દોષયુતં સુતીવ્રં
સુગુપ્તપાપં પરતર્કકં ચ ॥ ૧૩॥

ચન્દ્રસ્ય હોરાધિગતઃ સુરેજ્યો
નરં પ્રસૂતે સુભગં મનોજ્ઞમ્ ।
સ્થિરક્રિયારમ્ભધનં શરણ્યં
ધર્મસ્વભાવં દૃઢસૌહૃદં ચ ॥ ૧૪॥

ભાગે તૃતીયે સુરરાજમન્ત્રી
સૂર્યસ્ય સૂતે કૃપણં મનુષ્યમ્ ।
ક્રૂરં ક્રિયાહીનમનપ્રધૃષ્યં
નિન્દ્યં કુકર્માર્જિતસમ્પદં ચ ॥ ૧૫॥

જીવસ્ત્રિભાગે રજનીકરસ્ય
તિષ્ઠન્ પ્રસૂતે સુમનોજ્ઞરૂપમ્ ।
..........અરં પ્રસિદ્ધં બહુમાનવિત્તં
પ્રગલ્ભચિન્તં દ્વિજદેવભક્તમ્ ॥ ૧૬॥

ત્ર્યંશે ગુરુર્ભુમિસુતસ્ય ધત્તો
નૃણાં ભયં બન્ધુજનૈઃ પ્રસૂતે ।
..........આક્ષિરોગં ........
પ્રપોષણં .......... ॥ ૧૭॥

.......... સામસુતસ્ય તિષ્ઠન્
કરોતિ મર્ત્યં પ્રવરં પ્રસિદ્ધમ્ ।
વિદ્યાવિનીતં બહુધર્મસક્તં

સૌમ્યાકૃતિં સૌમ્યગુણૈઃ સમેતમ્ ॥ ૧૮॥

ત્ર્યંશે સ્વકે દેવગુરુઃ પ્રસૂતે
.......... સુશીલ વિજિતારિપક્ષમ્ ।
ક્ષમન્વિતં પાર્થિવમાનયુક્તં
ચતુષ્પદાઢ્ય પ્રણતં ગુરૂણામ્ ॥ ૧૯॥

દ્રેષ્કાણસંસ્થો ભૃગુજસ્ય જીવો
.......... પ્રસૂતે બહુકાંચનાઢ્યમ્ ।
.......... વરર્ત્નયુક્તં
સુખાન્વિતં પાર્થિવવ્લ્લભં ચ ॥ ૨૦॥

રૌદ્રં પરસ્વાપહરં કુબુધિં
કનિષ્ટઃઅકર્માણમમિત્રવન્તમ્ ।
દ્રેષ્કાણસંસ્થો રવિજય જીવો
નરં પ્રસૂતે બહુશોકભાજમ્ ॥ ૨૧॥

પ્રેષ્યઃ કુકર્માતિખલસ્વભાવો
ધનૈર્વિહીનસ્ત્વથ મન્દસત્ત્વઃ ।
નવાંશકે વાસરપસ્ય જીવો
યદા તદા સ્યાન્મનુજઃ પ્રચણ્ડઃ ॥ ૨૨॥

નવાંશકે રાત્રિપતેઃ સુરેજ્ય-
સ્તિષ્ઠન્ પ્રસૂતે સુભગં મનુષ્યમ્ ।
પ્રિયાતિથિં પ્રીતિકરં નરાણાં
પ્રસન્નચિન્તં પ્રમદાસ્વભીષ્ટમ્ ॥ ૨૩॥

મુખાદિરોગં વ્યસનોપતપ્તં
ભાયાન્વિતં પાપરતં પ્રકામમ્ ।
નવાંશકે ભૂમિસુતસ્ય જીવ-
સ્તિષ્ઠન્ પ્રસૂતેઽતિખલં મનુષ્યમ્ ॥ ૨૪॥

બુધસ્ય ભાગે નવમ સુરેજ્ય-
સ્તિષ્ઠન્ પ્રસૂતે સદયં મનોજ્ઞમ્ ।
વિત્તાન્વિતં ધર્મપરં સુવેષં
શાસ્ત્રાર્થરક્તં સુતસૌખ્યયુક્તમ્ ॥ ૨૫॥

જીવો નવાંશે વિચરન્ સ્વકીયે
કરોતિ મર્ત્યં નૃપતુલ્યવેષમ્ ।
પુત્રાન્વિતં શુદ્ધકલત્રયુક્તં
શાસ્ત્રાર્થયુક્તં સુજનાર્થવન્તમ્ ॥ ૨૬॥

શુક્રસ્ય ભાગે નવમે સુરેજ્ય-
તિષ્ઠન્ પ્રસૂતે સુખિનં મનુષ્યમ્ ।
તેજસ્વિન કીર્તિકરં કૃતજ્ઞં
પુણ્યાત્મકં ધર્મરતં સદૈવ ॥ ૨૭॥

ભારાક્ષિરોગવ્યસનૈઃ સમેતં
પ્રિયાવિહીનં વિગતપ્રતાપમ્ ।
નવાંશકસ્થોરવિજ્યસ્ય જીવો
નરં સુવાતે નૃપપીડિતં ચ ॥ ૨૮॥

સૂર્યાંશકે વાસરપય જીવો
નરં પ્રસૂતે વિધનં વિરૂપમ્ ।
અકીર્તિવન્તં બહુશત્રુપક્ષં
મિત્રૈર્વિયુક્તં વિસુખં વિશીલમ્ ॥ ૨૯॥

સૂર્યાંશકે દેવગુરુઃ પ્રસૂતે
ચન્દ્રસ્ય તિષ્ઠન્ ધનિનં મનુષ્યમ્ ।
પ્રિયાતિથિં પુત્રસુતાર્થયુક્તં
ભૂપાલપૂજ્યં દયિતં જનાનામ્ ॥ ૩૦॥

બૃહસ્પતિર્દ્વાદશભાગસંસ્થો
ભૌમસ્ય સૂતે પ્રખલં મનુષ્યમ્ ।
વિધર્મશીલં વ્યસનૈરુપેતં
રોગાર્દિતં બન્ધનભાગન ચ ॥ ૩૧॥

અર્કાંશસંસ્થઃ શશિજસ્ય જીવો
નરં પ્રસૂતે પ્રથિતં નૃલોકે ।
સત્યાધિકં સર્વગુણૈરૂપેતં
પ્રભુપ્રિયં બન્ધુજનસ્ય નિત્યમ્ ॥ ૩૨॥

અર્કાંશકે વે પ્રકરોતિ જીવ-
સ્તિષ્ઠન્ નરં સર્વસમૃદ્ધિમતમ્ ।

પુષ્ટં જિતારિં ભયરોહયુક્તં
રામાસ્વભીષ્ટં સતતં સુશિલમ્ ॥ ૩૩॥

જીવો ભૃગોર્દ્વાદશભાગસંસ્થો
નરં પ્રસૂતે હયકાંચનાઢ્યમ્ ।
પ્રિયાતિથિં ભોગિનમાર્યશીલં
પ્રમાથિનં વૈરિજનય નિત્યમ્ ॥ ૩૪॥

સૂર્યાંશકે ભાસ્કરનન્દન
જીવઃ કુચૈલં કુરુતે મનુષ્યમ્ ।
દીનં વિરૂપં બહુદુઃખભાજં
પ્રપીડિતં દસ્યુભિરેવ ભૂપૈઃ ॥ ૩૫॥

..........
નરં પ્રસૂતે કુટિલં મનુષ્યમ્ ।
હીર્ષ્યાપરં પીડિતલોકવર્ગં
વિહીનશિલં પરવાદરક્તમ્ ॥ ૩૬॥

ત્રિમ્શલ્લવે સૂર્યસુતસ્ય જીવ-
સ્તિષ્ઠન્ વિધત્તે વિભૃતં ..........મ્ ।
પાપાનુરક્તં પરદારશીલં
સ્વબન્ધુહીનં કુટિલસ્વભાવમ્ ॥ ૩૭॥

ત્રિંશાંશકે સ્વે સુરરાજમન્ત્રી
મનીષિણં વાક્યતુરં કરોતિ ।
મર્ત્યં સુરક્તં દ્વિજદેવભક્તં
સન્તુષ્ટચિન્તં સતતં સુશિલમ્ ॥ ૩૮॥

ત્રિંશાંશકે સોમસુતસ્ય જીવઃ
કરોતિ વિજ્ઞં સતતં મનુષ્યમ્ ।
અધ્યાત્મવિધાગમસક્તચિન્તં
ક્ષમાન્વિતં બ્રહ્મવિદાં વરિષ્ઠમ્ ॥ ૩૯॥

ત્રિંશાંશકે ભાર્ગવનન્દનસ્ય ..........
જીવશ્ચરન્ વિત્તયુતં વિધત્તે ।
નરં વિનીતંઉતલાભયુક્તં
સ્ત્રીણામભીષ્ટં નૃલોકમાન્યમ્ ॥ ૪૦॥

સુહૃદ્બલી દેવગુરુઃ પ્રસૂતે
નરં વિનીતં સતતં સુશીલમ્ ।
ખ્યાતં સ્થિરસ્ફીતધનં સુમિત્રં
સદ્વૃત્તયુક્તં ચ તથા જિતારિમ્ ॥ ૪૧॥

વક્ષેત્રવીર્યેણ યુતઃ સુરેજ્યો
નરં પ્રસૂતે ગુણશીલવન્તમ્ ।
મેધાવિનં દેવગુરુપ્રસક્તં
પ્રખ્યાતકર્માણમનલ્પવીર્યમ્ ॥ ૪૨॥

સ્વતુઙ્ગવીર્યેણ યુતઃ સુરેજ્યઃ
કરોતિ નાનાર્થયુતં મનુષ્યમ્ ।
.......... ર્વશિલ્પવ્યવહારકાવ્ય-
માધુર્યદાક્ષિણ્યપતું દયાલુમ્ ॥ ૪૩॥

.......... ॥ ૪૪॥

શુભગ્રહલોકનવીર્યયુક્તો
જીવો વિધત્તે વિરુજં મનુષ્યમ્ ।
પાપૈરનાર્થૈઃ પ્રખલૈર્વિરુધ્યે-
દભ્યર્ચિતં જ્ઞાતિભિરેવ ભૂપૈઃ ॥ ૪૫॥

પુંક્ષેત્રવીર્યેણ યુતસ્તુ જીવો
ગામ્ભીર્યધૈર્યપ્રવરં મનુષ્યમ્ ।
ચતુષ્પદાઢ્યં કુલદૈવમુખ્યં
સુધર્મશીલં નૃપવલ્લભં ચ ॥ ૪૬॥

બૃહસ્પતિર્દિગ્બલવાન્ પ્રસૂત
સુપણ્ડિતં ભૂરિગુણૈઃ સમેતમ્ ।
વસ્ત્રાન્નપાનૈઃ સહિતં મનોજ્ઞં
ગતાતિપક્ષં ગતસાધ્વસં ચ ॥ ૪૭॥

ચેષ્ટાબલાઢ્યઃ સરરાજમન્ત્રી
..........તિષ્ઠં સંજનયેન્મનુષ્યમ્ ।
મન્ત્રાન્વિતં સૌરતલબ્ધસૌખ્યં
શૂરં મહાશ્વાનયુતં સહિષ્ણુમ્ ॥ ૪૮॥

દેવાબલાઢ્યઃ પ્રકરોતિ જીવો
નરં પ્રસિદ્ધં બહુવિત્તયુક્તમ્ ।
પ્રસન્નમૂર્તિં પ્રણતારિપક્ષં
સુખાન્વિતં તન્ત્રવિદાં વરિષ્ઠમ્ ॥ ૪૯॥

સ્વવારવીર્યેણ યુતસ્તુ જીવો
વિદ્યાધિકં સંજનયેન્મનુષ્યમ્ ।
સ્ત્રીલાભયુક્તં સુજનાનુકૂલં
પ્રિયંવદં સર્વકલાસુ દક્ષમ્ ॥ ૫૦॥

ગુરુર્યદા વર્ષબલેણ યુક્ત-
સ્તદા પ્રસૂતે સુભગં મનુષ્યમ્ ।
અત્યાર્યશીલં બહુવીર્યયુક્તં
ચેષ્ટં નૃપાણાં પ્રચુરાન્નપાનમ્ ॥ ૫૧॥

સ્વમાસવીર્યેણ યુતઃ સુરેજ્ય
કરોતિ મર્ત્યં સુભગં કૃતજ્ઞમ્ ।
કાન્તં વિનીતં પ્રચુરાઙ્ગનાઢ્યં
સ્વબન્ધુપૂજ્યં સતતં ધનાઢ્યમ્ ॥ ૫૨॥

હોરાબલાઢ્યઃ પ્રકરોતિ જીવો
નરં મહાજ્ઞાનયુતં પશાન્તમ્ ।
વિજ્ઞાનશાસ્ત્રશ્રુતસૌખ્યયુક્તં
પ્રિયાતિથિં માનધનૈઃ સમેતમ્ ॥ ૫૩॥

જીવો યદા પક્ષબલેન યુક્તો
નરં પ્રસૂતેઽતિબલં કૃતજ્ઞમ્ ।
વિધાન્વિતં સર્વસુખાધિવાસં
રત્નાન્વિતં વાજિગજૈરુપેતમ્ ॥ ૫૪॥

જીવો યદા મિત્રબલેન હીન-
સ્તદા પ્રસૂતે કૃપણં મનુષ્યમ્ ।
શત્રુપ્રહાર જ્વરપાનદોષ
સ્ત્રીરોગબન્ધાદિનિપીડિતાઙ્ગમ્ ॥ ૫૫॥

સ્વસ્થાનવીર્યેણ વિવર્જિતસ્તુ

જીવઃ પ્રસૂતે કઠિનસ્વભાવમ્ ।
મૃતાઙ્ગનં કુક્ષિરુગાર્તદેહં
મિત્રૈર્વિહીનં ભયવિક્લવં ચ ॥ ૫૬॥

જીવોશ્વવીર્યેણ વિવર્જિતસ્તુ
કરોતિ નીચપ્રકૃતિં મનુષ્યમ્ ।
પુત્રાર્થહીનં કઠિનં કૃતઘ્નં
પ્રપીડિતં પાર્થિવચૌરસંઘૈઃ ॥ ૫૭॥

નવાંશવીર્યેણ વિવર્જિતસ્તુ
સુરેન્દ્રમન્ત્રી કુરુતે ભયાર્તમ્ ।
પામાદિરોગૈઃ સહિતં ..........
બુદ્ધ્યા વિહીનં વિસુખં સશોકમ્ ॥ ૫૮॥

શુભગ્રહાલોકનવીર્યહીનો
જીવઃ પ્રસુતેઽતિકુરૂપદેહમ્ ।
સ્વબન્ધુહીનં જઠરસ્વભાવં
વૈરપ્રિયં ક્રોધપરં કુશિલમ્ ॥ ૫૯॥

પુંવીર્યહીનઃ સુરરાજમન્ત્રી
નરં પ્રસૂતે લલનસ્વભાવમ્ ।
ભીરું શઠં નૈકૃતિકપ્રકારં
શ્લેષ્માત્મદેહં વૃજિનાત્મકં ચ ॥ ૬૦॥

દિગ્વાયહિનઃ કુરુતે સુરેજ્યા
નરં વિહીનં ધનધાન્યજાતૈઃ ।
વિદેશરક્ત પ્રચલસ્વ ..........
..........નિત્યમ્ ॥ ૬૧॥

ચેષ્ટાબલેનૈવ વિના સુરેજ્યઃ
કરોતિ પાપાત્મકમુગ્રરૂપમ્ ।
..........
સમ્પીડ્યતે વા નૃપતિર્મનુષ્યૈઃ ॥ ૬૨॥

કરોતિ જીવો દ્યુબલેન હીનો
નરં પ્રકૃત્યા પિશુનસ્વભાવમ્ ।
કન્યાપ્રજં વાતરુજાભિતપ્તં

નીચારિવિદ્વેષવિવૃધ્દદોષમ્ ॥ ૬૩॥

સ્વવારવીર્યેણ વિના સુરેજ્યો
નરં પ્રસૂતે પરિભૂતવીર્યમ્ ।
પિત્તાગ્નિદાહજ્વરશસ્ત્રચૌરૈઃ
પ્રપીડિતં ધર્મવિવર્જિતં ચ ॥ ૬૪॥

સ્વવર્ષવીર્યેણ વિના સુરેજ્યઃ
કરોતિ મર્ત્યં ધનબુદ્ધિહીનમ્ ।
કૃશં કૃતઘ્નં ચપલસ્વભાવં
કફાનિલાભ્યં સતતં ચ યુક્તમ્ ॥ ૬૫॥

વિવર્જિતો માસબલેન જીવઃ
કરોતિ મિથ્યાત્મકમુગ્રરૂપમ્ ।
પરાપવાદેષૂ રતં કૃતઘ્નં
પરાન્નરક્તં પરયોષિતાઢ્યમ્ ॥ ૬૬॥

કરોતિ હોરાબલહાનમૂર્તિઃ
સુરેજ્ય.......... બહુશાઠ્યયુક્તમ્ ।
ગતત્રપં હીનબલં કુરૂપં
વધાત્મકં શઙ્કરકારકં ચ ॥ ૬૭॥

બૃહસ્પતિઃ પક્ષબલેન હીનઃ
કરોતિ મર્ત્યં નિજપક્ષહીનમ્ ।
રોગાભિભૂતં પ્રવિહીનસત્યં
પ્રભૂતશત્રુપરદારરક્તમ્ ॥ ૬૮॥

ઇતિ શ્રીવૃધ્દ્યવને ગુરુચારઃ ॥

---

આધ્યાય ૨૨

શુક્રચારાધ્યાયઃ

મેષે તુ શુક્રો જનયત્યશાન્ત..........
નરં બહુક્ષોધવિરોધશીલમ્ ।
.......... પરસ્ત્રીહરણે પ્રસક્તં
સેર્ષ્યં વનારણ્યવિચારણં ચ ॥ ૧॥

વૃષે બહુસ્ત્રીસુતરત્નમાઢ્યં
..........આતં પ્રસૂતે ભૃગુજઃ સુમૂર્તિમ્ ।
સ્વબન્ધુધર્તારમનેકવીર્યં
કૃષીબલં ગોકુલજીવનં ચ ॥ ૨॥

નિષેવમાનો મિથુને પ્રસૂતે
શુક્રો નરં વાઃમિનમુર્જિતં ચ ।
સુર્દ્વિજાતિથ્યપરં કૃતજ્ઞં
વિજ્ઞાનશાસ્ત્રાર્થકથારતં ચ ॥ ૩॥

ચતુર્થરાશૌ યદિ ષોડશાર્ચિ-
સ્તિષ્ઠન્ પ્રસૂતે રતિધર્મશીલમ્ ।
પ્રાજ્ઞં શ્રુતિજ્ઞાનવિદાં વરિષ્ઠં
મૃદુસ્વભાવં પ્રિયદર્શનં ચ ॥ ૪॥

સિંહાશ્રિતસ્તુ પ્રિયબન્ધુપક્ષં
શુક્રં પ્રસૂતે નરમત્મસહ્યમ્ ।
વિચિત્રસૌખ્યવ્યસનં સુરૂપં
ગુરુદ્વિજાચારપારયણં ચ ॥ ૫॥

કન્યાં ગતો માર્દવમલ્પવિત્તં
શુક્રઃ પરોપાસનજીવિતં ચ ।
સ્ત્રીભૂષણજ્ઞં રતિગેયકાવ્ય-
કલાલિપિજ્ઞં મધુરં ચ કુર્યાત્ ॥ ૬॥

તુલાધરસ્થો ભૃગુસૂનુરાઢ્યં
નરં પ્રસૂતેઽર્થવિરાજપણ્યમ્ ।
વિચિત્રમાલ્યામ્બરમાત્મવશ્યં
બહુપ્રવાસં શ્રમલબ્ધવિત્તમ્ ॥ ૭॥

શુક્રોઽષ્ટમક્ષેત્રગતો નૃશંસં
વિદ્વેષશીલં જનયત્યહન્યમ્ ।
પ્રદ્વિષ્ટદુષ્ટ પ્રાતલોમ..........
શઠં પરસ્ત્રીષ્વનયપ્રપંચમ્ ॥ ૮॥

.......... રસ્થો વિગતાર્થવિઘં
શુક્રઃ પ્રસૂતેઽતિવિલક્ષશબ્દમ્ ।

સધર્મકામાચફલરુપત
ગતન્પ્રિયં કાન્તમનલ્પસૌખ્યમ્ ॥ ૯॥

કુર્વીત રાશૌ દશમે મનુષ્યં
શુક્રો બહુક્લેશભયશ્રમાર્તમ્ ।
નૈશૂન્યલોભાશ્રિતવંચનાનાં
પ્રયોગિણં ક્લિવવિપન્નચેષ્તમ્ ॥ ૧૦॥

શુક્રશ્ચરન્ કુમ્ભધરે મનુષ્ય-
મુદ્યોગરોગવ્યસનોપતપ્તમ્ ।
કર્મસ્વસમ્પન્નફલેષુ સક્તં
કુર્યાદ્વિરુદ્ધં ગુરુભિઃ સુતૈશ્ચ ॥ ૧૧॥

મીનદ્વયસ્થો જનયત્યુદારં
શુક્રઃ શ્રુતિજ્ઞાનરતં મનુષ્યમ્ ।
દિગ્બુદ્ધિકર્મપ્રચુરં સુરુપં
નૃપપ્રિયં સજ્જનમાનલબ્ધમ્ ॥ ૧૨॥

હોરાં ગતો વાસરપસ્ય શુક્રઃ
કરોતિ મૂર્ખં વિધનં વિશીલમ્ ।
હિંસાનૃતસ્તેયરતં પ્રકામં
પૈશૂન્યયુક્તં ચ વિધર્મશીલમ્ ॥ ૧૩॥

હોરાં ગતો રાત્રિપતેસ્તુ શુક્રઃ
સતાં પ્રિયં સ્ફીતધનં કરોતિ ।
ગાન્ધર્વલીલાશ્રુતિગીતરક્તં
વિપ્રપ્રિયં પાર્થિવવલ્લભં ચ ॥  ૧૪॥

દ્રેષ્કાણસંસ્થો દિનપસ્ય શુક્રો
નરં પ્રસૂતે કઠિનં ગતસ્વમ્ ।
કુયોષિતામાગતસૌખ્યયુક્તં
ક્ષુદં નૃશંસં બહુરોષિણં ચ ॥ ૧૫॥

તૃતીયભાગે શશલાંછનસ્ય
તિષ્ઠન્ ભૃગુઃ સૌખ્યયુતં પ્રસૂતે ।
વિદ્યાવિનીતં પિતૃમાતૃભક્તં
તપસ્વિનં ધર્મપરં કૃતજ્ઞમ્ ॥ ૧૬॥

તૃતીયભગે ધરણીસુતસ્ય
શુક્રશ્ચરન્ પાપરતં કરોતિ ।
ક્ષુદ્રોગવન્ત વ્યસનરૂપેત
માયાવિનં વંચનતસ્પરં ચ ॥ ૧૭॥

દ્રેષ્કાણસંસ્થઃ શશિજસ્ય શુક્રો
નરં પ્રસૂતે સુભગ મનોજ્ઞમ્ ।
રતપ્રગલ્ભં પ્રિયપૂર્તદારં
સુવર્ણરત્નાત્મજભાગિનં ચ ॥ ૧૮॥

ભાગે તૃતીયે સુરપૂજિતસ્ય
શુક્રશ્ચરન્ શ્રેષ્ઠતમં સુરૂપમ્ ।
સત્યાન્વિતં સર્વકલાસુ દક્ષં
ક્ષમાન્વિતં પ્રીતિકરં જનાનામ્ ॥ ૧૯॥

ત્ર્યંશે સ્વકીયે ભૃગુજઃ પ્રસૂતે
નરં પ્રગલ્ભં ધનિનં સુશિલમ્ ।
અધ્યાત્મવિદ્યાનિરતમ્ સુરૂપં
.......... ર્વિહીનમ્ ॥ ૨૦॥

..........ગ તૃતીયે રવિજસ્ય શુક્રઃ
કરોતિ મર્ત્યં વધબન્ધુરક્તમ્ ।
સ્વબન્ધુહીનં પરદારરક્તં
વિદ્વેશશીલં સતતં કુસેવ્યમ્ ॥ ૨૧॥

નવાંશથો દિનપસ્ય શુક્રઃ
કરોતિ મર્ત્યં વિકલં સુભીરુમ્ ।
બહુદ્વિષં નિઃક્રિયમલ્પવીર્યં
પ્રપંચયુક્તં ગતસત્ત્વસૌખ્યમ્ ॥ ૨૨॥

નવામ્શકે ભાર્ગવનન્દનસ્તુ
ચન્દ્ર ધત્તે તનયં નરાણમ્ ।
સદ્યોષિતં વા ધનધાન્યલાભં
રિપુક્ષયં બન્ધુસમાગમં ચ ॥ ૨૩॥

નવાંશકે ભૂમિસુતસ્ય શુક્રો

નરં પ્રસૂતે રુધિરર્દિતાઙ્ગમ્ ।
પ્રપીડિતં દસ્યુનૃપૈઃ સદિવ
પ્રદ્વેષશીલં નિકૃતિપ્રિયં ચ ॥ ૨૪॥

બુધસ્ય ભોગે નવમે તુ શુક્રઃ
કરોતિ મર્ત્યં વિબુધં સુધર્મ્યમ્ ।
તીર્થાશ્રયં દેવગુરુપ્રસક્તં
પ્રિયાતિથિં સંનિયમૈરુપેતમ્ ॥ ૨૫॥

શુક્રો નવાંશે સુરપૂજિતસ્ય
કરોતિ મર્ત્યં પ્રણતં દ્વિજાનામ્ ।
વિવેકવિધગમશસ્ત્રલુ ..........
નૃપપ્રિયં મિત્રવરૈઃ સમેતમ્ ॥ ૨૬॥

નવાંશકે સ્વે ભૃગુજઃ પ્રસૂતે
અધ્યાત્મવિક્ષાનિરતં મનુષ્યમ્ ।
સ્વધર્મપૂજ્યં સુધિયા સમેતં
હતારિપક્ષં વ્રતશીલિનં ચ ॥ ૨૭॥

સ્થિતો નવાંશેઽર્કસુતસ્ય શુક્રો
નરં પ્રસૂતે સરુજં સદુઃખમ્ ।
ભાર્યાસ્ત્તર્થૈઃ પરિવર્જિતં ચ
પ્રપીડિતં નીચજનૈર્વિશેષાત્ ॥ ૨૮॥

સૂર્યાંશકે વાસરપસ્ય શુક્રઃ
કરોતિ દિનં ન ચ દીર્ઘસૂત્રમ્ ।
..........ધા વિહીનં સુજનૈર્વિમુક્તં
..........દ્રોહાત્મકં વાદરતં નૃશંશમ્ ॥ ૨૯॥

શુક્રોઽર્કભાગે શશલાંછનસ્ય
નરં પ્રસૂતે વરયાનભાજમ્ ।
નૃપપ્રિયં ભોગિનમર્થવન્તં
વિહારવાપીકરણેષુ સક્તમ્ ॥ ૩૦॥

..........ઊ........ શુક્રો
વિદેશરક્તં મનુજં પ્રસૂતે
દ્યૂતપ્રિયં યુધ્દ્ધપરં કૃતઘ્નં

વિવેકહીનં પરદારભાજમ્ ॥ ૩૧॥

સૂર્યાંશકે સોમસુતસ્ય શુક્રો
નરં પ્રસૂતે સુભગં મનોજ્ઞમ્ ।
સ્થાનાર્થમાનૈઃ સહિતં પ્રસિધ્ધં
વિધાર્જને તત્પરમલ્પદોષમ્ ॥ ૩૨॥

સૂર્યાંશકસ્થઃ સુરપૂજિતસ્ય શુક્રઃ
કરોત્યાર્યમતિં સુદાનમ્ ।
સન્માનસૌહદસુખાથયુક્તં
વિચિત્રભોગં દ્રવિણોપપનમ્ ॥ ૩૩॥

સૂર્યાંશકે સ્વે ભૃગુજઃ પ્રસૂતે
વિચિત્રવાભ્યં રતિગેયરક્તમ્ ।
ધર્માર્થકામૈઃ સહીતં સુવિચં
નૃપપ્રધાનં્ નિજબન્ધુમાન્યમ્ ॥ ૩૪॥

અર્કાંશકે સૂર્યસુતસ્ય શુક્ર-
સ્તિષ્ઠન્ પ્રસૂતે સુખભાગ્યહીનમ્ ।
નાપાત્મકં શત્રુવિવર્જિતં ચ
પ્રવાસિનં વ્યાધિભિરર્દિતં ચ ॥ ૩૫॥

ત્રિંશાંશકે ભૂમિસુતસ્ય શુક્ર-
સ્તિષ્ઠન્ પ્રસૂતે સુરુજં મનુષ્યમ્ ।
પિત્તાર્દિતં સજ્વરમલ્પવીર્યં
સ્વનીચયુક્તં બહુના યથોક્તમ્ ॥ ૩૬॥

ત્રિંશલ્લવે સૂર્યસુતસ્ય શુક્ર-
સ્તિષ્ઠન્ પ્રસૂતે બહુદોષખિન્નમ્ ।
હતાત્મકં બન્ધુવિયોગયુક્તં
પ્રપંચશીલં ગતસત્યશૌચમ્ ॥ ૩૭॥

ત્રિંશાંશકે દેવપુરોહિતસ્ય
શુક્રશ્ચરન્ દેવરતં પ્રસૂતે ।
સુધર્મશીલં સુજનાપ્તતોષં
નરેન્દ્રપૂજ્યં વ્રતચારિણં ચ ॥ ૩૮॥

ત્રિંશાંશકે સોમસુતસ્ય શુક્ર-
સ્તિષ્ઠન્ પ્રસૂતે સવપું મનુષ્યમ્ ।
સૌમ્યં ધનાઢ્યં વરદારયુક્તં
હસ્ત્યશ્વભાજં નૃપવલ્લભં ચ ॥ ૩૯॥

ત્રિંશલ્લવે સ્વે ભૃગુજઃ પ્રસૂતે
નરં વિનીતં ધનધાન્યવન્તમ્ ।
તુલાધિકં કીર્તિકરં સુવિશ્વં
હાસ્ત્યે રતં કેલિકરં પ્રસહ્યમ્ ॥ ૪૦॥

શુક્રો યદા મિત્રબલેન યુક્ત-
સ્તદા પ્રસૂતે બહુમિત્રયુક્તમ્ ।
પ્રિયાતિથિં દેવગુરુપ્રસક્તં
પ્રભાવૈશ્વર્યગુણૈઃ સમેતમ્ ॥ ૪૧॥

સ્વસ્થાનવીર્યેણ યુતસ્તુ શુક્રઃ
કરોતિ મર્ત્યં પુરુષપ્રધાનમ્ ।
સ્વથાનપૂજ્યંપ્રમદાસ્વભીષ્ટં
પ્રસન્નચિન્તં ધૃતિનાધિપં ચ ॥ ૪૨॥

સ્વતુઙ્ગવીર્યેણ યુતસ્તુ શુક્રઃ
કરોતિ મર્ત્યં બહુકીર્તિભાજમ્ ।
પુણ્યાત્મ્ક સત્યસમૃદ્ધિમન્તં
ચતુષ્પદાઢ્યં પ્રિયદર્શનં ચ ॥ ૪૩॥

નવામ્શવીર્યેણ યુતસ્તુ શુક્રઃ
કરોતિ મર્ત્યં વિજિતારિપક્ષમ્ ।
યશપ્રિયં દાનપ્રિં પ્રસિદ્ધં
નિર્મુક્તદોષં સ્વકુલપ્રધાનમ્ ॥ ૪૪॥

શુભગ્રહાલોકનવીર્યયુક્તઃ
શુક્રઃ પ્રસૂતે શુભકર્યમગ્ન્યમ્ ।
રોગૈર્વિમુક્તં પ્રણતારિપ..........
પ્રિયાતિથિં સર્વસુખૈઃ સમેતમ્ ॥ ૪૫॥

સ્ત્રીક્ષેત્રવીર્યપ્રબલસ્તુ શુક્રઃ
કરોતિ મર્ત્યં બહુયોષિતાઢ્યમ્ ।

સૌભાગ્યસૌન્દર્યયુતં સુકાન્તં
નાનાર્થલાભૈઃ સહિતં સદૈવ ॥ ૪૬॥

આશાબલાઢ્યઃ પ્રકરોતિ શુક્રો
નરં પ્રસન્નં ગતશત્રુપક્ષમ્ ।
દિગ્દેશવિખ્યાતિયુતં સુતાઢ્યં
પ્રભૂતવિત્તં ચ સદા પ્રિયમ્ ॥ ૪૭॥

ચેષ્ટાબલાઢ્યઃ પ્રકરોતિ શુક્રો
નરં પ્રસન્નધુતિમલ્પપાપમ્ ।
..........શ્ચયુક્ત ગુરુવ્........
ભયૈર્વિયુક્તં સુતલાભયુક્તમ્ ॥ ૪૮॥

.......... ॥ ૪૯॥

.......... વારબલેન યુક્ત-
સ્તદા પ્રસૂતે મહજસ્વભામ્ ।
વિજ્ઞાનશીલં બહુશાસ્ત્રરક્તં
સુધર્મશીલં હતશત્રુપક્ષમ્ ॥ ૫૦॥

કરોતિ શુક્રોઽબ્દબલેન યુક્તઃ
પ્રિયાતિથિં સૌખ્યયુતં મનુષ્યમ્ ।
..........વ્યસનરુપેત ........
નૃપપ્રિયં બ્રહ્મણસંમતમ્ ચ ॥ ૫૧॥

શુક્રો યદા માસબલેન યુક્ત-
સ્તદા પ્રસૂતે સુભગં જિતારિમ્ ।
ચતુષ્પદાછાદનભોજનાધૈઃ
સમન્વિતં અર્વસમૃધિમન્તમ્ ॥ ૫૨॥

હોરાબલાઢ્યઃ પ્રકરોતિ શુક્રો
નરં સુશીલં પ્રિયવાક્યદક્ષમ્ ।
મહાજનૈઃ પૂજિતમેવ નિત્યં
પ્રસન્નમૂર્તિં પ્રિયદર્શનં ચ ॥ ૫૩॥

શુક્રો યદા પક્ષબલેન યુક્ત-
સ્તદા પ્રસૂતે વિજિતારિપક્ષમ્ ।

સ્વપક્ષમાન્યં બહુધર્મયુક્તં
પ્રિયાગમં સઙ્ગમલબ્ધસૌખ્યમ્ ॥ ૫૪॥

શુક્રો યદા મિત્રબલેન હીન-
સ્તદા પ્રસૂતે વિધનં મનુષ્યમ્ ।
મિત્રૈર્વિહીનં બહુદુઃખશોકૈ-
રૂપદ્રુત પાર્થિવપીડિતં ચ ॥ ૫૫॥

સ્વક્ષેત્રવીર્યેણ વિવર્જિતસ્તુ ..........
શુક્રઃ પ્રસૂતેઽતિખલં વિશીલમ્ ।
દુષ્ટાઙ્ગનાસખ્યરત કુરૂપ
વિધર્મિણં પાપરતં કૃતઘ્નમ્ ॥ ૫૬॥

તુઙ્ગવીર્યેણ વિવર્જિતસ્તુ
શુક્રઃ પ્રસૂતે મલિનં સપાપમ્ ।
નીચાનુરક્તં પર્દારલુબ્ધં
હિંસ્રં મહાવ્યાધિભિરર્દિતં ચ ॥ ૫૭॥

નવાંશવીર્યેણ વિવર્જિતસ્તુ
શુક્રઃ પ્રસૂતેઽતિકઠોરચિન્તમ્ ।
ભયાનુરં સત્યધનિર્વિહીનં
વિદ્વેષશીલં ગતસૌહૃદં ચ ॥ ૫૮॥

શુભગ્રહાલોકનવીર્યહીનઃ
શુક્રઃ પ્રસૂતે પરિભૂતદેહમ્ ।
વિકર્મરક્તં સતતં ..........
પ્રપીડિતં પાર્થિવદસ્યુભિશ્ચ ॥ ૫૯॥

સ્ત્રીક્ષેત્રવીર્યેણ વિવર્જિતસ્તુ
કરોતિ શુક્રઃ પ્રખલં મનુષ્યમ્ ।
નરાપવાદાત્મકમલ્પસૌખ્યં
સ્ત્રિયા વિયુક્તં બહુહાનિયુક્તમ્ ॥ ૬૦॥

આશાબલેનિવ વિવર્જિત..........
શુક્રઃ પ્રસૂતે પરદેશરક્તમ્ ।
ભાગ્યૈર્વિહીનં જઠરં કૃતઘ્નં
માયાવિનં સાધુજનૈર્વિહીનમ્ ॥ ૬૧॥

ચેષ્ટાબલેનૈવ વિવર્જિતસ્તુ
શુક્રઃ પ્રસૂતે વધબન્ધુરક્તમ્ ।
ક્રૂરં કુકર્માશ્રિતમલ્પસત્યં
પ્રભૂતશત્રું ધનદારહીનમ્ ॥ ૬૨॥

શુક્રો યદા વાસરવીર્યહીનઃ
કરોતિ મર્ત્યં સતત કુચૈલમ્ ।
ચૌરપ્રદુષ્ટં બહુદુષ્ટસઙ્ગં
વીર્યપ્રયુક્તં બહુવિહ્વલં ચ ॥ ૬૩॥

શુક્રો યદા વારબલેન હીન-
પ્રસૂતે હતશત્રુદારમ્ ।
સત્યેન હીનં પરિભૂતમન્યૈઃ
સદા સશોકં સ્વજનૈર્વિયુક્તમ્ ॥ ૬૪॥

કરોતિ શુક્રોઽબ્દબલેન હીનો
નરં નિકૃષ્ટં કુટિલસ્વભાવં
વિત્તૈર્વિહીનં ગતબન્ધુવર્ગં
પ્રવાસશિલં કલહપ્રિયં ચ ॥ ૬૫॥

શુક્રો યદા માસબલેન હીન-
સ્તદા પ્રસૂતે વૃજિનૈઃ સમેતમ્ ।
વિવાદશીલં વ્યસનૈઃ પ્રતપ્તં
..........બાહ્યમ્ સાધુજનસ્ય ॥ ૬૬॥

હોરાબલનૈવ વિવર્જિતસ્તુ
શુક્રઃ પ્રસૂતે મતિસત્યહીનમ્ ।
લજ્જાવિયુક્તં વિધનં કુચૈલં
પરાઙ્મુખં દેવગુરુદ્વિજાનામ્ ॥ ૬૭॥

શુક્રો યદા પક્ષબલેન હીન-
સ્તદા પ્રસૂતે પુરુષં ગતસ્વમ્ ।
અનાર્યશીલં ગતમાનલભં
ભયાતુરં કાપુરુષં સજિહ્મમ્ ॥ ૬૮॥

ઇતિ શ્રીવૃધ્દ્ધયવને શુક્રચારઃ ॥

આધ્યાય ૨૩

શનૈશ્ચરચારાધ્યાયઃ

મેષેऽર્કસૂનુર્જનયત્યનાર્યં
કુવેષમાધિવ્યસનં શ્રમાર્તમ્ ।
ગતાશ્રિયં નિષ્ઠુર..........ઉ........
વિગર્હિતં નિર્ધનમિષ્ટવૈરમ્ ॥ ૧॥

..........અસઙ્ગતિમર્થહીનં
વૃષેऽર્કસૂનુર્જનયેન્મનુષ્યમ્ ।
અસક્તકર્માણમયુક્તવાક્યં
વૃદ્ધાઙ્ગનાનાં હૃદયાનુરાગમ્ ॥ ૨॥

ક્રમાદ્ગતોऽર્કિર્મિથુને પ્રસૂતે
શ્રમાતુરં બહ્વૃણબન્ધનાર્તમ્ ।
શઠપ્રયોગં છલકૂટમેવ ..........
દુષ્ટક્રિયં દા..........કમન્ત્રિણં ચ ॥ ૩॥

શનૈશ્ચરઃ કર્કટકે પ્રસૂતે
નરં દરિદ્રં સુભગાભિમાનમ્ ।
સદા રુગાર્તં જનનીવિયુક્તં
મૃદું વિશિષ્ટક્રિય માચરં ચ ॥ ૪॥

..........ઓऽર્કિર્જનયત્યશીલં
વિગર્હિતાચારગુનં મનુષ્યમ્ ।
પ્રવૃદ્ધદોષં નિજલોકબાહ્યં
ક્રિયાસુ નીચાસુ સદાભિસક્તમ્ ॥ ૫॥

શનૈશ્ચરઃ ષષ્ઠમુપેત્ય રાશિં
નપુંસકાકારતનું પ્રસૂતે ।
નરાનવેશ્માભિરતં ગતસ્વં
શઠં શિશુસ્ત્રીજનદૂષણં ચ ॥ ૬॥

તુલાધરસ્યસ્ત્વસિતઃ પ્રધાન-
..........અર્થપરં મનુષ્યમ્ ।

ઉરાષ્ટ્રદેશાટનલબ્ધમાનં
વયઃપ્રકર્ષોપકૃતાસ્પદં ચ ॥ ૭॥

શનૈશ્ચરો વૃશ્ચિકગો
વિદ્વેષવૈષમ્યપરં પ્રસૂતે ।
ધર્માદપેતં વિષશસ્ત્રદગ્ધં
પ્રચણ્ડકોપં નિરયત્પ્રપંચમ્ ॥ ૮॥

ધનુર્ધરસ્થો મૃદુમલ્પવાક્યં
વધર્મવૃત્તાભિરતં પ્રસૂતે ।
શ્રુતાર્થવાક્યં વ્યવહાર્શિક્ષા-
ક્રિયાભિધાયશ્રમનલ્પસૌખ્યમ્ ॥ ૯॥

સ્થિતોऽર્કસૂનુર્જનયેન્મૃગાખ્યે
નરં સ્વવંશોદ્ભવપૂજ્યમગ્ન્યમ્ ।
ક્રિયાકયાચાર્યમનેકશિલ્પં
પ્રવાસિનં વૃન્દપુરસ્કૃતં ચ ॥ ૧૦॥

શનશિચરઃ કુમ્ભધરં પ્રપન્નઃ
કુર્યાચરં સત્યધનં સુવાક્યમ્ ।
આરોગ્યકાયં વરયાણયુક્તં
શૂરં નૃપૈઃ પૂજિતમલ્પપાપમ્ ॥ ૧૧॥

શનૈશ્ચરો મીનયુગે પ્રસૂતે
..........ઉસંબન્ધિસુહૃદ્વરિષ્ઠમ્ ।
ત્રિંશન્તસત્યાર્ચિતમિષ્તયજ્ઞં
વિધાસુ શિલ્પેષ્વભિજાતશિલ્પમ્ ॥ ૧૨॥

હોરાં ગતો વાસરપસ્ય સૌરિ-
ર્નરં પ્રસૂતે બહુવૈરયુક્તમ્ ।
પ્રણષ્ટધર્મં વિગતાભિમાનં
દયાવિહીનં પરદારલુબ્ધમ્ ॥ ૧૩॥

હોરાં ગતો રાત્રિપતેસ્તુ સૌરિ-
ર્નરં પ્રસૂતે બહુકીર્તિયુક્તમ્ ।
સૌન્દર્યસૌખ્યાર્થસમૃદ્ધિયુક્તં
પ્રિયં મનોજ્ઞં પ્રણતં સુરાણામ્ ॥ ૧૪॥

દ્રેષ્કાણસંસ્થો દિનપસ્ય સૌરિઃ
કરોતિ કન્યાપ્રજનં મનુષ્યમ્ ।
વ્યાયામભાજં વિગતપ્રતાપં
વિપન્નશીલં સતતં સજિહ્મમ્ ॥ ૧૫॥

ભાગે તૃતીયે રવિજઃ પ્રસૂતે
ચન્દ્રસ્ય મર્ત્યં મહદર્થયુક્તમ્ ।
વિવેકિનં સર્વકલાસુ..........
વિપક્ષહીનં સુતલાલસં ચ ॥ ૧૬॥

ભાગે તૃતીયેઽવનિજસ્ય સૌરિ-
શ્ચૌરં પરપ્રેષ્યકરં પ્રસૂતે ।
સિનિષ્ઠુરં પાપરતં નૃશંસં
વ્યપેતલજ્જં ગતસૌહૃદં ચ ॥ ૧૭॥

દ્રેષ્કાણસંસ્થઃ શશિજસ્ય સૌરઃ
કરોતિ મર્ત્યં બહુશાસ્ત્રયુક્તમ્ ।
વિચાનિનં ધર્મરતં પ્રસક્તં
સ્વદારતુ..........ગતસાધ્વસં ચ ॥ ૧૮॥

દ્રેષ્કાણસમ્સ્થઃ સુરપુજિતસ્ય
સૌરઃ પ્રસૂતે દ્વિજદેવભક્તમ્ ।
પ્રિયંવદં સર્વસહં પ્રગલ્ભં
મહાજનૈઃ પૂજિતસાધુદારમ્ ॥ ૧૯॥

ભાગે તૃતીયે રવિજઃ પ્રસૂતે
શુક્રસ્ય તિષ્ઠન્ પ્રચુરાનપાનમ્ ।
લાભાન્વિતં ધર્મપરંસુમિત્રં
હતારિપક્ષં વ્યસનૈર્વિયુક્તમ્ ॥ ૨૦॥

.........nઇભોગે........ઊ........
..........સૌખ્યમ્ ।
નૃપાત્મજૈઃ પ્રીતિપર વદાન્ય
વિમુક્તરોગ બહુમિત્રયુક્તમ્ ॥ ૨૧॥

સૂર્યસ્ય ભાગે નવમેઽર્કસૂનુઃ

કરોતિ મર્ત્યં બહુતીવ્રકોપમ્ ।
હિંસ્રં પ્રણષ્ટં સુજનૈર્વિયુક્તં
પ્રદ્વેષશીલં પરિભૂતમન્યૈઃ ॥ ૨૨॥

ચન્દ્રસ્ય ભાગે નવમેऽર્કસૂનુ-
ર્નરં પ્રસૂતે સુકલત્રયુક્તમ્ ।
શાસ્ત્રાનુરક્તં ક્રતુદાનશીલં
જિતેન્દ્રિયં મન્ત્રવિદાં વરિષ્ઠમ્ ॥ ૨૩॥

શનૈશ્ચરો ભૌમનવાંશસંસ્થો
નરં પ્રસૂતે વચનસ્વભાવમ્ ।
પરાઙ્ગનાસઙ્ગરતં વિધર્મં
મિત્રૈર્વિહીનં સતતં કુચૈલમ્ ॥ ૨૪॥

શનૈશ્ચરઃ સૌમ્યનવાંશસંસ્થઃ
કરોતિ મર્ત્યં સુખભોગતૃપ્તમ્ ।
કાન્તં સુભાર્યાત્મપરં વિધિજ્ઞં
પ્રિયાતિથિં યજ્ઞરતં પ્રધાનમ્ ॥ ૨૫॥

શનિર્નવાંશે સુરપૂજિ..........
નરં પ્રસૂતે સુરવિપ્રભક્તમ્ ।
વિવેકવિક્ષાગમસત્યયુક્તં
પ્રસન્નવક્ત્રં પ્રચુરાન્નપનમ્ ॥ ૨૬॥

માતણ્ડજઃ શુક્રનવાંશસંસ્થઃ
કરોતિ તીર્થાશ્રયમિષ્ટધર્મમ્ ।
પ્રાજ્ઞં કૃતજ્ઞં બુધલોકસેવ્યં
જિતેન્દ્રિયં શુભ્રમતિં મનોજ્ઞમ્ ॥ ૨૭॥

નવાંશકે સ્વે પ્રકરોતિ સૌરો
નરં સુદાતારતરં વિરોગમ્ ।
સૂર્યોષિતાં સઙ્ગપ્રવૃધ્દસૌખ્યં
હતારિપક્ષં સ્થિરમુગ્રવીર્યમ્ ॥ ૨૮॥

સૂર્યાંશકે વાસર્પસ્ય શૌરો
નરં પ્રસૂતે ગતધર્મબુધ્દિમ્ ।
સુનિષ્ઠુરાલાપપરં સુદુષ્ટં

નીચાનુરક્તં વિગતપ્રભાવમ્ ॥ ૨૯॥

સૂર્યાંશકે ત્વૃક્ષપતેઃ પ્રયાતઃ
સૌરઃ સુવાતે સુમતિં મનુષ્યમ્ ।
લાભાન્વિતં પાર્થિવમાનપુષ્ટં
ગાન્ધર્વશિલ્પાદિષ સક્તચિન્તમ્ ॥ ૩૦॥

શનૈશ્ચરો દ્વાદશભાગસંસ્થો
નરં પ્રસૂતે ક્ષિતિજસ્ય જિહ્મમ્ ।
પ્રપીડિતં પિત્તવિકારદોષૈ-
ર્ભીરું સદા નિન્ધતમં નરાણામ્ ॥ ૩૧॥

માર્તણ્ડજો દ્વાદશભાગસંસ્થો
બુધસ્ય સૂતેઽપ્રતિમં મનુષ્યમ્ ।
વિત્તાન્વિતં ધર્મપરં સલજ્જં
કીર્ત્યાન્વિતં શાસ્ત્રવિશારદં ચ ॥ ૩૨॥

આદિત્યજો દ્વાદશભાગસંસ્થો
જીવસ્ય સૂતેઽર્થપરં મનુષ્યમ્ ।
પુત્રાન્વિતં બાન્ધવનામયુક્તં
લજ્જાન્વિતં બ્રાહ્મણસંમતં ચ ॥ ૩૩॥

અર્કાંશકે ભાર્ગવજસ્ય સંસ્થઃ
કરોતિ મર્ત્યં પ્રચુરાન્નપાનમ્ ।
વિશિષ્ટદારામ્બરરત્નભાજં
ભાગ્યાધિકં પ્રાણભૃતાં વરિષ્ઠમ્ ॥ ૩૪॥

સૂર્યાંશકે સ્વે દિનપસ્ય પુત્રો
નરં પ્રસૂતે સ્થિરબુદ્ધિયુક્તમ્ ।
વ્રતોપવાસાન્વિતમિષ્ટમિત્રં
કુલ.......... ॥ ૩૫॥

ત્રિંશાંશકે ભૂમિસુતસ્ય સૌરઃ
કરોતિ પાપાત્મકમુગ્રચેષ્ટમ્ ।
.......... રેન્દ્રૈઃ પરિભૂતદેહં
રોગાપતપ્તં પ્રખલસ્વભાવમ્ ॥ ૩૬॥

ત્રિંશાંશકે સ્વે રવિજઃ પ્રસૂતે
નરં વિનીતં વિગતારિપક્ષમ્ ।
વિત્તાર્જને તત્પરમિષ્ટમિત્રં
મહાબલં સત્યરતં નયજ્ઞમ્ ॥ ૩૭॥

ત્રિંશાંશકે દેવગુરોઃ પ્રયાતઃ
શનિઃ પ્રસૂતે સુભગં મનુષ્યમ્ ।
શ્રતોપવાસાર્જિતધર્મવૃદ્ધિં
પ્રિયંવદં સત્યયુતં પ્રગલ્ભમ્ ॥ ૩૮॥

ત્રિંશલ્લવે સોમસુતસ્ય સૌરિ-
ર્નરં પ્રસૂતે પ્રવરં કુલસ્ય ।
સૌમ્યાન્વિતં પણ્ડિતમિષ્ટધર્મં
નૃપપ્રિયં શાસ્ત્રરતં સદૈવ ॥ ૩૯॥

ત્રિંશાંશકે ભાર્ગવનન્દનસ્ય
કરોતિ સૌરઃ સુતસૌખ્યયુક્તમ્ ।
પ્રિયાતિથિં બુદ્ધિયુતં કૃતજ્ઞં
નારીપ્રિયં પૂજ્યતમં નૃલોકે ॥ ૪૦॥

શનશિચરો મિત્રબલેન યુક્તો
નરં પ્રસૂતે બહુમિત્રબન્ધ્..........
સ્થિરવભાવં બહુકીર્તિયુક્તં
વિધાવિનીતં સતતં મનોજ્ઞમ્ ॥ ૪૧॥

શનિર્યદા સ્થાનબલેન યુક્ત-
સ્તદા પ્રસૂતે શુચિમપ્રમત્તમ્ ।
ત્રભૂતવેશ્માર્થયુતં સુદારં
ચતુષ્પદાઢ્યં નૃપપૂજિતં ચ ॥ ૪૨॥

મન્દો યદા સ્વોચ્છબલેન યુક્ત-
પ્રસૂતે પ્રભૂતરત્નાર્થસુતૈઃ
ગતારિપક્ષં સતતં સુશિલમ્ ॥ ૪૩॥

નવાંશવીર્યોઽર્કસુતો બલિષ્ઠો
નરં પ્રસૂતે બહુયશ્વશીલમ્ ।
મેધાવિનં પુણ્યપરં જિતારિં

સભાસદં બ્રાહ્મણસંમતં ચ ॥ ૪૪॥

શુભગ્રહાલોકનવીર્યયુક્તઃ
કરોતિ સૌરો દૃઢકાર્યસુગ્રમ્ ।
કષિક્રિયાલબ્ધસુભૂરિ..........
વરાશ્વયુક્ત સાખન સુશીલમ્ ॥ ૪૫॥

પુંક્ષેત્રવિર્યેણ યુતોऽર્કસૂનુ-
ર્નરં પ્રસૂતે બહુવીર્યયુક્તમ્ ।
પરૈરધૃણ્ય વનિતાસ્વભીષ્ટં
પ્રિયંવદં સર્વકલાસુ દક્ષમ્ ॥ ૪૬॥

શનૈશ્ચરો દિગ્બલબુદ્ધિયુક્તો
નરં પ્રસૂતે પ્રચુરાન્નપાનમ્ ।
દાક્ષિણ્યશીલં બહુભોગયુક્તં
ગાન્ધર્વશીલં દ્વિજદેવભક્તમ્ ॥ ૪૭॥

ચેષ્ટાબલાઢ્યો રવિજઃ પ્રસૂતે
નરં સુચેષ્ટં સુતરાં સદૈવ ।
સત્યાન્વિતં દેવગુરુપ્રભક્તં
સુતીર્થયુક્તં પિતૃભક્તિરક્તમ્ ॥ ૪૮॥

શનૈશ્ચરો રાત્રિબલેન યુક્તો
નરં પ્રસૂતે રતસૌ..........ઉ........
..........યોગાધિકં સૌમ્યવપું સુચેષ્ટં
દયાન્વિતં દાનરતં સલજ્જમ્ ॥ ૪૯॥

શનૈશ્ચરો વર્ષબલેન યુક્તઃ
કીર્ત્યાભિરક્તં સંજનયેન્મનુષ્યમ્ ।
નિત્યં સુદાન્તં વ્યસનૈર્વિહીનં
જિતેન્દ્રિયં વિપ્રસુરાનુરક્તમ્ ॥ ૫૦॥

શનૈશ્ચરો માસબલેન યુક્તો
નરં પ્રસૂતે નયનાભિરામમ્ ।
પ્રતાપિનં ધર્મપરં સહીષ્ણું
હિતૈષિણં સર્વજનસ્ય નિત્યમ્ ॥ ૫૧॥

શનૈશ્ચરો વારબલેન યુક્તો
નરં પ્રસૂતે બહુશાત્રયુક્તમ્ ।
અહિંસકં માનગુણૈઃ સ..........
પ્રભૂતકોશં જનવલ્લભં ચ ॥ ૫૨॥

હોરાબલાઢ્યો રવિજઃ પ્રસૂતે
સન્માનભાજં જનનીપ્રભક્તમ્ ।
ધર્મે રતં પાર્થિવમા..........ઉ
વિશિષ્ટલોકાનુગતં સદૈવ ॥ ૫૩॥

શનિર્યદા પક્ષબલેન યુક્ત-
સ્તદા પ્રસૂતે ગતશત્રુપક્ષમ્ ।
..........
વિમુક્તરોગં ગતપાપમેવ ॥ ૫૪॥

શનૈશ્ચરો મિત્રબલેનહીનો
નરં પ્રસૂતેડતિખલં વિમિત્રમ્ ।
હતાત્મજં શ્રીરહિતં વિરૂપં
પ્રપીડિતં ભૂપતિના સદૈવ ॥ ૫૫॥

સ્વસ્થાનવીર્યેણ વિવર્જિતોડર્કિ-
ર્નરં પ્રસૂતે વિધનં વિશીલમ્ ।
પરાર્દિતં પાપરતં કૃતઘ્નં
રોગાર્દિતં બાન્ધવિવર્જિતં ચ ॥ ૫૬॥

સ્વતુઙ્ગવિર્યેણ વિવર્જિતોડર્કિ-
ર્નરં પ્રસૂતે વિધનં વિશીલમ્ ?
પાપૈર્જિતં હીનધનેશ્ચ યુક્તં
ભૂતાદિદોષૈઃ સહિતં સદૈવ ॥ ૫૭॥

નવાંશવીર્યેણ વિવર્જિતોડર્કિઃ
કરોતિ નિત્યં બહુશસ્ત્રયુક્તમ્ ।
સૂર્યં સુહિંસ્રં ધનધાન્યહીનં
પ્રમાદિનં પાર્થિવપીડિતં ચ ॥ ૫૮॥

.......... ॥ ૫૯॥

પુંક્ષેત્રવીર્યેણ વિવર્જિતસ્તુ.........
સૌરઃ પ્રસૂતે રિપુરોગયુક્તમ્ ।
દૌર્ભાગ્યયુક્તં વિકૃતં સુતીક્ષ્ણં
સદા વિધર્મં નિજધર્મહીનમ્ ॥ ૬૦॥

શનૈશ્ચરો દિગ્બલવર્જિતસ્તુ
નર પ્રસૂતે પરદારરક્તમ્ ।
નિરાશિમુગ્રં ગુરુદ્રોહરક્તં
વિપન્નલજ્જં સરુજં સદૈવ ॥ ૬૧॥

ચેષ્ટાબલોનો રવિજઃ પ્રસૂતે
કુચેષ્ટિતાનર્થપરં મનુષ્યમ્ ।
વિદ્વેષશીલં કુટિલં કુદારં
સન્માનહીનં ધનવર્જિતં ચ ॥ ૬૨॥

શનૈશ્ચરો રાત્રિબલેન હીનો
નરં પ્રસૂતે રતસૌખ્યહીનમ્ ।
માયાવિનં વ્યાધિભિરાર્તદેહં
દુષ્ટાશયં સર્વજનૈશ્ચ નિન્ધમ્ ॥ ૬૩॥

શનિર્યદા વારબલેન હીન-
સ્તદા પ્રસૂતે વિધનં મનુષ્યમ્ ।
બહુપ્રકારૈર્વ્યસનિરુપેતં
નિન્ધં કુવેષં બહુસાહસં ચ ॥ ૬૪॥

શનૈશ્ચરો વર્ષબલેન હીનો
નરં પ્રસૂતે જ્વરપિત્તયુક્તમ્ ।
નામાશિરોર્તિપ્રભવૈર્વિકરૈઃ
સમ્પીડિતં સત્યવિહીનમેવ ॥ ૬૫॥

શનૈશ્ચરો માસબલેન હાનિઃ
કરોતિ મર્ત્યં પરતર્કકં ચ ।
ગતસ્વકં હાનિયુતં કઠોરં
પ્રવાસશિલં દયિતાવિહીનમ્ ॥ ૬૬॥

હોરાબલેનઃ પ્રકરોતિ સૌરો
નરં પ્રમૂર્ખં સુતદારહીનમ્ ।

વિધર્મરક્તં સતતં કુવેષં
પ્રપીડિતં બન્ધુજનેન નિત્યમ્ ॥ ૬૭॥

શનૈશ્ચરઃ પક્ષબલેન હીનઃ
કરોતિ મર્ત્યં નિજપક્ષહીનમ્ ।
પાપાત્મકં દદ્રુભિરાર્તદે..........
વિદેશશીલં પરતર્કકં ચ ॥ ૬૮॥

ઇતિ શ્રીવૃદ્ધયવને શનૈશ્ચરચારઃ ॥

---

આધ્યાય ૨૪
તનુસ્થાનચિન્તાધ્યાયઃ
મેષસ્ય લગ્ને તુ ભૌ..........ઊ........
શ્ચાણ્ડો ધની સર્વકલાસુ દક્ષઃ ।
સ્વપક્ષહન્તા બહુમન્યુયુક્તો
..........અતિસ્તીક્ષ્ણકરઃ સદૈવઃ ॥ ૧॥

વૃષસ્ય લગ્ને તુ નરઃ પ્રસૂતે
મિત્રઃ ક્ષમી હાસ્યરતઃ સુવાભ્યઃ ।
વિજ્ઞાનયુક્તો ગુરુર્લોકભક્તઃ
શૂરઃ પ્રધાનઃ સુતલાલસશ્ચ ॥ ૨॥

તૃતીયલગ્ને તુ નરોઽભિજાતો
..........અબ્ધઃ ।
..........અક્ષપૂજ્યઃ પરપક્ષહન્તા........
..........જિતેન્દ્રિયઃ સ્યાદ્બહુવિત્તયુક્તઃ ॥ ૩॥

લગ્ને કૂલીરસ્ય તુ સમ્પ્રસૂતો
..........પ્રિયોઽસૃષ્ટરુગિષ્ટયોગઃ ।
સૌભાગ્યયુક્તો રતિલાલસશ્ચ
મન્ત્રોપસેવી ગુરુવત્સલઃ સ્યાત્ ॥ ૪॥

સિંહસ્ય લગ્ન તુ ભવે.......... પ્રસૂતો
નરો વિભાગી રિપુર્દનશ્ચ ।
લગ્ને વિધત્તે વિધનં મનુષ્યં
બહ્વાશિનં નિત્યવિમુક્તલજ્જમ્ ।

નિન્દ્યં સતાં નીચરતં કૃતઘ્નમ્ ॥ ૫॥

કન્યાવિલમે તુ નરઃ પ્રસૂતો
[વિજ્ઞાનવિદ્યાગમશાસ્ત્રલુબ્ધઃ ।]
લુબ્ધો ગુરુણાં રતિલાલસશ્ચ
માની ચ સૌભાગ્યગુણૈશ્ચ યુક્તઃ ॥ ૬॥

તુલાવિલગ્ને તુ નરઃ પ્રસૂતઃ
સ્વકર્મણા જીવતિ બુદ્ધિમાંશ્ચ ।
વિદ્વત્પ્રિશઃ સર્વકલાસ્વભિજ્ઞ-
શ્ચલસ્વભાવો વનિતાજિતશ્ચ ॥ ૭॥

જાતો વિલગ્ને ખલુ વૃશ્ચિકે સ્યાત્
ચણ્ડોઽભિમાની પુરુષોઽતિશૂરઃ ।
વિજ્ઞાનવાન્ કાવ્યકરઃ કૃતજ્ઞ
સ્યાત્ સંવિભાગી બહુરોષંચિન્તઃ ॥ ૮॥

ધનુર્વિલગ્ને ભવતિ પ્રસૂતઃ
..........નઃ સુભગો મનુષ્યઃ ।
શૂરોઽર્થવાન્ ભીતિપરઃ કૃતજ્ઞો
બન્ધૂપભોગ્યો દ્રવિણો વપુષ્માન્ ॥ ૯॥

મૃગસ્ય લગ્ને પુરુષોઽભિજાતઃ
..........બહુભૃત્ય........ઉ........
લુબ્ધોઽલસઃ સ્વાત્મપરઃ કૃતઘ્નઃ
.......... ર્યનિત્યો ગુરુવત્સલશ્ચ ॥ ૧૦॥

કુમ્ભસ્ય લગ્ને પુરુષોઽભિજાત-
..........ઔહૃદશ્ચ ।
પ્રભૂતધાન્યાર્થયુતઃ પ્રચણ્ડો
લુબ્ધોઽન્યનારિરતિલાલસશ્ચ ॥ ૧૧॥

મીને વિલગ્નોપગતેઽભિજાતઃ
..........ન્દ્રવિણોઽલ્પકશ્ચ ।
ત્યાગાત્મવાન્ શાસ્ત્રવિશારદશ્ચ
ન દીર્ઘસૂત્રો ન ચ મન્દબુદ્ધિઃ ॥ ૧૨॥

હોરા યદા વાસરપસ્ય લગ્ને
તદા પ્રસૂતે બહુસૌખ્યયુક્તમ્ ।
વિવેકિનં ધર્મપરં કૃતજ્ઞં
ત્યાગાત્મકં સત્યરતં મનુષ્યમ્ ॥ ૧૩ ॥

શીતાંશુહોરા યદિ જન્મકાલે
પરાઙ્ગનાભોગપરો નરશ્ચ ।
શુભે શુભં તત્ર ચ ક્રૂરયુક્તે
સમ્ભોગકાલે ન ચેરપ્રદિષ્ટમ્ ॥ ૧૪ ॥

ત્ર્યંશો યદા વાસરપસ્ય લગ્ને
તદા સુતીવ્રં જનયેન્મનુષ્યમ્ ।
કલિપ્રિયં ધનરતં વિશાલં
વિદ્વેષશીલં દ્વિજદેવતાનામ્ ॥ ૧૫ ॥

ચન્દ્રસ્ય લગ્ને તુ યદા ત્રિભાગ-
સ્તદા પ્રસૂતે સુખલાભવન્તમ્ ।
શ્રિયાન્વિતં ભક્તિપરં ગુરૂણાં
પ્રખ્યાતકર્મીણમુદારચેષ્ટમ્ ॥ ૧૬ ॥

..........યંશકો ભૂમિસુતસ્ય લગ્ને
કરોતિ મર્ત્યં ક્ષતજાર્તદેહમ્ ।
ક્રૂરવભાવ હતબન્ધુદાર
પ્રતાપહીનં વિષયાર્દિતં ચ ॥ ૧૭ ॥

તૃતીયભાગઃ શશિજસ્ય લગ્ને
કરોતિ સૌમ્યં સરુજં મનુષ્યમ્ ।
નદીર્ઘસૂત્રં ન ચ વિત્તહીનં
સત્યાધિકં ભૂરિસુતં સદૈવ ॥ ૧૮ ॥

ત્ર્યંશો યદા દેવપુરોહિતસ્ય
લગ્નં પ્રયાતઃ પ્રકરોતિ મર્ત્યમ્ ।
તેજસ્વિનં સર્વૌખાધિવાસં
સુધર્મિણં પ્રીતિકરં સ્વપક્ષમ્ ॥ ૧૯ ॥

દ્રેષ્કાણસંસ્થો ભૃગુજસ્ય લગ્નો
વિત્તાન્વિતં સંજનયેન્મનુષ્યમ્ ।

શાસ્ત્રાનુરક્ત ગતરોગપાપ
નૃપપ્રિયં દેવગુરુપ્રસક્તમ્ ॥ ૨૦॥

શનૈશ્ચરસ્ય ત્રિવિભાગસ્..........
લગ્નઃ પ્રસૂતે કૃપણસ્વભાવમ્ ।
ધનેન હીનં બહુદુઃખયુક્તં
ચલપ્રતિજ્ઞં શઠતાસમેતમ્ ॥ ૨૧॥

ભાગે નવમે વિવસ્વાન
નરં પ્રસૂતે વિજિતં ખલં ચ ।
નીચાનુરક્તં વૃજિતૈઃ સમેતં
.......... ॥ ૨૨॥

..........શકો રાત્રિપતેર્વિલ........
મર્ત્યં બહુશોધનાઢ્યમ્ ।
કૃષ્યાપ્તવિત્તં સુતસૌખ્યયુક્તં
પ્રિયાતિથિં સર્વજનપ્રિયં ચ ॥ ૨૩॥

..........શકો ભૂત ........લગ્ને
કરોતિ મર્ત્યં બહુદુઃખયુક્તમ્ ।
પિત્તજ્વરાસૃક્પરિપીડિતા..........
પ્રતાપહીનં સતતં કુચૈલમ્ ॥ ૨૪॥

લગ્ને નવાંશઃ શશિનન્દનસ્ય
કરોતિ મર્ત્યં બહુવિત્તયુક્તમ્ ।
મેહાવિનં સર્વસુખર્દ્ધિભાજં
વિવેકિનં પણ્ડિતમલ્પવૈરમ્ ॥ ૨૫॥

નવાંશકો દેવપુરોહિતસ્ય
લગ્ને વિધત્તે સુતવિત્તસૌખ્યમ્ ।
નરાતિગાઠં કનકાયભાજં
સદા નરાણાં નૃપતેશ્ચ પૂજ્યમ્ ॥ ૨૬॥

નવાંશકો ભાર્ગવન..........
લગ્ને વિધત્તે બહુપુત્રભોગમ્ ।
.......... ર્મક્રિયાસિદ્ધિપરોપઘાતં
દિવ્યાઙ્ગનાભોગસુખં સદૈવ ॥ ૨૭॥

નવાંશકઃ સૂર્યસુતસ્ય લગ્ને
નૃણાં વિધત્તે બહુભૂમિનાશમ્ ।
અર્થક્ષયં ન્યાયમ્તાન્તમુગ્રં
પ્રમોષણં ચૌરકૃતં સદૈવ ॥ ૨૮॥

સૂર્યાંશકો વાસરપસ્ય લગ્ને
નરં પ્રસૂતે બહુમન્યુવશ્યમ્ ।
લાલ્યાન્વિતં ધર્મસુખૈર્વિહીન
નિસ્ત્ર્યંશમુગ્રં ચપલસ્વભાવમ્ ॥ ૨૯॥

સૂર્યાંશકો રાત્રિપતેર્વિલગ્ને
કરોતિ મર્ત્યં બહુર્નભાજમ્ ।
નાનાર્થલાભૈઃ સહિતં સુશીલં
કુલપ્રધાનં ભુમિત્રયુક્તમ્ ॥ ૩૦॥

સૂર્યાંશકો ભૂમિસુતસ્ય લગ્ને
નરં પ્રસૂતે રુધિરામયાઢ્યમ્ ।
પામાદિરોગૈર્વ્યસનૈઃ સમેતં
પ્રપંચયુક્તં રણકાતરં ચ ॥ ૩૧॥

સૂર્યાંશકઃ સોમસુતસ્ય લગ્ને
નરં સુવાતે સુભગં સુશીલમ્ ।
વિદ્યાસુરક્તં ગુરુદેવભક્તં
પરૈરધૃષ્યં રતલાલસં ચ ॥ ૩૨॥

સૂર્યાંશકો દેવગુરોર્વિલગ્ને
કરોતિમર્ત્યં બહુશાસ્ત્રરક્તમ્ ।
..........નુરાગેણ યુતં વિનીતં
પ્રભૂતમિત્રં રણકોવિદં ચ ॥ ૩૩॥

સૂર્યાંશકો ભાર્ગવનન્દનસ્ય
લગ્ને પ્રસૂતે સુભગં મનુષ્યમ્ ।
રૂપાન્વિતં પાર્થિવમાનયુક્તં
પ્રિયાતિથિં પુત્રધનૈઃ સમેતમ્ ॥ ૩૪॥

સૂર્યાંશકો ધસ્ત્રપનન્દનસ્ય

લગ્ને પ્રસૂતે રણરોગયુક્તમ્ ।
નરં કુશીલં નિજબન્ધુહીનં
શોકાર્દિતં હાનિયુતં સદૈવ ॥ ૩૫॥

ત્રિંશાંશકો ભૂમિસુતસ્ય લગ્ને
કરોતિ મર્ત્યં વ્યસનાભિભૂતમ્ ।
વ્યયેન હીનં બહુવૈરયુક્તં
પ્રપૂજિતં ભૂપતિના સદૈવ ॥ ૩૬॥

ત્રિંશલ્લવાઃ સૂર્યસુતસ્ય લગ્ને
કરોતિ મર્ત્યં પરદેશરક્તમ્ ।
ક્ષુત્તૃચ્છમાર્તં બહુરોગયુક્તં
સ્ત્રીણામભીષ્ટં પ્રણતારિપક્ષમ્ ॥ ૩૭॥

ત્રિંશાંશકો દેવગુરોર્વિલગ્ને
નરં સુવાતે બહુશાસ્ત્રરક્તમ્ ।
દૃઢપ્રતિશ્નં દૃઢસાહસં ચ
સત્યાત્મકં દેવગુરુપ્રસક્તમ્ ॥ ૩૮॥

ત્રિંશાંશકઃ સોમસુતસ્ય લગ્ને
નરં પ્રસૂતે સુખિનં સમૃધ્દ્મ્ ।
સધ્દર્મયુક્તં ગુરુબન્ધુમાન્યં
મિતાશિનં ધર્મપરં કૃતજ્ઞમ્ ॥ ૩૯॥

ત્રિંશાંશકો ભાર્ગવનન્દ્નસ્ય
લગ્ને પ્રસૂતે સદયં મનુષ્યમ્ ।
..........ન્વિતં સત્યપરં કૃતજ્ઞ
મુદારચેષ્ટં સુખિનં સુરૂપમ્ ॥ ૪૦॥

લગ્નં યદા સ્થાનબલેન યુક્તં
તદા નૃણાં સ્થાનવિવૃધ્દિદં સ્યાત્ ।
કરોતિ પૂજાં નૃપલોકજાતાં
સૌભાગ્યયુક્તં ચ કલત્રલાભમ્ ॥ ૪૧॥

લગ્નં યદાશોત્થબલેન યુક્તં
તદા પ્રસૂતે ગુણિનં મનુષ્યમ્ ।
સર્વાસુ દિક્ષુ પ્રકરોતિ લાભં

રોગારિનાશં પ્રિયતાં ચ લોકે ॥ ૪૨॥

ચેષ્ટાબલાઢ્યંપ્રકરોતિ લગ્નં
નૃણાંસુચેષ્ટાં પ્રિયમિત્રલાભમ્ ।
મિષ્ટાન્નપાનં વિવિધં ચ લોકે
ચતુષ્પદાનામધિપત્યતાં ચ ॥ ૪૩॥

લગ્નં યદા કાલબલેન યુક્તં
તદા નરાણાં પ્રિયલોભકારિ ।
સદા તુ પૂજાં નૃપતેઃ સલોકં
રોગક્ષયં સાધુજનેન સખ્યમ્ ॥ ૪૪॥

લગ્નં યદા સ્થાનબલેન હીનં
તદા પ્રસૂતે પર્દેશરક્તમ્ ।
..........સ્થાનવિદ્વેષપરં સુજિહ્મં
પરાન્નરક્તં પરદારસક્તમ્ ॥ ૪૫॥

આશબલોનં પ્રકરોતિ લગ્નં
ધાન્યાર્થહાનિં સતતં નરાણામ્ ।
પ્રમોષણં તકરચારકાદ્યૈઃ
પરાભવં શત્રુકૃતં સદૈવ ॥ ૪૬॥

ચેષ્ટબલેન પ્રકરોતિ લગ્નં
નૃણાં કુચેષ્ટાં પરદારરાતા ।
કુચલતાં શોકમનન્તરોગં
સ્વબન્ધુવૈરં પરતર્કક ॥ ૪૭॥

લગ્નં યદા કાલબલેન હીનં
નરં તદા હીનતરં પ્રસૂતે ।
વિધર્મશીલં વિગતાભિ..........
શ્લેષ્માર્દિતં ચૌરવિવર્જિતં ચ ॥ ૪૮॥

ષડ્વર્ગશુધ્દ્ધ યાદ જન્મલગ્ન
ભવેચ્છરીરે મનુજસ્ય સૌખ્યમ્ ।
સૌભાગ્યયુક્તં યદિ પાણિપાદં
કાન્ત્યાન્વિતં સર્વગુણૈઃ સમેતમ્ ॥ ૪૯॥

તદેવ યુક્તં યદિ પાપવર્ગે
હીનં શિરાલું ચ વિરુદ્ધગન્ધમ્ ।
..........
 ભવેત્ સદા સ્ત્રીષુ ભયાનકં ચ ॥ ૫૦॥

ષડ્વર્ગશુદ્ધ યદિ સૂર્યપુત્ર-
ભૌમાશ્રિતં સમ્ભવતે .......... ।
દુષ્કર્મરૂપો રવિણા ..........ન યુક્તઃ
કાણો ધિકાઙ્ગસ્તુ નિરિક્ષિતં ચ ॥ ૫૧॥

ભૌમાંશકે સૌમ્યદૃશા  વિહીને
ભૌમે વ્યયસ્થે નિધનાશ્રિતે વા ।
ભવેત્ સકર્ણાક્ષિરુજો મનુષ્યઃ
કૃશોઽલ્પવીર્યઃ સતતં ચ દીનઃ ॥ ૫૨॥

સૂર્યાંશકે સૌમ્યદૃશા વિહીન
સૂર્યે વ્યયસ્થે નિધનસ્થિતે વા ।
..........વેન્નિશાન્ધસ્તુ નિશા પ્રજાતો
દિવાથવા તૈમિરિકો મનુષ્યઃ ।
સૌમ્યોઽધિકાઙ્ગસ્તુ શિરાવનદ્ધઃ ॥ ૫૩॥

પાપા વ્યયસ્થાઃ પ્રભવન્તિ યસ્ય
..........અ રવિણા યદા સ્યુઃ ।
ખલ્વાટકસ્તત્ર ભવેત્ પ્રજાતો
વિપર્યયસ્થાઃ શુચિવર્જિતશ્ચ ॥ ૫૪॥

ક્લીબે વ્યયસ્થે ત્વથ પંચમે ચ
લગ્ન ગ્રહે ચૈવ ભવેન્મનુષ્યઃ ।
બૃહત્તડાકારધરોઽતિરુદ્રો
ગ્રહૈશ્ચલૈર્દૃષ્ટિવિવર્જિતશ્ચ ॥ ૫૫॥

.........૦દયે સૂર્યસુતે કુદૃષ્ટિ-
શ્ચન્દ્રે વ્યયસ્થે પ્રભવેઽર્ધદૃષ્ટિઃ ।
કુજસ્ય લગ્ને કુજસંશ્રિતે ચ
વિરૂપનેત્ર પ્રભવેન્મનુષ્યઃ ॥ ૫૬॥

પાપા યદા લગ્નગતાઃ સમસ્તાઃ

સૌમ્યાશ્ચ સર્વેઽષ્ટમગા ભવન્તિ ।
કુબ્જો ભવેદત્ર નરોઽભિજાતો
..........દ્વામનકઃ પ્રદિષ્ટઃ ॥ ૫૭॥

પાપાશ્ચતુર્થા યદિ નૈધનસ્થાઃ
સૌમ્યા ગ્રહાઃ ખે જનકોઽત્ર યોગે ।
વિમિશ્રિતૈસ્તૈઃ પ્રભવેન્મનુષ્યઃ
પાપાંશકસ્થૈઃ સંભવેશ્ચ કુષ્ઠી ॥ ૫૮॥

દુર્ગન્ધિવક્ત્રો વ્યયગૈશ્ચ પાપૈ-
સ્તૃતીયગૈઃ સૌમ્યનપુર્ધરૈશ્ચ ।
પાપાંશકસ્થૈરથ હૃદ્ગદઃ સ્યાત્
સદા દરિદ્રોઽરિગૃહં પ્રયાતૈઃ ॥ ૫૯॥

પાપાંશકે પાપનિરિક્ષિતે ચ
પાપે વિલગ્ને શુભદૃષ્ટિહીને ।
ભવેન્મનુષ્યો વૃષણૈઃ પ્રલમ્બૈ-
ર્જીવસ્ય દૃષ્ટયાધિકલિઙ્ગ એવ ॥ ૬૦॥

નખૈર્વિહીનો રવિજસ્ય લગ્ને
મન્દાંશકે મન્દદૃશા વિહીને ।
મન્દસ્ય વર્ગે શકટં પ્રયાત
એવં હિ ચક્રસ્ય વિદૃષ્ટક્ઃ સ્યાત્ ॥ ૬૧॥

તુલાધિકઃ સૂર્યસુતે વ્યયસ્થે
ભૌમે સુખસ્થે વિનિતાયકેઽર્કે ।
મહાદરશ્ચન્દ્રસુતે કુનેત્રઃ
કુમિત્રરક્તો વનિતાવિહીનઃ ॥ ૬૨॥

વક્રે વ્યયસ્થે નિધનાશ્રિતે ઙ્ગે
વિવસ્વરતિ ..........ખગેઽર્કપુત્રે ।
ભૌમેઽસ્તગેહે ગગને દિનેશે
દિજિ .......... મૂર્તિગતે ચ વક્રે ॥ ૬૩॥

સૂર્યે સુખસ્થે રવિજેઽષ્ટમસ્થે
સ્વવર્ગસંસ્થે શશિજે તનુસ્થે ।
શૂરો ભવેત્ કાન્તિયુતો મનુષ્યઃ

કલસ્વનઃ સત્યર્તઃ સુચક્ષુઃ ।
સુમીનવક્ષા રતકોવિદશ્ચ ॥ ૬૪॥

જીવાંશકે જીવયુતો વિલગ્ને
ભવેન્મનુષ્યઃ સુભગઃ સુરૂપઃ ।
સ્ત્રીણામભીષ્ટઃ સુરતેઽતુલસ્થઃ
પ્રિયંવદો ગિતવિચક્ષણશ્ચ ॥ ૬૫॥

શુક્રાંશકે શુક્રયુતે વિલગ્ને
ભોગી સુવિજ્ઞઃ પ્રણતો મનુષ્યઃ ।
ભવેત્ સુરૂપઃ સતતં દયાલુઃ
..........ભિરણપ્રિયશ્ચ ॥ ૬૬॥

ચન્દ્રાંશક ચન્દ્રયુતે વિલગ્ને
શુક્રો મહીભોગયુતો મનુષ્યઃ ।
ભવેત્તથાજ્ઞો મલિનઃ કૃશશ્ચ
કૃચ્છઃ સદા સ નયતિર્વૃથાદઃ ॥ ૬૭॥

સૌમ્યે વિલગ્ને ..........
શુભાંસવક્ષાઃ શુભજે નવાંશે ।
ચન્દ્રસ્ય હોરા શુભબાહુધાત્રી
ત્રિંશાંશકઃ સૌમ્યભવઃ સુશીલઃ ॥ ૬૮॥

સૂર્યાંશકે સૌમ્યસમુદ્ભવે ચ
નરો ભવેચ્છોભનજાનુર્પાશ્વઃ ।
લગ્નં શુભાલોકિત્મિષ્ટવીર્ય-
મોજો વિધત્તે સતતં નરાણામ્ ॥ ૬૯॥

પાપો યદા નીચગતો વિલગ્ને
સ્વભાવસંસ્થઃ શુભવર્જિતશ્ચ ।
સ્યાચ્છયામદન્તઃ પુરુષોઽત્ર જાતઃ
ક્રિયાવિહીનઃ પિશુનસ્વભાવઃ ॥ ૭૦॥

..........વિહીને
વિલગ્નસંસ્થે પુરુષોઽત્ર જાતઃ ।
કન્યારતો વાંછિતપાપયુક્તં
સ્ત્રીલપટઃ સ્યાત્ સતતં વિલુબ્ધઃ ॥ ૭૧॥

શનૈશ્ચરે સપ્તમગે વિલગ્ને
યદા નવાંશો ધરણિસુતસ્ય ।
વૃદ્ધાઙ્ગનાનાં નિરતો મનુષ્યઃ
સદા ભવેત્ કામનિપીડિતાત્મા ॥ ૭૨॥

યદા વિલગ્ને સધનુઃ શશાઙ્કો
નવાંશકે સ્યાદ્રવિનન્દનસ્ય ।
વેશ્યાનુરક્તં કુરુતે મનુષ્યં
..........અમ્ ॥ ૭૩॥

સિંહાંશકે સૂર્યયુતે વિલગ્ને
ભૌમેન દૃષ્ટે રવિજેઽસ્તસંસ્થ ।
ભવેન્નરો વક્રભગોઽત્રયોગે
વિપર્યયાદ્વક્રરતાનુરક્તઃ ॥ ૭૪॥

શનૈશ્ચરે નીચગતેઽસ્તસંસ્થે
પાપે વિલગ્ને શુભદૃષ્ટિહીને ।
..........અન્મનુષ્યઃ કરતોઽક્ષતપ્સુઃ
સદા વિરક્તો વરયોષિતાનામ્ ॥ ૭૫॥

ધનાશ્રિતે ભૂતનયે સુખસ્થે
સૌરે વ્યયસ્થેઽરિનવાંશસંસ્થે ।
રૂપોઽત્ર ભવેન્મનુષ્યઃ
સર્વત્ર નિન્દ્યઃ કૃતવિસ્મૃતિશ્ચ ॥ ૭૬॥

સૂર્યત્રિકોણે યદિ ભૂમિપુત્રઃ
શનૈશ્ચરે સૌમ્યગૃહાશ્રિતે ચ ।
તદા મનુષ્યસ્તુ સુદીર્ઘજાનુ-
ર્વિરૂપદેહઃ પ્રિયસાહસશ્ચ ॥ ૭૭॥

વ્રણાર્દિતાઙ્ગઃ સતતં વિરૂપઃ
પ્રજાવિયુક્તઃ પિશુનસ્વભાવઃ ।
શનૈશ્ચરે મૃત્યુગતે વ્યયસ્થે
ભૌમે ભવેત્ પાપરતો મનુષ્યઃ ॥ ૭૮॥

ઇતિ શ્રીવૃધયવને ત્નુસ્થાનચિન્તા ॥

આધ્યાય ૨૪અ

તનુસ્થાનચિન્તાધ્યાયઃ

તનુસ્થિતો વાસરપઃ સ્વતુઙ્ગે
તીવ્રાં તનું સંજનયેન્નરાણામ્ ।
તુઙ્ગાંશકે વા દૃઢતાસમેતાં
ષડ્વર્ગશુધ્દો બહુધાર્યતાં ચ ॥ ૧॥

નીચાશ્રિતસ્તીક્ષ્ણક..........
કાયં વિધત્તે સરુજં સદૈવ ।
..........ણ્યહીનં ભૃશનિચભાગે
..........વર્ગે નતયે પ્રયુક્તમ્ ॥ ૨॥

મિત્રાશ્રયસ્થો યદિ વાસરેશો
મૂર્તિં ગવો દીર્ઘતરં પ્રસૂતે ।
મિત્રસ્ય ભાગે જતિલં નિતાન્તં
વર્ગોત્તમે વાધિકશાસિનં ચ ॥ ૩॥

શત્રોર્ગૃહે વા યદિ તીક્ષ્ણરશ્મિ-
ર્લગ્નાશ્રિતો હીનશરીરકં ચ ।
નરં પ્રસૂતે ત્વથ શત્રુભાગે
હીનક્ષકોણં નયવર્જિતં ચ ॥ ૪॥

ચન્દ્રો વિલગ્ને પરિપૂર્ણદેહ-
સ્તુઙ્ગસ્થિતઃ સૌમ્યતનું પ્રસૂતે ।
તુઙ્ગસ્ય ભાગે સુમનોહરાં ચ
ષડ્વર્ગશુધ્દોઽપરનેત્રયુક્તામ્ ॥ ૫॥

નીચાશ્રિતઃ ક્ષીણતનુઃ શશાઙ્કઃ
કાણાં તનું લગ્નગતઃ પ્રસૂતે ।
નિશાન્ધકં નીચનવાંશશંસ્થઃ
પાપોત્થવર્ગે તિમિરેણ યુક્તામ્ ॥ ૬॥

મિત્રગૃહ શીતકરા વિલગ્ને
તનું સુવાતે સુભગાં મનોજ્ઞામ્ ।

મિત્રસ્યભાગે વરવક્ત્રયુક્તાં
વર્ગોત્તમસ્થઃ સુશરિતકાન્તિમ્ ॥ ૭॥

નિશાન્ધકં શત્રુગૃહાશ્રિતે ચ
લગ્નં ગતઃ સ્થૂલરુડં પ્રસૂતે ।
શત્રોર્વિભાગે પૃથુદીર્ઘકં ચ
મૂલત્રિકોણેષુ શુભાધરૌષ્ઠમ્ ॥ ૮॥

ભૌમઃ સ્વતુઙ્ગે મૂર્તિસંસ્થઃ
કરોતિ સંરક્તનનીશમર્ત્યમ્ ।
તુઙ્ગાંશકે વા ચિપિટસ્વભાવં
ષડ્વર્ગશુદ્ધસ્ત્વથ કર્કશાખ્યમ્ ॥ ૯॥

નીચશ્રિતો ભૂતનયો વિલગ્ને
કરોતિ સાન્દ્રં મદનં સદૈવ ।
નીચાંશકે તૈમિરિકં નિશાન્ધં
પાપસ્ય વર્ગે ત્વથ વક્રદૃષ્ટિમ્ ॥ ૧૦॥

.......... ।
મિત્રાંશકે રોગસમેતદૃષ્ટિં
વર્ગોત્તમે દૂરવિલોકનં ચ ॥ ૧૧॥

શત્રોર્ગૃહે વા યદિ ભૂમિપુત્રો
મિત્રં પ્રસૂતે બહુદૃ..........
સમીપદૃષ્ટિં ચ નવાંશકે વા
મૂલત્રિકોણે ચ જલાર્દદૃષ્ટિમ્ ॥ ૧૨॥

બુધા વિલગ્ન યાદ તુઙ્ગસંસ્થો
નરં સુવાતે સુમુખોરુનાસમ્ ।
તુઙ્ગાંશકે વા સુરદાધરૈષ્ઠં
ષડ્વર્ગશુદ્ધઃ સુશારિરકાન્તિમ્ ॥ ૧૩॥

નીચાશ્રિતો વા યદિ સોમપુત્ર-
સ્તનુસ્થિતો વક્ત્રકુગન્ધભાજમ્ ।
નીચાંશકે દીર્ઘકરાકજિહ્વં
.......... ॥ ૧૪॥

મિત્રાશ્રયસ્થા યદિ સોમપુત્રો
લગ્નં ગતઃ શુભ્રશિરોરુહં ચ ।
મિત્રસ્ય ભાગે ત્વથ શુભ્રદૃષ્ટિ
વર્ગિત્તમસ્થઃ સુહનું સદૈવ ॥ ૧૫॥

શત્રોર્ગૃહે વા યદિ સોમપુત્રઃ
કરોતિ મર્ત્યં તનુગઃ કરાલમ્ ।
શત્રોર્વિભાગે ચપલસ્વભાવં
ત્રિકોણગો રોગવિવૃદ્ધકાયમ્ ॥ ૧૬॥

સુરેજ્યમન્ત્રી યદિ તુઙ્ગસંસ્થો
લગ્ને મનોજ્ઞં જનયેન્મનુષ્યમ્ ।
ઉચ્છાંશકે વા શુભબાહુહસ્તં
ષડ્વર્ગશુદ્ધઃ શુભચર્મભાજમ્ ॥ ૧૭॥

નીચાશ્રિતો દેવગુરુર્વિલગ્ને
ખંજં સુવાતે નિરુજં નિતાન્તમ્ ।
નીચાંશકે ખંજનનાસકં ચ
.......... વર્ગે ચ સુભૂષણાઢ્યમ્ ॥ ૧૮॥

મિત્રાશ્ર્યસ્થો યદિ મૂર્તિસંસ્થો
ગુરુઃ પ્રસૂતે વરવસ્ત્રભાજમ્ ।
મિત્રાંશકે વા સુકટિં સુનાભિં
વર્ગોત્તમસ્થઃ સુભગોદરં ચ ॥ ૧૯॥

શત્રોર્ગૃહે તા યદિ દેવપૂજ્યો
મૂર્તિસ્થિતઃ સ્વોદરિકં પ્રસૂતે ।
શત્રોર્વિભાગે ત્વથ ફુલ્લમેવ
મૂલત્રિકોણે પ્રજનત્યલિઙ્ગમ્ ॥ ૨૦॥

શુક્રઃ સ્વતુઙ્ગે યદિ લગ્નસંસ્થઃ
સુરૂપજાનું મનુજં પ્રસૂતે ।
સ્વોચ્છાંશકસ્થઃ શુભપાણિપાદં
ષડ્વર્ગશુદ્ધઃ સુવિભક્તગાત્રમ્ ॥ ૨૧॥

નીચસ્થિતો વા યદિ દાનવેજ્યો
મૂર્તિસ્થિતઃ સ્વલ્પકચં પ્રસૂતે ।

સ્વલ્પાટકં વા યદિ નીચહાગે
પાપાત્થવર્ગે બલિરોમભાજમ્ ॥ ૨૨॥

મિત્રગૃહસ્થો યદિ દૈત્યપૂજ્યઃ
સૌભાગ્યયુક્તં શુભકીર્તિભાજમ્ ।
નરં પ્રસૂતે સુનખં વિભાગે
વર્ગોત્તમસ્થો બહુરુપિણં ચ ॥ ૨૩॥

શુક્રો યદા શત્રુગૃહં પ્રપન્નો
લગ્નં ગતઃ કુબ્જતનું પ્રસૂતે ।
શત્રોર્વિભાગેઽતિકૃશં વિગ..........
મૂલત્રિકોણે નયનાભિરામમ્ ॥ ૨૪॥

શનૈશ્ચરો મૂર્તિગતઃ સ્વતુઙ્ગે
લગ્નં ગતઃ શ્યામતનું મનુષ્યમ્ ।
તુઙ્ગાંશકે સ્વે ત્વથ ભિન્નવર્ણં
ષડ્વર્ગશુદ્ધસ્ત્વથ ગૌર ..........અત્રમ્ ॥ ૨૫॥

નીચસ્થિતઃ સૂર્યસુતો વિલગ્ને
કાસાર્તમર્ત્યં જનયેનમનુષ્યમ્ ।
નીચાશકસ્થઃ કફવાતપાતં
પાપસ્ય વર્ગે ત્વથ પિત્તતાં ચ ॥ ૨૬॥

મિત્રાશ્રયસ્થો યદિસૂર્યસૂનુ-
ર્લગ્નસ્થિતો ગૌરવપું પ્રસૂતે ।
મિત્રાંશકસ્થોઽસ્થસાયસાર
વર્ગોત્તમસ્થસ્ત્વથ પીવરાઙ્ગમ્ ॥ ૨૭॥

શત્રોર્ગૃહસ્થો રવિજોઽતિરૂપ્યં
લગ્નાશ્રિતઃ સ્થૂલનખં પ્રસૂતે ।
સુસ્થૂલદન્તં રિપુભાગસંસ્થો
મૂલત્રિકોણે તુ સુદીર્ઘજાનુમ્ ॥ ૨૮॥

સ્વોચ્છસ્થિતઃ સ્વભવને ક્ષિતિપાલતુલ્યો
લગ્નેઽર્કજે ભવતિ દેશપુરાધિનાથઃ ।
શેષેષુ દુઃખમદપીડિત એવ બાલ્યે
દારિદ્ર્યકામવ્યસનો મલિનોઽલસશ્ચ ॥ ૨૯॥

ઇતિ શ્રીવૃધ્દ્ધયવને તનુસ્થાનચિન્તા ॥

---

આધ્યાય ૨૫

ધનસ્થાનચિન્તાધ્યાયઃ

સૂર્યો દ્વિતીયે યદિ તુઙ્ગસંસ્થો
..........તે નૃપમાનજાત્મ્ ।
ઉચ્છાંશકે વા નૃપસેવકં ચ
ષડ્વર્ગશુધ્દ્ધઃ શુભલોકદત્તમ્ ॥ ૧॥

નીચાશ્રિતો બાસરપો દ્વિતીયે
પાપાર્જિતં ધર્મધનં પ્રસૂતે ।
નીચાંશકસ્થઃ સ્થલજં સદૈવ
પાપસ્ય વર્ગે ત્વથ ચૌર્યજં ચ ॥ ૨॥

મિત્રાશ્રસ્થો દિનપો દ્વિતીયે
કરોતિ જાતં ધનધાન્યસમ્ભવમ્ ।
મિત્રસ્ય ભાગે ત્વથ લોહજાતં
વર્ગોત્તમસ્થઃ પરદારજાતમ્ ॥ ૩॥

શત્રોર્ગૃહે વા યદિ તીક્ષ્ણરશ્મિ-
ર્દ્વિતીયગઃ સ્વલ્પધનં પ્રસૂતે ।
કષ્ટાન્તદેશેઽધમસવયા ચ
મૂલત્રિકોણે ત્વથ ભિક્ષજં ચ ॥ ૪॥

ચન્દ્રો દ્વિતીયે યદિ તુઙ્ગસંસ્થે
મુક્તામણિપ્રાયભનં પ્રસૂતે ।
તુઙ્ગાંશકે વા કનકં ચ રૂપ્યં
ષડ્વર્ગશુધ્દ્ધો વિવિધં હિરણ્યમ્ ॥ ૫॥

નીચાશ્રિતઃ શીતકરઃ પ્રસૂતે
દ્વિતીયગો વિત્તમસદ્વ્યયં ચ ।
નીચસ્ય ભાગે ત્ય્ વ્યયેન હીનં
પાપોત્થવર્ગે વસવાં ભયં ચ ॥ ૬॥

મિત્રાશ્રયસ્થો યદિ વા શશાઙ્કો

વિત્તં પ્રસૂતે સુતજં નરાણામ્ ।
મિત્રસ્ય ભાગે કૃષિકૃત્પ્રસૂતં
વર્ગોત્તમસ્થઃ સુહૃદર્જિતં ચ ॥ ૭॥

શત્રોર્ગૃહે વા યદિ રાત્રિનાથઃ
કોશાશ્રિતશ્ચૌર્યધનં પ્રસૂતે ।
તદાંશકે વાથ કુકર્મજાતં
મૂલત્રિકોણે ત્વથ ભાર્યજોત્થમ્ ॥ ૮॥

ભૌમઃ સ્વતુઙ્ગે યદિ કોશગઃ સ્યાદ્
યુધ્દોદ્ભવં સંજનયેધ્દનં ચ ।
ઉચ્છાંશકે વાતિકૃશં ચ કષ્ટાત્
ષડ્વર્ગશુધ્દઃ સ્વજનોદ્ભવમ્ ચ ॥ ૯॥

નીચાશ્રિતો ભૂતનયસ્તુ નીચે
દ્વીતીયગો નિર્ધનમેવ સૂતે ।
નીચાંશકે બહ્વ્રણમેવ નિત્યં
પાપોત્થવર્ગે વ્રણયુક્તદેહમ્ ॥ ૧૦॥

મિત્રગૃહે વા યદિ ભૂમિસુતે
કોશાશ્રિતો મિત્રબલેન જાતમ્ ।
ધનં પ્રસૂતે સુહૃદંશકે ચ
વર્ગોત્તમે દેવગુરુપ્રસાદાત્ ॥ ૧૧॥

શત્રોર્ગૃહે ભૂતનયો દ્વિતીયે
ધનં પ્રસૂતે ન કદાચિદેવ ।
શત્રોર્વિભાગે ધૃણપાપસઙ્ગાન્
મૂલત્રિકોણે તુ જનોપરોધાત્ ॥ ૧૨॥

સૌમ્યસ્વતુઙ્ગે યદિ કોશસંસ્થઃ
..........નં ભૂરિધનસ્ય ધત્તે ।
તુઙ્ગાંશકે સસ્યચતુષ્પદાત્થ
ષડ્વર્ગશુધ્દો વિવિધૈરૂપયૈઃ ॥ ૧૩॥

નીચાશ્રિતઃ સોમસુતો ધનસ્થો
નિકૃષ્ટવિત્તં કુરુતે નરાણામ્ ।
નીચાંશકસ્થો રિપુતોઽતિદૈન્યાત્

પાપોત્થવર્ગે બહુવંચનાશ્ચ ॥ ૧૪॥

મિત્રાશ્રિતસ્થે યદિસોમપુત્રો
દ્વિતીયગો વાજિજમેવ વિત્તમ્ ।
ધત્તે નરાણાં ચં સુહૃદ્વિભાગે
વર્ગોત્તમે વા સુકૃતં પ્રસૂતે ॥ ૧૫॥

બુધ્ધો યદા શત્રુગૃહં પ્રયાતો
દ્વિતીયગઃ શત્રુનીષેવણેન ।
ધનં ભવેચ્છત્રુવિ..........
ત્વલ્પં ત્રિકોણે વરલોકજાતમ્ ॥ ૧૬॥

જીવો દ્વિતીયે યદિ તુઙ્ગ
સદા ધનં ન્યાયજિતં પ્રસૂતે ।
તુઙ્ગાંશકે ચ દ્વિજસાધુવૃત્ત
ષડ્વર્ગશુધ્ધો નૃપસંભવં ચ ॥ ૧૭॥

નીચાશ્રિતો દેવગુરુર્દ્વિતીયે
ધનં પ્રસૂતે પરદારજાતમ્ ।
નીચાંશકે ચાન્ત્યજલોકજાતં
પાપસ્ય વર્ગે બહુકષ્ટજાતમ્ ॥ ૧૮॥

મિત્રાશ્રયસ્થો યદિ દેવમન્ત્રી
દ્વિતીયગો વસ્ત્રગજાશ્વજં ચ ।
ધત્તે તદંશે ન કૃષિપ્રસૂતં
વર્ગોત્તમસ્યઃ સુજનપ્રદન્તમ્ ॥ ૧૯॥

યદા દ્વિતીયેઽરિગૃહે સુરેજ્યો
વિધત્તેઽરિનિષેવણેન ।
શત્ર્વંશકે શત્રુજનેન દત્તં
મૂલત્રિકોણે નિધિજં સદૈવ ॥ ૨૦॥

શુક્રે દ્વિતીયે યદિ તુઙ્ગસંસ્થઃ
સદાક્ષયં ભૂરિધનં પ્રસૂતે ।
તુઙ્ગાંશકે પૂર્વજસંચિતં ચ
ષડ્વર્ગશુધ્ધો દ્વિતયં નિતાન્તમ્ ॥ ૨૧॥

નીચાશિતો દૈત્યગુરુર્દ્વિતીયે
ધનં સુવાતે શ્રુતિજં નિતાન્તમ્ ।
ધૂતર્જિતં નીચનવાંશસંસ્થઃ
પાપસ્ય વર્ગ્ પરદેશસઙગાત્ ॥ ૨૨॥

મિત્રાશ્ર્યસ્થો યદિ દાનવેજ્યો
દ્વિતીયસંસ્થો નૃપજં વિધત્તે ।
..........ત્રં તદશં નૃપપુત્રજાત
રાજ્ઞી..........મુત્થં યદિ શુભવર્ગે ॥ ૨૩॥

શુક્રો દ્વિતીયે યદિ શત્રુસંસ્થો
ધનં પ્રસૂતે વરકર્મજાતમ્ ।
શત્રોર્વિભાગે ત્વથ દૈન્યજાતં
મૂલત્રિકોણે સ્વસુતાર્જિતં ચ ॥ ૨૪॥

શાનિર્દ્વિતીયે યદિ તુઙ્ગસંસ્થો
ધનં પ્રસૂતે તુ કુકર્મજાતમ્ ।
તદંશકે કષ્ટવિનિર્જિતં ચ
ષડ્વર્ગશુધો વ્યસનોદ્ભવં ચ ॥ ૨૫॥

નીચં ગતો ભાસ્કરજઃ પ્રસૂતે
નિઃકિચનં નિત્યમનેકદુઃખમ્ ।
નરં તદંશેઽન્ત્યજવિત્તભાજં
..........વર્ગે તુ સુપાપજં ચ ॥ ૨૬॥

મિત્રાશ્રયસ્થો યદિ સૂર્યપુત્રો
દ્વિતીયગઃ સ્વસ્થધનં પ્રસૂતે ।
મિત્રસ્ય ભાગે ત્વથ મૃન્મયં ચ
વર્ગોત્તમસ્થો જલજં સદૈવ ॥ ૨૭॥

સૌરો યદા શત્રુગૃહાશ્રયસ્થો
દ્વિતીયગઃ પાપધનં પ્રસૂતે ।
શત્રોર્વિભગે બહુદાસતોત્થં
મૂલત્રિકોણે પરપોષ ચ ॥ ૨૮॥

સહસ્રનાથો દિનપઃ પ્રદિષ્ટો
લક્ષાધિપો રત્રિકરઃ સદૈવ ।

શતાધિપો ભૂતનયઃ સદૈવ
કોટીશ્વરઃ સોમસુતઃ સદૈવ ॥ ૨૯॥

સ્વર્વાધિનાથઃ સુરરાજમન્ત્રી
શુક્રો હ્યસંખ્યઃ શનિર્ભૌમતુલ્યઃ ।
સ્વતુઙ્ગાઃ સ્યુર્યદિ સર્વ એવ
અર્થાન્તરાલે ત્વનુપાતજાતમ્ ॥ ૩૦॥

સ્વવર્ગજં વિત્તમહો દધત્તિ
હિત્વા હિ શુક્રં બહુસઙ્ગજં ચ ।
સ્વં સ્વં ધનં સ્વાસુ દશાસુ સમ્યક્
.......... ॥ ૩૧॥

ઇતિ શ્રીવૃદ્ધયવને ધનસ્થાનચિન્તા ॥

---

આધ્યાય ૨૬

સહજસ્થાનચિન્તાધ્યાયઃ

તૃતીયસંસ્થો યદિ વાસરેશો
મિત્રં નૃપં તુઙ્ગગતો વિધત્તે ।
તુઙ્ગાંશકે વા નૃપસંભવં ચ
ષડ્વર્ગશુદ્ધસ્ત્વથ સાર્વભૌમમ્ ॥ ૧॥

નીચાશ્રિતો નીચધનં વિધત્તે
મિત્રં તૃતીયે યદિ તીક્ષ્ણરશ્મિઃ ।
નીચાંશકે ભિક્ષુકપુત્રવૈરં
પાપસ્ય વર્ગે ત્વથ વારણં ચ ॥ ૨॥

મિત્રાશ્રયસ્થો યદિ વાસરશી
મિત્રં દ્વિજેન્દ્રં કુરુતે તૃતીયે ।
મિત્રાંશકસ્થો જનયેત્ સુશીલં
વર્ગોત્તમસ્થોઽદ્ભુતશાસ્ત્રરક્તમ્ ॥ ૩॥

રવિતૃતીયેઽરિગૃહં પ્રયાતો
મિત્રં વિધત્તે રિપુવર્જિતાઙ્ગમ્ ।
દ્વિષવિભાગે ગુણવર્જિતં ચ
મૂલત્રિકોણે પતિમેવ શાન્તમ્ ॥ ૪॥

તૃતીયગઃ શીતકરઃ સુવાતે
મિત્રં સ્વતુઙ્ગે કૃપણસ્વભાવમ્ ।
..........મેવ ભાગે પરતર્કકં ચ
ષડ્વર્ગશુદ્ધઃ પરદારરક્તમ્ ॥ ૫॥

નીચાશ્રિતો રાત્રિપતિસ્તૃતીયે
મિત્રં સ્વાતેઽત્યજમેવ નિત્યમ્ ।
નીચસ્ય ભાગે ત્વથ નર્તકં ચ
ભણ્ડં ચ વર્ગે ખલસમ્ભવં ચ ॥ ૬॥

મિત્રાશ્રયસ્થો યદિ શીતરશ્મિ-
ર્મિત્રં સુવાતે પરવંચકં ચ ।
મિત્રસ્ય ભાગે બહુદોષજં ચ
વર્ગોત્તમસ્થો ઘૃણયા વિહીનમ્ ॥ ૭॥

તૃતીયગઃ શીતકરો વિધત્તે
નરાધમં શત્રુગૃહં પ્રયાતઃ ।
શત્રોર્વિભાગે બહુમાયયાઢ્યં
મૂલત્રિકોણે પરદારરક્તમ્ ॥ ૮॥

ભૌમસ્તૃતીયે યદિ તુઙ્ગસંસ્થો
મિત્રં વિધત્તે વરભૂમિપાલમ્ ।
તુઙ્ગાંશકે વા નૃપતેરમાત્યં
ષડ્વર્ગશુદ્ધો દ્વિતયં સદૈવ ॥ ૯॥

નીચાશ્રિતો ભૂતનયસ્તૃતીયે
મિત્રં વિધત્તે બહુકામસક્તમ્ ।
નીચાંશકસ્થો ભૃતકં ચ વૈદ્યં
પાપોત્થવર્ગે વ્યસનાભિભૂતમ્ ॥ ૧૦॥

મિત્રાશ્રયસ્થો યદિ ભૂમિપુત્ર-
સ્તૃતીયગો ભૂરિસુખં પ્રસૂતે ।
મિત્રાંશકે વાક્ષયજં કુમારં
વર્ગોત્તમસ્થઃ પ્રચુરાન્નપાનમ્ ॥ ૧૧॥

શત્રોર્ગૃહસ્થો યદિ ભૂમિપુત્રો

મિત્રં પ્રસૂતે સહજાશ્રિતં ચ ।
તસ્થૈવ ભાગે ચ સમૃદ્ધિભાજં
મૂલત્રિકોણે ત્વથ દણ્ડનાથમ્ ॥ ૧૨॥

સૌમ્યસ્તૃતીયે યદિ તુઙ્ગસંસ્થો
.......... શાન્તમતિં પ્રસૂતે ।
તુઙ્ગાંશકે કંચકિન સમ..........
ષડ્વર્ગશુદ્ધઃ સુતરા કૃત્ ..........મ્ ॥ ૧૩॥

નીચારિતઃ સોમસુતસ્તૃતીયે
મિત્રં વિધત્તે વૃજિનૈઃ સમેતમ્ ।
ગોપાલકં નીચવિભાગસંસ્થઃ
પાપસ્ય વર્ગે ગતસૌહૃદં ચ ॥ ૧૪॥

મિત્રાશ્રયસ્થઃ શૈજસ્તૃતીય
મિત્રં સુવાતે બહુકર્મભાજમ્ ।
ભાગે ત્વથ નાપિતં ચ
..........ખલ........ રમ્ ॥ ૧૫॥

શત્રોર્ગૃહસ્થો યદિ સોમપુત્રો
મિત્રં તૃતીયે કુરુતે સુનિન્ધમ્ ।
તસ્થૈવ ભાગે જનિતાતિગં ચ
મૂલત્રિકોણેઽથ મલિમ્લુચમ્ ચ ॥ ૧૬॥

નીચસ્તૃતીયે યદિ તુઙ્ગસંસ્થો
મિત્રં સુવાત્ વિનયેન હીનમ્ ।
ઉચ્છાંશકે દમ્ભપરં નૃશંસં
ષડ્વર્ગશુદ્ધસ્તુ તથાપ્રજં ચ ॥ ૧૭॥

નીચાશ્રિતો દેવગુરુસ્તૃતીયે
મિત્રં પ્રસૂતે બહુપાચિતારમ્ ।
તદંશકે ધૂતરતં સદૈવ
.......... વર્ગે ગતબધુવર્ગમ્ ॥ ૧૮॥

જીવો યદા મિત્રગૃહે તૃતીયે
તદા પ્રસૂતેઽતિકૃશં ચ મિત્રમ્ ।
મિત્રાંશકે પણ્યપરં પ્રધાનં

વર્ગોત્તમસ્થઃ ખલુ દન્તકારમ્ ॥ ૧૯॥

તૃતીયગો દેવગુરુર્ય..........
શત્રોર્ગૃહે ક્લીવસુખં સુવાતે ।
તદંશકે શિલ્પિનમપ્રધાનં
મૂલત્રિકોણે પતિતં નિકૃષ્ટમ્ ॥ ૨૦॥

શુક્રો યદા તુઙ્ગતસ્તૃતીયે
તદા સુવાતે પતિતં ચ મિત્રમ્ ।
તુઙ્ગાંશકે વા નૃપસેવકં ચ
ષડ્વર્ગશુદ્ધં કલહપ્રિયં ચ ॥ ૨૧॥

નીચાશ્રિતો દૈત્યગુરુસ્તૃતીયે
મિત્રં વિધત્તે વધકં નૃશંશમ્ ।
નીચાંશકે નિચકુલપ્રસૂતં
પાપસ્ય વર્ગે પતિતં નૃશંસમ્ ॥ ૨૨॥

મિત્રાશ્રયસ્થો ભૃગુજસ્તૃતીયે
કરોતિ મિત્રં ખલુ ભાણ્ડમ્વ ।
મિતાંશકે વારણમપ્રશસ્તં
વર્ગોત્તમસ્થઃ શબરં કૃતઘ્નમ્ ॥ ૨૩॥

રિપોર્ગૃહે ભાર્ગવજઃ પ્રસૂતે
તૃતીયગઃ ક્રીડનકં ચ મિત્રમ્ ।
તદંશકે શિલ્પિનમપ્રશસ્તં
મૂલત્રિકોણેઽથ જનૈર્નિરસ્તમ્ ॥ ૨૪॥

સૂર્યાત્મજસ્તુઙ્ગતસ્તૃતીયે
મિત્રં સુવાતે વરભૂમિપાલમ્ ।
તુઙ્ગાંશકે વિત્તપતિં પ્રસિદ્ધં
ષડ્વર્ગશુદ્ધો બહુશાસ્ત્રરક્તમ્ ॥ ૨૫॥

નીચાશ્રિતઃ સૂર્યસુતતૃતીયે
મિત્રં પ્રસૂતે મલિનસ્વભાવમ્ ।
નીચાંશકે વંચનતત્પરં ચ
પાપસ્ય વર્ગે ધૃનથા વિહીનમ્ ॥ ૨૬॥

મિત્રાશ્રયસ્થઃ ખલુ સૂર્યપુત્રો
મિત્રં પ્રસૂતે સચિવં નયચમ્ ।
મિત્રાંશકે વા ગુણવિત્તભાજં
વર્ગોત્તમસ્થ સ્થિતિમાનયુક્તમ્ ॥ ૨૭॥

શનિર્યદા શત્રુગૃહાશ્રયસ્થ-
સ્તૃતીયગઃ પાપરતં ચ મિત્રમ્ ।
ધત્તે તદંશે વૃજિનં સુદીનં
મૂલત્રિકોણે વિજિતારિપક્ષમ્ ॥ ૨૮॥

..........સાવતા પ્રવિ
દશાધિપઃ શીત્કરસ્તુ ..........
સહસ્રમિત્રઃ ક્ષિતિજો ..........ઉ........
શતાધિપો દેવપુરોહિતશ્ચ ॥૨૯॥

અશીતિનાથો ભૃગુન। ..........
સૌરસ્તુ ભૌમેમ ..........મિતોઽધિકો વા ।
સ્વતુઙ્ગરાશૌ યદિ વત્તમાનાઃ
સર્વે ..........ઉ........અતસ્ય વશાદ્દન્તિ ॥ ૩૦॥

ઇતિ શ્રીવૃધયવને સહજસ્થાનચિન્તા ॥

---

આધ્યાય ૨૭
સુખસ્થાનચિન્તાધ્યાયઃ

..........
..........બહુદુષ્ટજાતમ્ ।
તુઙ્ગાંશકસ્થોઽણુસુખં કદાચિત્
ષડ્વર્ગશુધ્દ્ધઃ પરદારશ્ચં ચ ॥ ૧॥

નીચાશ્રિતો વાસરપશ્ચતુર્થે
સુખં વિધત્તે ન કદાચિદેવ ।
નિચાંશકે દુઃખવિમિશ્રિતં ચ
પાપસ્ય વર્ગે ધૃણદુઃખમિશ્રમ્ ॥ ૨॥

મિત્રાશ્રયસ્થો દિનકૃશ્ચતુર્થે
સુખં વિધત્તે વૃજિનૈઃ સમેતમ્ ।

ચૌર્યદ્ભવં શત્રુવિભાગસંસ્થો
વર્ગોત્તમસ્થોऽક્ષજમેવ નિત્યમ્ ॥ ૩॥

શત્રોર્ગૃહે વાસરપશ્ચતુર્થે
યુદ્ધે તુ સૌખ્યં કુરુતે નરાણામ્ ।
શત્રોર્વિભાગે પરસેવયા ચ
મૂલત્રિકોણે વધવન્ધજાતમ્ ॥ ૪॥

સુખસ્થિતઃ શીતકરઃ સ્વતુઙ્ગે
સુખં વિધત્તે ગજવાજિજાતમ્ ।
તુઙ્ગાંશકે હેમસમુદ્ભવં ચ
ષડ્વર્ગશુદ્ધો વિવિધં સદૈવ ॥ ૫॥

નીચાશ્રિતઃ શીતકરઃ ..........
સુખં સદા દ્યૂતજમેવ પુંસામ્ ।
નીચાંશકે ભૂરિકૃષિપ્રસૂતં
પાપસ્ય વર્ગે બહુપાપજાતમ્ ॥ ૬॥

મિત્રાશ્રયસ્થઃ ખલુ શીતરશ્મિઃ
સુખસ્થિતો ભૂરિસુખં વિધત્તે ।
સુતાદ્ભવ મિત્રાવભાગસંસ્થો
વર્ગોત્તમસ્થો વનિતોદ્ભવં ચ ॥ ૭॥

ચતુર્થગો રાત્રિપતિઃ પ્રસૂતે
શત્રોર્ગૃહે સૌખ્યમનીતિજાતમ્ ।
શત્રોર્વિભાગે કપટપ્રસૂત
મૂલત્રિકોણે ત્વથ ધર્મજાતમ્ ॥ ૮॥

ચતુર્થો ભૂતનયઃ સ્વતુઙ્ગે
સુખં વિધત્તે પરસૂદનેન
તુઙ્ગાંશકસ્થઃ પરબન્ધનેન
ષડ્વર્ગશુદ્ધઃ પરવંચનેન ॥ ૯॥

સુખાશ્રિતો ભૂમિસુતસ્તુ નીચે
સૌખ્યં કદાચિન્ન કરોતિ પુંસામ્ ।
નીચાંશકસ્થઃ પરપોષણેન
પાપત્ય વર્ગે વધબન્ધનેન ॥ ૧૦॥

મિત્રારયસ્થઃ ક્ષિતિજશ્ચતુર્થે
..........પરદેશયોગાત્ ।
મિત્રાંશકસ્થઃ સુરતપ્રસઙ્ગ..........
વર્ગોત્તમસ્થઃ પરવિત્તનાશાત્ ॥ ૧૧॥

શત્રોર્ગૃહે સ્યાધદિ ભૂમિપુત્ર-
ર્ચતુર્થગઃ પુંશ્ચલજં ચ સૌખ્યમ્ ।
ધત્તે તદંશે કરયોનિજાતં
મૂલત્રિકોણે સુખમોહનાઢ્યમ્ ॥ ૧૨॥

સૌમ્યઃ સુખસ્થઃ સુખમેવ ધત્તે
મહાજનોત્થં યદિ તુઙ્ગસંસ્થઃ ।
તુઙ્ગાંશકે પાર્થિવજં ચ પુંસાં
ષડ્વર્ગશુધ્દ્રો વ્યયમેવ પુંસામ્ ॥ ૧૩॥

નીચાશ્રયસ્થઃ શશિજો વિધત્તે
ચતુર્થગઃ ક્લેશજમેવ સૌખ્યમ્ ।
નીચાંશકસ્થઃ પરસેવયા ચ
.......... અતિવિર્ગહણેન ॥ ૧૪॥

મિત્રાશ્રયસ્થઃ શશિજશ્ચતુર્થે
સુખં વિધત્તે વરપુત્રજાતમ્ ।
મિત્રાંશકસ્થસ્તુ કલત્રજાતં
વર્ગોત્તમસ્થો દુહિતોદ્ભવં ચ ॥ ૧૫॥

શત્વાશ્રયસ્થઃ શશિજશ્ચતુર્થે
સુખં વિધત્તે ક્રયવિક્રયેણ ।
તસ્યૈવ ભાગે પશુપાલનેન
મૂલત્રિકોણે નિજબન્ધવોત્થમ્ ॥ ૧૬॥

જીવશ્ચતુર્થે યદિ તુઙ્ગસંસ્થો
સુખં વિધત્તે સકલં સદૈવ ।
તુઙ્ગસ્ય ભાગે ચ તથા તદર્ધં
ષડ્વર્ગશુધશ્ચ સુધર્મયુક્તમ્ ॥ ૧૭॥

નીચાશ્રિતો દેવગુરુશ્ચતુર્થે

સૌખ્યં વિધત્તે બહુનીચસઙ્ગાત્ ।
નીચાંશકસ્થશ્ચ વિચિત્રભાવાત્
પાપસ્ય વર્ગે પરપોષણેન ॥ ૧૮॥

મિત્રાશ્રયસ્થે સુરરાજપૂજ્યે
ચતુર્થગે વંશજમેવ સૌખ્યમ્ ।
ભવેત્તદંશે બહુભૃત્યજાત
વર્ગોત્તમસ્થે ભગિનીસમુત્થમ્ ॥ ૧૯॥

શત્રોર્ગૃહથો યદિ દેવપૂજ્ય..........
સ્ચતુર્થગો નીચનિષેવણેન ।
સૌખ્યં વિધત્તેઽથ તદંશકે વા
મૂલત્રિકોણે નૃપસઙ્ગમેન ॥ ૨૦॥

શુક્રઃ સ્વતુઙ્ગે યદિ બન્ધુ..........
સુખં વિધત્તે બહુવિત્તજાતમ્ ।
તુઙ્ગાંશકસ્થસ્તુ સ્વરોષ્ટ્રજાતં
ષડ્વર્ગશુદ્ધશ્ચ ગજોદ્ભવં ચ ॥ ૨૧॥

નીચાશ્રયસ્થો યદિ દૈત્યમન્ત્રી
સુખં વિધત્તે પરનારિજાતમ્ ।
નીચાંશકે ચૈવ વિલાસિનીનાં
પાપસ્ય વર્ગે ગુરુપત્નિસઙ્ગાત્ ॥ ૨૨॥

મિત્રાશ્રયસ્થો ભૃગુશ્ચતુર્થે
સૌખ્યં વિધત્તે બહુગોધનોત્થમ્ ।
મિત્રાંશકેઽજાવિકમેવ નિત્યં
વર્ગોત્તમસ્થો મહિષીસમુત્થમ્ ॥ ૨૩॥

શત્રોર્ગૃહસ્થો યદિ દૈત્યપૂજ્યઃ
સુખં વિધત્તે કુનિષેવણેન ।
તદંશકે વા પરદેશવાસાન્
મૂલત્રિકોણે દ્વિજદેવસઙ્ગાત્ ॥ ૨૪॥

શનિઃ સુખસ્થો યદિ તુઙ્ગસંસ્થઃ
સુખં વિધત્તે મૃગપક્ષિનાશાત્ ।
..........અકે વા વિષભક્ષિણેન ........

ષડ્વર્ગશુદ્ધઃ કૃષિકર્મજાતમ્ ॥ ૨૫॥

નીચાશ્રિતો ભાસ્કરજઃ પ્રસૂતે
ચતુર્થગઃ સૌખ્યવિના મનુષ્યમ્ ।
નીચાંશકે લોકનિબન્ધનેન
પાપસ્ય વર્ગે પરરન્ધ્રસઙ્ગાત્ ॥ ૨૬॥

મિત્રાશ્રયસ્થો યદિ ..........
વિધત્તે સ્વકલત્રભુક્તમ્ ।
મિત્રાંશકે વા સ્વકુતુમ્બહીનં
વર્ગોત્તમસ્થઃ પરપીડનેન ॥ ૨૭॥

.......... રાનજઃ પ્રસૂતે
સુખં ચતુર્થે પરવંચનેન ।
તદંશકે માનુષવિક્રયેણ
મૂલત્રિકોણે ક્રયવિક્રયેણ ॥ ૨૮॥

સૌખ્યઃ સુરરાજમન્ત્રી ..........
શતાધિપઃ સોમસુતઃ સિતશ્ચ ।
..........અલી
..........યાધિપાઃ સૂર્યશનૈશ્ચરારાઃ ॥ ૨૯॥

સ્વતુઙ્ગસંસ્થ..........
સૌખ્યાનિ યચ્છન્તિ સદા ગ્રહેન્દ્રાઃ ।
નીચાશ્રિતા હીનસુખા ભવન્તિ
ષડ્વર્ગશુદ્ધાશ્ચ યથા સ્વતુઙ્ગે ॥ ૩૦॥

ઇતિ શ્રીવૃધ્દ્ધયવને સુખસ્થાનચિન્તા ॥

---

આધ્યાય ૨૮

સુતસ્થાનચિન્તાધ્યાયઃ

તુઙ્ગશ્રિતો વાસરપઃ સુતસ્થઃ
સુતાન્ વિધત્તેઽલ્પતરાન્ નૃશંસાન્ ।
તુઙ્ગાંશકસ્યઃ સકલાર્થસિદ્ધિં
ષડ્વર્ગશુદ્ધઃ સુભગં મનોજ્ઞમ્ ॥ ૧॥

નિચાશ્રયથો દિનપઃ સુતસ્થઃ
સુતાન્ પ્રસૂતે ચ હિ જાતનષ્ટાન્ ।
નીચાંશકસ્થો વિકલાઙ્ગભાગાન્
પાપસ્ય વર્ગે ત્વથ ગભિનષ્ટાન્ ॥ ૨॥

મિત્રાશ્રયસ્થો યદિ તીક્ષ્ણરશ્મિઃ
સુતાન્ પ્રસૂતે પુરતઃ સુતાપ્રાન્ ।
મિત્રાંશકસ્થસ્તુ સુશીલવૃત્તાન્
વર્ગોત્તમસ્થો વ્યસનાધિકાંશ્ચ ॥ ૩॥

સુતાશ્રિતઃ શત્રુગૃહે દિનેશઃ
સુતાન્ વિધત્તે પરદેશજાતાન્ ।
શત્રોર્વિભાગે ત્વથ જારજાતાન્
મૂલત્રિકોણે ગુણવર્જિતાંશ્ચ ॥ ૪॥

સુતાશ્રિતઃ શિતકરઃ ..........
કન્યાઃ પ્રસૂતે વિપુલાયતાક્ષ્યાઃ ।
તુઙ્ગાંશકસ્થસ્તુ સુરૂપયુક્તાઃ
ષડ્વર્ગશુદ્ધઃ સુભગા મનોજ્ઞાઃ ॥ ૫॥

નીચાશ્રિતો રાત્રિપતિઃ ..........
કન્યાઃ પ્રસૂતે ચ સુરૂપયુક્તાઃ ।
નીચાંશકસ્થશ્ચ કુબુદ્ધિયુક્તા
ગતાયુષાશ્ચૈવ હિ પીતલાશ્ચ ॥ ૬॥

મિત્રાશ્રયસ્થઃ સુતગશ્ચ ચન્દ્રઃ
કન્યાઃ પ્રસૂતે શુભશીલયુક્તાઃ ।
મિત્રાંશકે શૌચપરાઃ સુદાન્તા
વર્ગોત્તમે ભર્તૃપરાઃ સદૈવ ॥ ૭॥

શત્વાસ્ત્રયસ્થઃ સુતગસ્તુ ચન્દ્રઃ
કન્યા પ્રસૂતેઽતિખલસ્વભાવાઃ ।
શત્રોર્વિભાગે તુ સુકુત્સિતાઙ્ગા
મૂલત્રિકોણે નિતરાં પ્રગલ્ભાઃ ॥ ૮॥

ભૌમઃ સુતસ્થસ્તનયાન્ વિધત્તે
સ્વતુઙ્ગસંસ્થોઽલ્પસુજિવિતાંશ્ચ ।

તુઙ્ગસ્ય ભાગે બહુરોગભાજાન્
ષડ્વર્ગશુદ્ધઃ ક્ષતજાર્દ્રદેહાન્ ॥ ૯॥

નીચાશ્રિતો ભૂતનયઃ સુતસ્થઃ
સુતાન્ વિધત્તે પરદારરક્તાન્ ।
અદીર્ઘજીવાંશ્ચ તદંશકસ્થઃ
પાપસ્ય વર્ગે બહુપાપરક્તાન્ ॥ ૧૦॥

મિત્રાશ્રયસ્થઃ ક્ષિતિજઃ સુતસ્થઃ
સુતાન્ વિધત્તે કૃપણસ્વભાવાન્ ।
મિત્રાંશકસ્થઃ કુવિધિપ્રસક્તાન્
વર્ગોત્તમસ્થો વિજિતારિપક્ષાન્ ॥ ૧૧॥

શત્ર્વાશ્રયસ્થઃ સુતગો મહીજઃ
કરોતિ પુત્રાન્ વ્રણરુ..........
તદંશકસ્થઃ સતતં  કુચૈલાન્
મૂલત્રિકોણે પરતર્કકાંશ્ચ ॥ ૧૨॥

બુધઃ સ્વતુઙ્ગે યદિ પંચમસ્થઃ
સુતાન્ વિધત્તે સુભગાન્ મનોજ્ઞાન્ ।
ઉચ્છાંશકે વા વિનયેન યુક્તન્
ષડ્વર્ગશુદ્ધો વિનયેન હીનાન્ ॥ ૧૩॥

નીચાશ્રિતઃ સોમસુતઃ સુતસ્થઃ
સુતાન્ વિધત્તે બહુદુઃખયુક્તાન્ ।
નીચાંશકસ્થ કન્યકાં ચ
પાપસ્ય વર્ગે વિકૃતાન્ નૃશંસાન્ ॥ ૧૪॥

મિત્રાશ્રયસ્થો યદિ પંચમસ્થઃ
કરોતિ સૌમ્યો નિરુજાન્ સુપુત્રાન્ ।
મિત્રાંશકસ્થો બહુશાસ્ત્રરક્તાન્
વર્ગોત્તમસ્થો નયસારદક્ષાન્ ॥ ૧૫॥

શત્ર્વાશ્રયસ્થા યદિ સોમપુત્રઃ
સુતાન્ વિધત્તે બહુબન્ધુપક્ષાન્ ।
તદંશકસ્થઃ પિશુનસ્વભાવાન્
મૂલત્રિકોણે ગુરુદેવભક્તાન્ ॥ ૧૬॥

નીજઃ સ્વતુઙ્ગ યદિ પંચમસ્થઃ
પુત્રાન્ વિધત્તે બહુજીવભાજાન્ ।
તદંશકસ્થઃ સુભગાન્ ભનોજ્ઞાન્
ષડ્વર્ગશુધ્દ્ઃ પ્રિયદર્શનાશ્ચ ॥ ૧૭॥

નીચાશ્રયસ્થઃ ખલુ પંચમસ્થો
જીવો વિધત્તે તનયાન્ સુદુઃખાન્ ।
તસ્યૈવ ભાગે વૃજિનૈઃ સમેતાન્
પાઓઅસ્ય વર્ગે ગતસૌહૃદામ્શ્ચ ॥ ૧૮॥

મિત્રાશ્રયસ્યઃ સુતગઃ સુરેજ્યઃ
સુતાન્ વિધત્તે પતિતાન્ સુરક્તાન્ ।
ધૂતપ્રિયાન્ તસ્ય વિભાગસંસ્થો
મૂલત્રિકોણેઽદ્ભુતવિક્રમાંશ્ચ ॥ ૧૯॥

.......... ॥ ૨૦॥

શુક્રઃ સુતસ્થો નિજતુઙ્ગસંસ્થઃ
કન્યાઃ પ્રઊતે સુભગા મનોજ્ઞાઃ ।
તુઙ્ગાંશકસ્થો બહુપુત્રયુક્તાઃ
ષડ્વર્ગશુધ્દ્ઃ શુભરૂપયુક્તાઃ ॥ ૨૧॥

નીચાશ્રિતો દૈત્યગુરુઃ સુતસ્થઃ
કન્યા પ્રસૂતે વિવિધાઃ સુરૂપઃ ।
નીચાંશકસ્થઃ પરર્કચિન્તાઃ
પાપસુઅ વર્ગે કૃપણસ્વભાવાઃ ॥ ૨૨॥

મિત્રાશ્રયસ્થો ભૃગુજઃ સુતસ્થઃ
સુતા પ્રસૂતે પતિભક્તિયુક્તાઃ ।
મિત્રાંશકે વા વતસત્યયુક્તા
વર્ગોત્તમસ્થઃ પ્રભયા સમેતાઃ ॥ ૨૩॥

શત્વાશ્રયસ્થો ભૃગુજઃ સુતસ્થઃ
સુતાઃ સુવાતે બહુપાપયુક્તાઃ ।
તદંશકે નષ્ટસુખાઃ કૃતઘ્ના
મૂલત્રિકોણે હતશત્રપક્ષાઃ ॥ ૨૪॥

શનૈશ્ચરઃ પંચમગઃ સ્વતુઙ્ગે
પુત્રાન્ પ્રસૂતે બહુશત્રુપક્ષાન્ ।
તદંશકે વા બહુયોગયુક્તાન્
ષડ્વર્ગશુધ્દ્ધઃ સુતરાં કૃતઘ્નાન્ ॥ ૨૫॥

નીચાશ્રિતઃ સૂર્યસુતઃ સુતસ્થઃ
સુતાન્ વિધત્તે ચ સ્વભાવન..........આન્ ।
તદંશકે વા ગ..........
પાપસ્ય વર્ગે બહુરોગભાજાન્ ॥ ૨૬॥

મિત્રાશ્રયસ્થો રવિજઃ સુતસ્થઃ
પુત્રાન્ વિધત્તે કૃષિકર્મસક્તાન્ ।
તદંશકે વા પશપાલનોત્થાન્
વર્ગોત્તમસ્થો બહુલોકપાંશ્ચ ॥ ૨૭॥

શત્વાશ્રયસ્થો રવિજઃ પ્રસૂતે
સુતસ્થિતઃ કાપુરુષાંશ્ચ પુત્રાન્ ।
તદંશકે ભૂતતમાનતીવ
મૂલત્રિકોણે બહુપાનભાજાન્ ॥ ૨૮॥

યદિ ભવતિ સુતર્ક્ષં યુગ્મમેવાબલાનાં
વિષમમથ નરાણાં પ્રાયશોજન્મદં સ્યાત્ ।
યુવતિપુરુષષણ્ઢા દૃષ્ટિતુલ્યા ગ્રહેન્દ્રા
બલમિતપરિપાકં સન્તતેર્ધારયન્તિ ॥ ૨૯॥

ક્લીબોપમે પંચમગે તથાભે
ષણ્ઢગ્રહાઃ ષણ્ઢનરં પ્રસૂતે ।
ષણ્ટાશ્રિતો સ્યાત્ પુરુષઃ પ્રશસ્તઃ
..........નહીનો યદિ વાબલાશ્ચ ॥ ૩૦॥

ઇતિ શ્રીવૃધ્દ્ધયવને સુતસ્થાનચિન્તા ॥

---

આધ્યાય ૨૯

રિપુસ્થાનચિન્તાધ્યાયઃ

..........વાસરપોડરિસંસ્થઃ

શત્રું વિધત્તે વ્રતિનં સદૈવ ।
તુઙ્ગાંશકસ્થિત અથ વિપ્રમેવ
ષડ્વર્ગશુદ્ધો નૃપતિં સદૈવ ॥ ૧॥

નીચાશ્રયસ્થઃ સવિતારિસંસ્થઃ
શત્રું વિધત્તે કુમતિં કૃતઘ્નમ્ ।
નીચાંશકસ્થઃ પ્રમદાનુરક્તં
પાપસ્ય વર્ગે પરતર્કકં ચ ॥ ૨॥

સુહૃદ્ગૃહસ્થઃ સવિતારિસંસ્થઃ
શત્રું વિધત્તે વણિજાનુરક્તમ્ ।
મિત્રાંશકસ્થસ્ત્વથ ગાજપાલ
વર્ગોત્તમસ્થો બહુશિષ્યભાજમ્ ॥ ૩॥

શત્વાશ્રયસ્થો યદિ તીક્ષ્ણરશ્મિઃ
ષષ્ઠે વિધત્તે પ્રમદાસમુત્થમ્ ।
વૈરં તદમ્શે ત્વથ પંશ્ચલીભી-
ર્મૂલત્રિકોણે ચ વિલાસિનીભિઃ ॥ ૪॥

ચન્દ્રોઽરિસંસ્થો યદિ તુઙ્ગસંથઃ
શત્રું વિધત્તે બહુશાસ્ત્રરક્તમ્ ।
ઉચ્છાંશકે વા પરદારરક્તં
ષડ્વર્ગશુદ્ધોઽપ્યથ પાર્થિવં ચ ॥ ૫॥

નીચાશ્રિતઃ શીતકરોઽરિસંસ્થો
મિત્રં ન કિંચિત્ કુરુતે મરાણામ્ ।
નિચાંશકસ્થશ્ચ બહુપ્રકારં
વૈરં વવર્ણેન ખલોત્થવર્ગે ॥ ૬॥

મિત્રાશ્રયસ્થો યદિ શીતરશ્મિઃ
ષષ્ઠસ્થિતોઽરિં નૃપતિં પ્રસૂતે ।
મિત્રાંશકસ્થસ્તુ નરેન્દ્રપુત્રં
વર્ગોત્તમસ્થઃ સતતં નૃશંસમ્ ॥ ૭॥

શત્વાશ્રયસ્થો યદિ શીતરશ્મિઃ
શત્રું વિધત્તે વિકૃતસ્વભાવમ્ ।
તસ્યૈવ ભાગે હ્યથ સૈન્યનાથં

મૂલત્રિકોણે ગુરુવત્સનં ચ ॥ ૮॥

તુઙ્ગાશ્રિતો ભૂતનયસ્તુ ષષ્ઠે
શત્રું ન પુંસાં કુરુતે કદાચિત્ ।
તુઙ્ગાંશકે ચાથ સુદીનચેષ્ટં
ષડ્વર્ગશુદ્ધઃ પરદેશભાજમ્ ॥ ૯॥

ભૌમોઽરિસંસ્થો યદિ નીચસંસ્થઃ
શત્રું વિધત્તેઽન્ત્યજમેવ પુંસામ્ ।
નીચાંશકે વા કૃષિકર્મરક્તં
પાપસ્ય વર્ગે ધનધાન્યહીનમ્ ॥ ૧૦॥

મિત્રાશ્રયસ્થો યદિ ભૂમિપુત્રઃ
ષષ્ઠે પ્રસૂતે તનયેન વૈરમ્ ।
મિત્રાંશકે વા ત્વથ બાન્ધવેન
વર્ગોત્તમસ્થો નિજમાતુલેન ॥ ૧૧॥

ભૌમોઽરિસંસ્થો યદિ શત્રુરાશૌ
રિપું વિધત્તે ગુરુદેવતારિમ્ ।
તસ્યૈવ ભાગે ઘૃણયા વિહીનં
મૂલત્રિકોણે પ્રિયસાહસં ચ ॥ ૧૨॥

સૌમ્યોઽરિસંસ્થો યદિ તુઙ્ગસંસ્થઃ
શત્રું વિધત્તે વિકૃતવભાવમ્ ।
તુઙ્ગાંશકે વા ધનિનં વિરૂપં
ષડ્વર્ગશુદ્ધઃ સુરતાનુકૂલમ્ ॥ ૧૩॥

બુધોઽરિસંસ્થો યદિ નીચરાશૌ
શત્રું સુવાતે વિકલં વિનેત્રમ્ ।
કાણં તદંશે વિકૃતાંઘ્રિદંષ્ટ્રં
પાપસ્થ વર્ગે દ્વિજધામરક્તમ્ ॥ ૧૪॥

મિત્રાશ્રયસ્થો યદિ સોમપુત્રઃ
ષષ્ઠે વિધત્તે સચિવં હિ મિત્રમ્ ।
મિત્રામ્શકસ્થઃ સચિવસ્ય પુત્રં
ષડ્વર્ગશુદ્ધઃ પરદારરક્તમ્ ॥ ૧૫॥

શત્રોર્ગૃહસ્થો યદિ સોમપુત્રઃ
શત્રું વિધત્તે પરવિન્તરક્તમ્ ।
ચૌરં તદંશે સતતં નૃશંસં
મૂલત્રિકોણે વ્યસનાભિભૂતમ્ ॥ ૧૬॥

જીવઃ સ્વતુઙ્ગે યદિ ષષ્ઠસંસ્થઃ
શત્રું પ્રસૂતે બહુદોષભાજમ્ ।
તુઙ્ગાંશકે .......... રિવિવર્જિતં ચ
ષડ્વર્ગશુધ્દઃ પ્રમદાનુકૂલમ્ ॥ ૧૭॥

નીચાશ્રયે વા યદિ દેવપૂજ્યઃ
ષષ્ઠે પ્રસૂતેઽલ્પસુખં ચ સક્તમ્ ।
તદંશકે વા બહુપાનરક્તં
..........વર્ગે ગુણવર્જિતં ચ ॥ ૧૮॥

મિત્રાશ્રય.......... યદિ દેવમન્ત્રી
શત્રું સુવાત્તેઽ..........પતિં પ્રસિધ્દમ્ ।
તદંશકે વા ખરગર્દભાઢ્યં
વર્ગોત્તમસ્થઃ શ્રુતવર્જિતં ચ ॥ ૧૯॥

શત્વાશ્રયસ્થઃ કુરુતે સુરેજ્યઃ
શત્રું વિહીનં નિજબન્ધુવર્ગે ।
શત્રોર્વિભાગે વિનયેન હીનં
મૂલત્રિકોણે બહુપુત્રપૌત્રમ્ ॥ ૨૦॥

શુક્રઃ સ્વતુઙ્ગે યદિ શત્રુસંસ્થઃ
શત્રું વિધત્તે જિતશત્રુપક્ષમ્ ।
તુઙ્ગાંશકે વા જિતશત્રુદારં
ષડ્વર્ગશુધ્દઃ પ્રણતારિપક્ષમ્ ॥ ૨૧॥

નીચાશ્રયસ્થો રિપુગોઽસુરેજ્યઃ
શત્રું પ્રસૂતે બહુકન્યકાઢ્યમ્ ।
નીચાંશકસ્થસ્તુ ગજાધિનાથં
પાપસ્ય વર્ગે કૃતપાપસઙ્ગમ્ ॥ ૨૨॥

મિત્રાશ્રયસ્થો રિપુગો વિધત્તે
શુક્રો રિપું બન્ધવવર્ગનેવ ।

તદંશકે વા સ્વકલત્રવર્ગે
વર્ગોત્તમસ્થઃ શ્વશુરં સદૈવ ॥ ૨૩॥

શત્વાશ્રયસ્થોઽરિગતસ્તુ શુક્રો
રિપું પ્રસૂતે સુતરાં નૃશંસમ્ ।
તસ્યાંશકે વ્યાધુવિવર્જિતાઙ્ગં
મૂલત્રિકોણે ધનવર્જિતં ચ ॥ ૨૪॥

શનૈશ્ચરઃ ષષ્ઠગતઃ સ્વતુઙ્ગે
પરૈર્વિહીનં જનયેન્મનુષ્યમ્ ।
તુઙ્ગાંશકે સ્વલ્પરિપું જિતારિં
ષડ્વર્ગશુધ્દ્ઃ સુનતં પરૈશ્ચ ॥ ૨૫॥

નીચાશ્રયસ્થો યદિ સૂર્યપુત્રઃ
શત્રું પ્રસૂતે તરલં મનુષ્યમ્ ।
નીચસ્ય ભાગે કનકાઢ્યમેવ
પાપસ્ય વર્ગે કૃષિકર્મદક્ષમ્ ॥ ૨૬॥

મિત્રાશ્રયસ્થો રવિજોઽરિસંસ્થઃ
શઠં રિપું સ્વલ્પતનું પ્રસૂતે ।
મિત્રસ્ય ભાગે હનિનં પ્રધાનં
વર્ગોત્તમસ્થો બહુકર્મયુક્તમ્ ॥ ૨૭॥

શત્વાશ્રયસ્થો રવિજો રિપુસ્થઃ
શત્રું સુવાતે સતતં ગતાર્થમ્ ।
શત્રોર્વિભાગે સુતદારહીનં
મૂલત્રિકોણે પરસઙ્ગતં ચ ॥ ૨૮॥

દશાધિપસ્તીક્ષ્ણકરઃ પ્રદિષ્ટં
સહત્રનાથો રજનીપતિશ્ચ
વક્રાર્કજૌ હીનપરૌ સદૈવ
સેષાસ્તુ ચન્દ્રેણ સમાઃ સ્વતુઙ્ગે ॥ ૨૯॥

ઇતિ શ્રીવૃધ્દ્યવને રિપુસ્થાનચિન્તા ॥

આધ્યાય ૩૦

કલત્રસ્થાનચિન્તાધ્યાયઃ

દિનાધિપઃ સપ્તમગઃ સ્વતુઙ્ગે
કરોતિ ભાર્યં કલહપ્રિયાં ચ ।
તુઙ્ગાંશકસ્થઃ પરકર્મરક્તાં
ષડ્વર્ગશુદ્ધતુ દરિદ્રયુક્તામ્ ॥ ૧॥

નીચાશ્રિતઃ સપ્તમગસ્તુ સૂર્યો
ભાર્યાં વિધત્તે વ્યધિચારિણીં ચ ।
નીચાંશકસ્થશ્ચ સરોગયુક્તાં
પાપસ્ય વર્ગે સતતં કુશીલામ્ ॥ ૨॥

મિત્રાશ્રયસ્થો દિનપઃ કલત્રે
કરોતિ ભાર્યાં સુતરાં નૃશંસામ્ ।
મિત્રસ્ય ભાગે સુવિહીનચિન્તાં
વર્ગોત્તમસ્થઃ સુરતપ્રિયાં ચ ॥ ૩॥

શત્ર્વાશ્રયસ્થો યદિ વાસરેશઃ
કરોતિ ભાર્યાં વ્યસનાભિભૂતામ્ ।
શત્રોર્વિભગે પરહીનકૃત્યાં
મૂલત્રિકોણે પ્રિયસાધ્વસાં ચ ॥ ૪॥

ચન્દ્રસ્તુ કામ્ યદિ તુઙ્ગસંસ્થો
ભાર્યાં વિધત્તે સુભગાં મનોજ્ઞામ્ ।
તુઙ્ગાંશકે વા સુરદેવભક્તાં
ષડ્વર્ગશુદ્ધોઽતિમનોશ્વરૂપામ્ ॥ ૫॥

નિશાકરઃ કામગતઃ સ્વનીચે
ભાર્યામ્ વિધત્તે બહુરોગભાજામ્ ।
નીચાંશકે કુષ્ઠરુજા સમેતાં
પાપસ્ય વર્ગે પતિના વિરુધામ્ ॥ ૬॥

મિત્રાશ્રયસ્થો યદિ રાત્રિનાથો
ભાર્યાં પ્રસૂતે પ્રિયવાદિનીં ચ ।
મિત્રાંશકે વા વિનયેન યુક્તાં
વર્ગોત્તમસ્થો બહુકર્મયુક્તામ્ ॥ ૭॥

શત્ર્વાશ્રયસ્થો યદિ રાત્રિનાથો

વિરુધ્દ્ધચેષ્ટાં જનયેશ્ચ ભાર્યામ્ ।
શત્રોર્વિભાગે વિગતપ્રભાવાં
મૂલત્રિકોણે બહુભૃત્યદક્ષામ્ ॥ ૮॥

ધરાસુતઃ કાતઃ કામગતેઃ સ્વતુઙ્ગે
ભાર્યાં વિધત્તે ગતરૂપવિત્તામ્ ।
તુઙ્ગાંશકે વાતિજરાભિભૂતાં
ષડ્વર્ગશુધ્દ્ધઃ પ્રચિતપ્રભાવામ્ ॥ ૯॥

નીચાશ્રયસ્થઃ ક્ષિતિજસ્તુ કામે
દારં વિધત્તે પ્રચુરપ્રગલ્ભમ્ ।
નીચાંશકે વા બહુશત્રુપક્ષાં
પાપસ્ય વર્ગે નિજવર્ગહીનામ્ ॥ ૧૦॥

મિત્રાશ્રયસ્થઃ ક્ષિતિજઃ કલત્રે
ભાર્યાં સુવાતે લઘુચોલનાં ચ ।
મિત્રસ્ય ભાગેઽલ્પસરોરુડાક્ષીં
વર્ગોત્તમસ્થઃ પ્રભુતાવિહીનામ્ ॥ ૧૧॥

શત્વાશ્રયસ્થો યદિ ભૂમિપુત્રો
ભાર્યાં વિધત્તે કઠિનસ્વભાવામ્ ।
તદંશકે વા હતબન્ધિવર્ગાં
મૂલત્રિકોણે પરસઙ્ગતાં ચ ॥ ૧૨॥

કામાશ્રયસ્થઃ શશિજઃ સ્વતુઙ્ગે
ભાર્યાં વિધત્તેઽદ્ભુતરૂપયુક્તામ્ ।
તુઙ્ગાંશકે વા બહુભોયુક્તાં
ષડ્વર્ગશુધ્દ્ધઃ કૃતમણ્ડનાં ચ ॥ ૧૩॥

નીચે ચ સૌમ્યઃ ખલુ સપ્તમસ્થઃ
કરોતિ ભાર્યાં કુનરાનુરક્તામ્ ।
નીચાંશકે વા વ્યસનાનુરક્તાં
પાપસ્ય વર્ગે ગુણવર્જિતાં ચ ॥ ૧૪॥

મિત્રાશ્રયસ્થો યદિ સોમપુત્રો
દારં પ્રસૂતે બહુપુત્રપુત્રમ્ ।
મિત્રાંશકે વા પ્રચુરાન્નપાનાં

વર્ગોત્તમસ્થઃ પ્રભયા સમેતામ્ ॥ ૧૫॥

શત્ર્વાશ્રયસ્થે યદિ કામગો જ્ઞો
ભાર્યાં સુવાતેઽર્થવિવર્જિતાં ચ ।
તદંશકે વા ધનધાન્યહીનાં
મૂલત્રિકોણે જનવલ્લભાં ચ ॥ ૧૬॥

જીવઃ કલત્રે યદિ તુઙ્ગસંસ્થઃ
કરોતિ દારં પ્રિયદર્શનં ચ ।
તુઙ્ગાંશકસ્થો બહુસૌખ્યયુક્તાં
ષડ્વર્ગશુદ્ધઃ સુકુલોદ્ભવાં ચ ॥ ૧૭॥

નીચાશ્રિતો દેવગુરુઃ કલત્રે
દારે વિધત્તે ન કુલોદ્ભવં ચ ।
નીચાંશકસ્થો બહુમાનયુક્તાં
પાપસ્ય વર્ગે પિશુનસ્વભાવામ્ ॥ ૧૮॥

મિત્રાશ્રયસ્થો મદને સુરેજ્યો
દારં વિધત્તે બહુસાધુમિત્રમ્ ।
મિત્રાંશકસ્થો મણિમૌક્તિકાઢ્યં
વર્ગોત્તમસ્થોઽતિવિશુદ્ધકાયામ્ ॥ ૧૯॥

શત્ર્વાશ્રયસ્થો મદને સુરેજ્યો
દારં વિધત્તે ચપલસ્વભાવમ્ ।
પરાંશકસ્થોઽતિકઠોરવાક્યાં
મૂલત્રિકોણે ગુણવર્જિતાં ચ ॥ ૨૦॥

શુક્રોઋસંસ્થો યદિ સપ્તમસ્થો
ભાર્યાં સુવતે બહુમિત્રપક્ષામ્ ।
તુઙ્ગાંશકસ્થો દ્વિજદેવભક્તાં
ષડ્વર્ગશુદ્ધસ્તુ પતિવ્રતાં ચ ॥ ૨૧॥

નીચાશ્રિતો દૈત્યગુરુઃ કલત્રે
કલત્રમુચ્છૈઃ કુરુતે પ્રાન્નમ્ ।
નીચાંશકસ્થસ્તુ સુરૂપનેત્રાં
પાપસ્ય વર્ગે ઘૃણયા વિહીનામ્ ॥ ૨૨॥

મિત્રાશ્રયસ્થઃ કુરુતે ચ શુક્રઃ
કામે સુકામાં સુભગાં ચ ભાર્યામ્ ।
મિત્રાંશકસ્થશ્ચ સુશુદ્ધચિન્તાં
વર્ગોત્તમસ્થો જનવલ્લભાં ચ ॥ ૨૩॥

શત્ર્વાશ્રયસ્થો ભૃગુજસ્તુ કામે
ભાર્યાં ઉવાતે સુતરાં પ્રહીનામ્ ।
તદંશકસ્થોઽપ્રકૃતસ્વભાવાં
મૂલત્રિકોણે સુસમન્વિતાં ચ ॥ ૨૪॥

શનૈશ્ચરસ્તુઙ્ગતઃ કલત્રે
સ્થૂલં કલત્રં કુરુતે નરાણામ્ ।
તુઙ્ગાંશકસ્થશ્ચ સુકૃષ્ણગાત્રાં
ષડ્વર્ગશુદ્ધો બહુદુઃખભાજામ્ ॥ ૨૫॥

નીચાશ્રિતઃ કામગતસ્તુ કોણો
દારં પ્રસૂતે વિકરાલગાત્રમ્ ।
નીચાંશકસ્થશ્ચ વિહીનધર્માં
પાપસ્ય વર્ગે પરરક્તચિન્તામ્ ॥ ૨૬॥

મિત્રાશ્રયસ્થઃ પ્રકરોતિ સૌરઃ
કામાશ્રિતઃ કોપપરં કલત્રમ્ ।
મિત્રસ્યભાગે ગુણવર્જિતાઙ્ગાં
પાપસ્ય વર્ગેઽતિખલસ્વભાવામ્ ॥ ૨૭॥

શત્ર્વાશ્રયસ્થો રવિજઃ કલત્રે
દારં પ્રસૂતે બહુપાપરક્તમ્ ।
તસ્યૈવ ભાગે પતિનિન્દિતાં ચ
મૂલત્રિકોણે વિધનાં સદૈવ ॥ ૨૮॥

પચાધિપો દેવગુરુઃ સિતશ્ચ
સોમો વિસંખ્યઃ શશિજો ગણાનામ્ ।
એકાધિપાઃ સૂર્યશનૈશ્ચરારાઃ
સ્વતુઙ્ગગાઃ સ્યુર્યદિ સદ્ગ્રહેન્દ્રાઃ ॥ ૨૯॥

ઇતિ શ્રીવૃદ્ધયવને કલત્રસ્થાનચિન્તા ॥

આધ્યાય ૩૧

મૃત્યુસ્થાનચિન્તાધ્યાયઃ

સૂર્યે યધ મૃત્યુતશ્ચ તુઙ્ગે
મૃત્યું વિધત્તેઽગ્નિનિવેશનેન ।
ભક્ત્યા તદંશે જનલજ્જમેવ
ષડ્વર્ગશુદ્ધસ્ત્વથવા પ્રમાદાત્ ॥ ૧॥

નીચાશ્રિતો વાસરપોઽષ્ટમસ્થો
મૃત્યું વિધત્તે વનપાવકેન ।
નીચાંશકે દમ્ભનકર્મતશ્ચ
પાપસ્ય વર્ગે તુ પ્રદીપનેન ॥ ૨॥

મિત્રાશ્રયસ્થો દિનપોઽષ્ટમસ્થો
મૃત્યું વિધત્તે વિષભક્ષણેન ।
મિત્રાંશકસ્થશ્ચ નિબન્ધનેન
વર્ગોત્તમસ્થો નિશિ તાપસેન ॥ ૩॥

શત્ર્વાશ્રયસ્થો દિનપોઽષ્ટમસ્થઃ
કરોતિ મૃત્યું રુધિરપ્રકોપાત્ ।
તદમ્શકે વા બહુકાસશોષાન્
મૂલત્રિકોણે વનિતાપરાધાત્ ॥ ૪॥

ચન્દ્રોઽષ્ટમસ્થો યદિ તુઙ્ગસંસ્થઃ
કરોતિ મૃત્યું સલિલપ્રવેશાત્ ।
તુઙ્ગાંશકસ્થઃ કરકાભિઘાતાત્
ષડ્વર્ગશુદ્ધસ્ત્વશનિપ્રપાતાત્ ॥ ૫॥

નીચાશ્રિતો રત્રિપતિઃ કરોતિ
છિદ્રે વિનાશં વનિતાકરેણ ।
નીચાંશકસ્થઃ કફપિત્તદોષાત્
પાપસ્ય વર્ગે ત્વથ સન્નિપાતાત્ ॥ ૬॥

મિત્રાશ્રયસ્થો રજનીપતિશ્ચ
કરોતિ મૃત્યું જઠરપ્રકોપાત્ ।
તસ્યૈવ ભાગે ગુદરોગતશ્ચ

વર્ગોત્તમસ્થઃ પશુપાદઘાતાત્ ॥ ૭॥

શત્વાશ્રયસ્થો વિધુરેવ ધત્તે
મૃત્યું નરાણાં બહુભૃત્યરોગાત્ ।
તદંશકસ્થઃ પશુશૃઙ્ગસઙ્ગાન્
મૂલત્રિકોણે ક્ષયરોગતશ્ચ ॥ ૮॥

ભૌમોઽષ્ટમસ્થો યદિ તુઙ્ગસંસ્થઃ
સઙ્ગામમૃત્યું કુરુતે નરાણામ્ ।
તુઙ્ગાંશકસ્થસ્ત્વથ શસ્ત્રકર્મ
ષડ્વર્ગસુદ્ધસ્ત્વથ ગોગ્રહેણ ॥ ૯॥

નીચાશ્રયસ્થો ધરણિજ છિદ્રે
સ્વહસ્તમૃત્યું કુરુતે નરાણાં
નીચાંશકસ્થશ્ચ નિજાયુધેન
પાપસ્ય વર્ગે દ્વિજપર્શ્વતશ્ચ ॥ ૧૦॥

..........અઃ ક્ષિતિજોઽષ્ટમસ્થઃ
કરોતિ મૃત્યું દૃષદાશ્રયેણ ।
મિત્રસ્ય ભાગે ત્વથ ગોષ્ઠસઙ્ગાદ્
વર્ગોત્તમસ્થસ્ત્વથ કૂપપાતાત્ ॥ ૧૧॥

શત્વાશ્રય્સ્થઃ ક્ષિતિજોઽષ્ટમસ્થો
ભૂકૂપપાતાશ્ચ કરોતિ મૃત્યુમ્ ।
તસ્યાંશકસ્થસ્ત્વથ ગુપ્તિરોધાન્
મૂલત્રિકોણે વિષભક્ષણેન ॥ ૧૨॥

સૌમ્યોઽષ્ટમસ્થો યદિ તુઙ્ગસંસ્થો
કરેણ મૃત્યું પ્રકરોતિ પુંસામ્ ।
તુઙ્ગાંશકસ્ય કફજૈર્વિકારૈઃ
ષડ્વર્ગશુદ્ધોઽનિલસમ્ભવૈશ્ચ ॥ ૧૩॥

નીચારયસ્થોઽષ્ટમગસ્તુ સૌમ્યઃ
કરોતિ મૃત્યું વ્રણવૈકૃતેન ।
નીચાંશકસ્થશ્ચ મહાભયેન
પાપસ્ય વર્ગે પ્રિયવિપ્રયેણ ॥ ૧૪॥

મિત્રાશ્રયસ્થો યદિ સોમપુત્રો
મૃત્યું વિધત્તે હૃદયપ્રકોપાત્ ।
મિત્રસ્ય ભાગેઽક્ષિરુજા નરાણાં
વર્ગોત્તમસ્થસ્ત્વથ ગુહ્યરોગાત્ ॥ ૧૫ ॥

શત્ર્વાશ્રય્સ્થઃ શશિજઃ પ્રસૂતે
મૃત્યું નરાણાં દૃઢબન્ધનેન ।
તસ્યૈવ ભાગે જઠરોત્થરોગાન્
મૂલત્રિકોણેઽગ્નિવ્રણેન પુંસામ્ ॥ ૧૬ ॥

જીવોઽષ્ટમસ્થો યદિ તુઙ્ગસંસ્થો
મૃત્યું વિધત્તે વિવિધૈશ્ચ રોગૈઃ ।
તુઙ્ગંશકસ્થસ્ત્વથ મૂલરોગાત્
ષડ્વર્ગશુધઃ શ્રવણપ્રકોપાત્ ॥ ૧૭ ॥

ગુરુઃ સ્વનીચે યદિ ચાષ્ટમસ્થો
મૃત્યુંવિધત્તે સ્વજનસ્ય હસ્તાત્ ।
તસ્યૈવ ભાગેઽથ વિષાગ્નિસઙ્ગાત્
પાપસ્ય વર્ગે ત્વતિસારતશ્ચ ॥ ૧૮ ॥

મિત્રાશ્રયસ્થો યદિ દેવમન્ત્રી
રન્ધ્રે વિનશં કુરુતે સ્વભૃત્યાત્ ।
તસ્યૈવ ભાગે રુધિરપ્રકોપાદ્
વર્ગોત્તમસ્થઃ સુરતાનુસઙ્ગાત્ ॥ ૧૯ ॥

શત્ર્વાશ્રયસ્થો યદિ દેવમન્ત્રી
રન્ધ્રે વિનાશં કુરુતે સકોપાત્ ।
તસ્યૈવ ભાગે શિરસઃ પ્રકોપાન્
મૂલત્રિકોણે બહુભક્ષણેન ॥ ૨૦ ॥

શુક્રોઽષ્ટમસ્થો યદિ તુઙ્ગસંસ્થઃ
પિપાસયાન્તં કુરુતે નરાણામ્ ।
તુઙ્ગાંશકસ્થશ્ચ મુખસ્ય શોષાત્
ષડ્વર્ગશુદ્ધો વરદુઃખતશ્ચ ॥ ૨૧ ॥

નીચાશ્રિતો દૈત્યગુરુશ્ચ રન્ધ્રે
મૃત્યું વિધત્તે ગુરુસન્નિપાતાત્ ।

નીચાંશકસ્થસ્ત્વથ વવશ્રરોગાત્
પાપસ્ય વર્ગે વનસત્ત્વતશ્ચ ॥ ૨૨॥

મિત્રાશ્રયસ્થો ભૃગુજઃ પ્રસૂતે
સ્થાનેઽષ્ટમે નાશમદેપ્રસઙ્ગાત્ ।
મિત્રાંશકસ્થો વિષકણ્ટકેન
વર્ગોત્તમસ્થત્વથ લૂતયા ચ ॥ ૨૩॥

શત્વાશ્રયસ્થો ભૃગુજોઽષ્ટમસ્થઃ
કરોતિ મૃત્યું વિષકણ્ટકેન ।
તદંશકસ્યઃ સુરતપ્રકોપાન્
મૂલત્રિકોણે પ્રચુરપ્રકોપાત્ ॥ ૨૪॥

શનૈશ્ચરસ્તુઙ્ગતોઽષ્ટમસ્થો
મૃત્યુમ્ વિધત્તેઽતિબુભુક્ષયા ચ ।
તુઙ્ગસ્ય ભાગે ગુરુલંઘનેન
પ્રાયોપવેશાદ્રસવર્ગોદ્ધઃ ॥ ૨૫॥

નીચાશ્રિતઃ સૂર્યસુતોઽષ્ટમસ્થો
મૃત્યું વિધત્તે નિજબન્ધુવર્ગાત્ ।
તસ્થૈવ ભાગે રિપુહસ્તતશ્ચ
પાપસ્ય વર્ગેઽત્ર પરીક્ષયેણ ॥ ૨૬॥

મિત્રાશ્રયથો રવિજઃ પ્રસૂતે
મૃત્યું મહાદદ્રુકૃતૈર્વિકારૈઃ ।
તસ્યૈવ ભાગે પિટકૈશ્ચ મૃત્યું
વર્ગોત્તમસ્થો વ્રણવૈકૃતેન ॥ ૨૮॥

શત્વાશ્ર્યસ્થો રવિજોઽષ્ટમસ્થો
મૃત્યું વિધત્તે હયપાદઘાતાત્ ।
તસ્યૈવભાગે કરિણઃ પ્રસઙ્ગાન્
મૂલત્રિકોણે ખરતઃ સકાશાત્ ॥ ૨૯॥

ઇતિ શ્રીવૃદ્ધયવને મૃત્યુસ્થાનચિન્તા ॥

ધર્મસ્થાનચિન્તાધ્યાયઃ

ધર્માશ્રિતો વાસરપઃ સ્વતુઙ્ગે
ધર્મં નૃણાં તાપસમેવ ધત્તે ।
તુઙ્ગાંશસંસ્થસ્ત્વથ દમ્ભદં ચ
ષડ્વર્ગશુદ્ધસ્ત્વથ વજ્જયા ચ ॥ ૧॥

નીચાશ્રયસ્થે દિનપસ્તુ ધર્મે
ધર્મેણ હીનં જનયેન્મનુષ્યમ્ ।
નીચાંશકસ્થશ્ચ કુકર્મરક્તં
પાપસ્ય વર્ગે પરધર્મરક્તમ્ ॥ ૨॥

મિત્રાશ્રયસ્થો દિનપસ્તુ ધર્મે
કૌલોત્થધર્મં કુરુતે નરાણામ્ ।
મિત્રાંશકે વૈકૃતિકં તથૈવ
વર્ગોત્તમસ્થોઽતિલઘુપ્રમાણમ્ ॥ ૩॥

શત્ર્વાશ્રયસ્થો દિનપસ્તુ ધર્મે
કૃતઘ્નધર્મં કુરુતે નરાણામ્ ।
તદંશકસ્થસ્ત્વથ ચૌરજં ચ
મૂલત્રિકોણેઽતિસુખોત્થમેવ ॥ ૪॥

ચન્દ્રઃ સ્વતુઙ્ગે યદિ ધર્મસંસ્થઃ
પ્રસાદ્ધર્મં કુરુતે નરાણામ્ ।
તદંશસંસ્થશ્ચ તદાગજં ચ
ષડ્વર્ગશુદ્ધો દ્વિજા..........દાનજં ચ ॥ ૫॥

.......... ॥ ૬॥

મિત્રાશ્રયસ્થો હિમગુશ્ચ ધર્મે
ધર્મં વિધતે સ્વકુટુમ્બદ..........
તદંશકે મિત્રજનોત્થમેવ ..........
વર્ગોત્તમસ્થોઽત્ર સમૃદ્ધિદમ્ ॥ ૭॥

શ્ત્ર્વાશ્રયસ્થો હિમગુશ્ચ ધર્મે
ધર્મં પ્રસૂતે વિટપાત્રદાનાત્ ।
તદંશકસ્થઃ પ્રમદાનુસઙ્ગાન્
મૂલત્રિકોણે બહુવિત્તદાનાત્ ॥ ૮॥

ભૌમઃ સ્વતુઙ્ગે યદિ ધર્મસંસ્થો
ધર્મં પ્રસૂતે રણજં નરાણામ્ ।
તુઙ્ગાંશકસ્થઃ પરસેવયા ચ
ષડ્વર્ગશુધ્દો ગુરુપોષણેન ॥ ૯॥

નીચાશ્રયસ્થઃ ક્ષિતિજસ્તુ ધર્મે
ધર્મં વિધત્તે ..........
તદણ્શકસ્થઃ પરદારલાભાત્
પાપસ્ય વર્ગે જનતાપરોધાત્ ॥ ૧૦॥

મિત્રાશ્રયસ્થ ક્ષિતિજસ્તુ ધર્મે
ધર્મં વિધત્તે સુહૃદપ્રકોપાત્ ।
તસ્થૈવ ભાગે બહુકોપતશ્ચ
વર્ગોત્તમસ્થઃ પરસેવયા ચ ॥ ૧૧॥

શત્ર્વાશ્રયસ્થઃ ક્ષિતિજસ્તુ ધર્મે
ધર્મં વિધત્તે ન કદાચિદેવ ।
તદાંશકસ્થઃ કનચૌરણાનાં
મૂલત્રિકોણે નમિતાર્જિતેન ॥ ૧૨॥

ધર્માશ્રિતઃ સોમસુતઃ સ્વતુઙ્ગે
ધર્મં વિધત્તે વરશત્રુજાતમ્ ।
તદંશકસ્થો દ્વિજદેવતાનાં
ષડ્વર્ગશુધો વ્રતપાલનેન ॥ ૧૩॥

નીચાશ્રયસ્થઃ શશિજસ્તુ ધર્મે
ધર્મં પ્રસૂતે કપદેન પુંસામ્ ।
તદંશકસ્થઃ કુહકપ્રયોગૈઃ
પાપસ્યવર્ગેઽથ છલેન નિત્યમ્ ॥ ૧૪॥

મિત્રાશ્રયસ્થ શશિજસ્તુ ધર્મે
ધર્મં પ્રસૂતે ગૃહદાનતશ્ચ ।
મિત્રાંશકે તાપસમેવ નિત્યં
વર્ગોત્તમસ્થો બહુવસ્ત્રદાનાત્ ॥ ૧૫॥

શત્ર્વશ્ર્યથઃ શશિજસ્તુ ધર્મે

ધર્મં વિધત્તેઽક્ષવિવર્જિતં ચ ।
તસ્યૈવ ભાગે ગુરુલોકાભાન્
મૂલત્રિકોણે બહુશાન્ત્યમેવ ॥ ૧૬॥

ધર્માશ્રિતો દેવગુરુઃ સ્વતુઙ્ગે
ધર્મં વિધત્તે પ્રચરં સદૈવ ।
તદંશકસ્થો ..........
ષડ્વર્ગશુદ્ધો દ્રુતમેવ પુંસામ્ ॥ ૧૭॥

નીચાશ્થિતો દેવગુરુશ્ચ ધર્મે
.......... સુવાતે કૃતકં નરાણામ્ ।
નીચાંશકસ્થો ગુરુણાનુરોધાત્
પાપસ્ય વર્ગે બહુતીર્થસઙ્ગાત્ ॥ ૧૮॥

મિત્રાશ્રયસ્થઃ સુરરાજમન્ત્રી
ધર્મં વિધત્તે બહુધર્મમાર્ગાત્ ।
મિત્રાંશકસ્થો વનિતામતેન
વર્ગોત્તમસ્થસ્તનયાનુસઙ્ગાત્ ॥ ૧૯॥

શત્વાશ્રયસ્થઃ કુરુતે સુરેજ્યો
ધર્મે નરાણાં સુનયેન ધર્મમ્ ।
તદંશકસ્થો ગુરુપોષણેન
મૂલત્રિકોણે ધૃણયાનુરોધાત્ ॥ ૨૦॥

શુક્રોશ્ચસંસ્થો યદિ ધર્મસંસ્થો
ધર્મં પ્રસૂતે વરદાનજાતમ્ ।
..........આન્નજં તસ્ય વિભાગસંસ્થઃ
ષડ્વર્ગશુદ્ધઃ પિતૃતર્પણેન ॥ ૨૧॥

નીચાંશકસ્થો ભૃગુજશ્ચ ધર્મે
ધર્મં પ્રસૂતે પરદેશસઙ્ગાત્ ।
તદંશકસ્થોઽધ્વગલોકસઙ્ગાત્
વર્ગોત્તમસ્થઃ સુમુખૈરનેકૈઃ ॥ ૨૨॥

મિત્રાશ્રયસ્થો ભૃગુજસ્તુ ધર્મે
ધર્મં સુવાતેઽલ્પફલં નરાણામ્ ।
તસ્થૈવ ભાગે ચ વિનિસયેન

પાપસ્ય વર્ગે પરવંચનેન ॥ ૨૩॥

શત્વાશ્રયસ્થો ભૃગુજશ્ચ ધર્મે
ધર્મં પ્રસૂતે પરલોકસઙ્ગાત્ ।
તદંશકસ્થોઽરિનિષેવણેન
મૂલત્રિકોણે કૃષિકર્મલાભાત્ ॥ ૨૪॥

શનૈશ્ચરસ્તુઙ્ગતસ્તુ ધર્મે
ધર્મં વિધત્તે વયસિ તૃતીયે ।
તદંશકસ્થોઽલ્પતરં પરં ચ
ષડ્વર્ગોર્દ્ધસ્ત્વથ ભક્તિબાહ્યમ્ ॥ ૨૫॥

નીચાશ્રિતઃ સૂર્યોતસ્તુ ધર્મે
ધર્મેણ હીનં જનયેન્મનુષ્યમ્ ।
તદંશકસ્થઃ પરધર્મરક્તં
પાપસ્ય વર્ગે કવલોદ્ભવં ચ ॥ ૨૬॥

મિત્રાશ્રયસ્થોઽર્કસુતસ્તુ ધર્મે
ધર્મં વિધત્તે સતતં સુગર્હમ્ ।
તદંશકસ્થસ્ત્રયજ..........
વર્ગોત્તમસ્થો નૃપસેવયા ચ ॥ ૨૭॥

શત્વાશ્રયસ્થોઽર્કસુતસ્તુ ધર્મે
કૃચ્છેણ ધર્મં જનયેત્ સુસૂક્ષ્મમ્ ।
તદંશસ્થઃ પરદર્શનોત્થં
મૂલત્રિકોણે ગુરુલબ્ધમાનાત્ ॥ ૨૮॥

ઇતિ શ્રીવૃદ્ધયવને ધર્મસ્થાનચિન્તા ॥

---

આધ્યાય ૩૩
કર્મસ્થાનચિન્તાધ્યાયઃ

કર્માશ્રિતસ્તીક્ષ્ણકરઃ સ્વતુઙ્ગે
કરોતિ કર્મ વ્રતકૃત્યમેવ ।
તદંશકસ્થો વધબન્ધજં ચ
ષડ્વર્ગશુદ્ધઃ સકલં કલાજમ્ ॥ ૧॥

નીચાશ્રિતસ્તીક્ષ્ણકરોડમ્બરસ્થો
નૃણાં વિધત્તે બહુદાસકર્મ ।
તસ્યૈવ ભાગે વણિજોદ્ભવં ચ
વર્ગોત્તમસ્થો વણિજપ્રસૂતમ્ ॥ ૨॥

મિત્રાશ્રયસ્થો દિનકૃત્ ખસંસ્થઃ
કરોતિ પુંસાં કૃષિજં ચ કર્મ ।
મિત્રસ્ય ભગે કુનૃપસ્ય સેવજં
પાપસ્ય વર્ગે વધબન્ધજમ્ ॥ ૩॥

શત્વાશ્રયસ્થો દિનપો નરાણા
દદાતિ કર્માશુભમેવ નિત્યમ્ ।
તસ્યૈવ ભાગે જનગર્હિતં ચ
મૂલત્રિકોણે ખરસેવજં ચ ॥ ૪॥

કર્માશ્રિતઃ શીતકરઃ સ્વતુઙ્ગે
કરોતિ કર્મ પ્રથિતં નૃલોકે ।
તસ્યૈવ ભાગે દ્વિજદેવજં ચ
ષડ્વર્ગશુદ્ધો વરદાનભાજમ્ ॥ ૫॥

નીચાશ્રિતઃ શીતકરોડમ્બરસ્થો
દદાતિ કર્મતિસલજ્જમેવ ।
તસ્યૈવ ભાગે ક્રયવિક્રયોત્થં
પાપસ્ય વર્ગે વ્યસનોદ્ભવં ચ ॥ ૬॥

મિત્રાશ્રયસ્થો યદિ શીરશ્મિઃ
કર્માશ્રિતઃ કર્મ દદાતિ સૌમ્યમ્ ।
તસ્યૈવ ભાગે બહુશાસ્ત્રભાજં
વર્ગોત્તમસ્થો મખજં સદૈવ ॥ ૭॥

શત્વાશ્રયસ્થોડમ્બરગો નિશેશઃ
કર્મ પ્રસૂતે સુતરાં નૃશંસમ્ ।
તસ્યૈવ ભાગે વનિતોદ્ભવં ચ
મૂલત્રિકોણે નૃપદૈત્યજાતમ્ ॥ ૮॥

ભૌમોડમ્બસ્તસ્થો યદિ તુઙ્ગસંસ્થો
યુદ્ધોદ્ભવં કર્મ દદાતિ પુંસામ્ ।

તસ્યાંશકે ધૂતસમુદ્ભવં ચ
ષડ્વર્ગશુદ્ધઃ સ્મરજં નિતાન્તમ્ ॥ ૯॥

નીચાશ્રિતો ભૂતનયોઽમ્બરસ્થઃ
કર્મ પ્રસૂતે પરદારજાતમ્ ।
તદંશકસ્થો ગણિકોદ્ભવં ચ
પાપસ્ય વર્ગે હ્યુભયં સદૈવ ॥ ૧૦॥

મિત્રાશ્રયસ્થઃ ક્ષિતિજોઽમ્બરસ્થઃ
કર્મ પ્રસૂતેઽક્ષમમુદ્ધવં ચ ।
તસ્યાંશકસ્થો બહુભારજાતં
વર્ગોત્તમસ્થઃ પ્રણયેન હીનમ્ ॥ ૧૧॥

શત્ર્વાશ્રયસ્થઃ ક્ષિતિજો નભોગઃ
કર્મ પ્રસૂતે બહુદૈન્યજાતમ્ ।
તસ્યૈવ ભાગે ત્વથ ભિક્ષજં ચ
મૂલત્રિકોણેઽમ્બરકાષ્ઠજાતમ્ ॥ ૧૨॥

સૌમ્યઃ સ્વતુઙ્ગે યદિ કર્મસંસ્થઃ
કર્મ પ્રસૂતે ધનધાન્યજાતમ્ ।
તસ્યૈવ ભાગે ચ ચતુષ્પદોત્થં
ષડ્વર્ગેદ્ધો ગજવાજિજાતમ્ ॥ ૧૩॥

નીચાશ્રિતઃ સોમસુતોઽમ્બરસ્થઃ
કર્મ પ્રસૂતે નિજમેવ પુંસામ્ ।
તસ્યૈવ ભાગે પરદેશજાતં
પાપસ્ય વર્ગે ખલજં સદૈવ ॥ ૧૪॥

મિત્રાશ્રયસ્યઃ શશિજોઽમ્બરસ્થઃ
કર્મ પ્રસૂતે હયવિક્રયોત્થમ્ ।
તસ્યૈવ ભાગે રજતં નરાણાં
વર્ગોત્તમસ્થોઽદ્ભુતમિત્રજાતમ્ ॥ ૧૫॥

શત્ર્વાશ્રયસ્થઃ શશિજોઽમ્બરસ્થઃ
કર્મ પ્રસૂતે બહુકષ્ટજાતન્ ।
તસ્યૈવ ભાગે ગુણવર્જિતં ચ
મૂલત્રિકોણે સુયશોદ્ભવં ચ ॥ ૧૬॥

જીવોઽમ્બરસ્થો યદિ તુઙ્ગસંસ્થો
દદાતિ કર્મ પ્રચુરં પ્રધાનમ્ ।
તદંશકસ્થો દ્વિજપૂજનોત્થં
ષડ્વર્ગશુદ્ધઃ સુજનાર્થનોત્થમ્ ॥ ૧૭॥

નીચાશ્રિતો દેવગુરુઃ સસંસ્થઃ
કરોતિ કર્માધમલોકસેવ્યમ્ ।
તદંશકસ્થોઽદ્ભુતચૌર્યજાતં
પાપસ્ય વર્ગેઽર્થવિવર્જિતં ચ ॥ ૧૮॥

મિત્રાશ્રયસ્થો દશમે સુરેજ્યઃ
કરોતિ કર્માણિ શુભાનિ નિત્યમ્ ।
તદંશસંસ્થો નૃપતેઃ સમુત્થં
વર્ગોત્તમસ્થો મહિષીગવોત્થમ્ ॥ ૧૯॥

શત્ર્વાશ્રયસ્થો દશમે સુરેજ્યઃ
કર્મ પ્રસૂતે સતતં કૃતઘ્નમ્ ।
તસ્યૈવ ભાગે પરવંચનેન
મૂલત્રિકોણે નૃપતેરભીષ્ટમ્ ॥ ૨૦॥

તુઙ્ગાશ્રયસ્થોઽમ્બરગો ભૃગુશ્ચ
મર્મ પ્રસૂતે જનવલ્લભં ચ ।
તસ્યૈવ ભાગે મણિમૌક્તિકાઢ્યં
ષડ્વર્ગશુદ્ધઃ કનકોદ્ભવં ચ ॥ ૨૧॥

નીચાશ્રયસ્થઃ ભૃગુજઃ ખસંસ્થઃ
કર્મ પ્રસૂતે વનિતાશ્રિતં ચ
તસ્યૈવ ભાગેઽલ્પસુખં નિતાન્તં
પાપસ્ય વર્ગે ગુરુદુઃખજં ચ ॥ ૨૨॥

મિત્રાશ્રયસ્થો ભૃગુજોઽમ્બરસ્થઃ
કરોતિ કર્મ પ્રભુતાસમેતમ્ ।
તસ્યૈવ ભાગે નિજબન્ધુજાતં
વર્ગોત્તમસ્થો બહુગૌરવાઢ્યમ્ ॥ ૨૩॥

શત્ર્વાશ્રયસ્થો ભૃગુજોઽમ્બરસ્થઃ

કર્મ પ્રસૂતે વિરજં નૃશંસમ્ ।
તસ્યૈવ ભાગે બહુચિન્તયાઢ્યં
મૂલત્રિકોણેઽનૃતસંયુતં ચ ॥ ૨૪॥

તુઙ્ગાશ્રિતઃ સૂર્યસુતોઽમ્બરસ્થઃ
કર્મ પ્રસૂતેઽતિમૃદુસ્થિરં ચ ।
તસ્યૈવ ભાગે બહુશિલ્પજં ચ
ષદ્વર્ગશુધ્દ્ધઃ પ્રિયસાધ્વસં ચ ॥ ૨૫॥

નીચાશ્રિતઃ સૂર્યસુતોઽમ્બરસ્થઃ
કર્મ પ્રસૂતે દ્વિજદ્રોહજાતમ્ ।
તસ્યૈવ ભાગે નૃપસેવજં ચ
પાપસ્ય વર્ગે સનૃશંસરૂપમ્ ॥ ૨૬॥

મિત્રાશ્રિતો ભાસ્કરજશ્ચ ખસ્થઃ
કરોતિ કર્મ પ્રભુતાવિહીનમ્ ।
તસ્યૈવ ભાગે નૃપસેવજં ચ
વર્ગોત્તમસ્થો મૃગયા સમેતમ્ ॥ ૨૭॥

શત્ર્વાશ્રયસ્થોઽર્કીતોઽમ્બરસ્થઃ
કર્મ પ્રસૂતે બહુકષ્ટજાતમ્ ।
તસ્યૈવ ભાગે પરપૌશુનોત્થં
મૂલત્રિકોણે ભિષજોદ્ભવં ચ ॥ ૨૮॥

ઇતિ શ્રીવૃધ્દ્ધયવને કર્મસ્થાનચિન્તા ॥

---

આધ્યાય ૩૪

લાભસ્થાનચિન્તાધ્યાયઃ

લાભાશ્રિતસ્તીક્ષ્ણકરઃ સ્વતુઙ્ગે
લાભં વિધત્તે ગજવાજિજં ચ ।
તસ્યૈવ ભાગે મહિષિસમુત્થં
ષડ્વર્ગશુધ્દ્ધઃ કનકોદ્ભવં ચ ॥ ૧॥

નીચાશ્રિતો વાસરપસ્તુ લાભે
લાભં વિધત્તે જલપાદપાનામ્ ।
તસ્યૈવ ભાગે ચ કુધાન્યકાનાં

પાપસ્ય વર્ગે પરયોષિતાં ચ ॥ ૨॥

મિત્રાશ્રયસ્થો દિનપસ્તુ લાભે
લાભં પ્રસૂતે સુહૃદાં સદૈવ ।
મિત્રાંશકસ્થઃ કુલયોષિતાનો
વર્ગોત્તમસ્થ પ્રવરાર્યકાણામ્ ॥ ૩॥

શત્ર્વાશ્રયસ્થો દિનકૃચ્ચ લાભે
લાભં પ્રસૂતે રથકમ્બલાનામ્ ।
તદંશકસ્થઃ ખલમાનવાનાં
મૂલત્રિકોણે ગુણિનાં નિતાન્તમ્ ॥ ૪॥

લાભાશ્રિતઃ શીતકરઃ સ્વતુઙ્ગે
લાભં વિધત્તે મણિમૌક્તિકાનામ્ ।
તસ્યૈવ ભાગે દ્રવિણાન્નકાનાં
ષડ્વર્ગશુદ્ધઃ પ્રિયમાનુષાણામ્ ॥ ૫॥

નીચાશ્ર્યસ્થો હિમગુશ્ચ લાભે
લાભં પ્રસૂતે કુકલત્રકાણામ્ ।
તદંશકસ્થસ્તુ સુસેવકાનાં
પાપસ્ય વર્ગે પરપૈશુનાનામ્ ॥ ૬॥

મિત્રાશ્રયસ્થો હિમગુશ્ચ લાભે
લાભં વિધત્તે બહુબન્ધવાનામ્ ।
તસ્યૈવ ભાગે નદનર્તકાનાં
વર્ગોત્તમસ્થઃ પ્રવરાર્થકાનામ્ ॥ ૭॥

શત્ર્વાશ્રયસ્થો હિમગુશ્ચ લાભે
લાભં પ્રસૂતે બહુકન્દજાનામ્ ।
તદંશકસ્થો હિ મહીરુહાણાં
મૂલત્રિકોણે ક્ષિતિમૃદ્રુહાણામ્ ॥ ૮॥

ભૌમઃ સ્વતુઙ્ગે યદિ લાભસંસ્થો
લાભં વિધત્તે ચ ચતુષ્પદાનામ્ ।
તસ્યૈવ ભાગેઽત્ર સુભક્ષકાણાં
ષડ્વર્ગશુદ્ધો નૃપમણ્ડલાનામ્ ॥ ૯॥

લાભાશ્રિતો ભૂતનયસ્તુ નીચે
લાભં વિધત્તે બહુશૌર્યજાતમ્ ।
તસ્યૈવ ભાગે બહુવંચનોત્થં
પાપસ્ય વર્ગે વધબન્ધુજાતમ્ ॥ ૧૦॥

મિત્રાશ્રયસ્થઃ ક્ષિતિજસ્તુ લાભે
લાભં વિધત્તે નૃપલોકજાતમ્ ।
તદંશકસ્થસ્તુ મહાજનોત્થં
વર્ગોત્તમસ્થો હ્યુભયં સદૈવ ॥ ૧૧॥

શત્વાશ્રયસ્થઃ ક્ષિતિજસ્તુ લાભે
લાભં સુવાતે બહુવચકાનામ્ ।
તસ્યૈવ ભાગે પર્તર્કકાનાં
મૂલત્રિકોણેઽદ્ભુતભૂષણાનામ્ ॥ ૧૨॥

સૌમ્યઃ સ્વતુઙ્ગે યદિ લાભસંસ્થો
લાભં સુવાતે બહુશાસ્ત્રજાતમ્ ।
તસ્યૈવ ભાગે વિવિધૈરુપાયૈઃ
ષડ્વર્ગશુદ્ધસ્ત્વથ સર્વવિધામ્ ॥ ૧૩॥

લાભાશ્રિતઃ સોમસુતસ્તુ નીચે
લાભં વિધત્તે બહુનીચસઙ્ગાત્ ।
તસ્યૈવ ભાગે કૃતકાનુસઙ્ગાત્
પાપસ્ય વર્ગેઽન્ત્યજલોકપાર્શ્વાત્ ॥ ૧૪॥

મિત્રાશ્રયસ્થઃ શશિજસ્તુ લાભે
લાભં વિધત્તે પરલોકજાતમ્ ।
તસ્યૈવ ભાગે નિજવિધયાતો
વર્ગોત્તમસ્થો વ્યવહારતશ્ચ ॥ ૧૫॥

શત્વાશ્રયસ્થઃ શશિજસ્તુ લાભે
કરોતિ લાભં વિતથોપચારાત્ ।
તસ્યૈવ ભાગે કપટૈરનેકૈ-
ર્મૂલત્રિકોણે ક્રયવિક્રયાભ્યામ્ ॥ ૧૬॥

જીવઃ સ્વતુઙ્ગે યદિ લાભસંસ્થો
નરેન્દ્રલાભં કુરુતે નરાણામ્ ।

તસ્યૈવ ભાગે નૃપસેવકાનાં
ષડ્વર્ગશુદ્ધઃ પ્રચુરપ્રભાવાત્ ॥ ૧૭॥

નીચાશ્રિતો દેવગુરુશ્ચ લાભે
લાભં નરાણાં કુરુતે ધનં ચ ।
નીચાંશકસ્થો ભૃતકાહ્વયાનાં
પાપસ્ય વર્ગે બહુકષ્ટતશ્ચ ॥ ૧૮॥

મિત્રાશ્રયથઃ કુરુતે સુરેજ્યો
લાભં ચ લાભે રજતોદ્ભવં ચ ।
તસ્યાંશકસ્થો બહુધાતુજાતં
વર્ગોત્તમસ્થઃ સુજનોદ્ભવં ચ ॥ ૧૯॥

શત્ર્વાશ્રયસ્થઃ કુરુતે સુરેજ્યો
લાભં ચ લાભે પુરુષાધમાનામ્ ।
તસ્યૈવ ભાગે ગુણવર્જિતાનાં
મૂલત્રિકોણે વિવિધ ..........જાનામ્ ॥ ૨૦॥

શુક્રઃ સ્વતુઙ્ગે યદિ લાભસંસ્થો
લાભં સુવાતે સુતબાન્ધવોત્થમ્ ।
તસ્યાંશકસ્થો નૃપકન્યકોત્થં
ષડ્વર્ગશુદ્ધો દ્વિતયસ્ય ચાસ્ય ॥ ૨૧॥

નીચાશ્રયસ્થો ભૃગુજસ્તુ લાભે
લાભં વિધત્તે ચ કુપશ્યકાનામ્ ।
તદંશકસ્થસ્તુ કુબુદ્ધિકાનાં
પાપસ્ય વર્ગે દ્વિજનિન્દિતાનામ્ ॥ ૨૨॥

મિત્રાશ્રયથો ભૃગુજસ્તુ લાભે
કરોતિ લાભં વરવાહનાનામ્ ।
તસ્યૈવ ભાગે વરસુન્દરીણાં
વર્ગોત્તમસ્થઃ પ્રિયદર્શનાનામ્ ॥ ૨૩॥

શત્ર્વાશ્રયથો ભૃગુજશ્ચ લાભે
કરોતિ લાભં હતબાન્ધવાનામ્ ।
તસ્યૈવ ભાગે ગતસૌહૃદાનાં
મૂલત્રિકોણે સુખિનાં સદૈવ ॥ ૨૪॥

સૌરોચ્છસંસ્થો યદિ લાભસંસ્થો
લાભં વિધત્તે પુરુષોત્તમાનામ્ ।
તસ્યૈવ ભાગે ધનધાન્યકાનાં
વર્ગોત્તમસ્થઃ પ્રવરાર્થિતાનામ્ ॥ ૨૫॥

નીચાશ્રિતઃ સૂર્યોતસ્તુ લાભે
લાભં વિધત્તે બહુપાતકાનામ્ ।
તસ્યૈવ ભાગે જનનર્દિતાનાં
પાપય વર્ગે મતિવર્જિતાનામ્ ॥ ૨૬॥

મિત્રાશ્રયસ્થોઽર્કસુતસ્તુ લાભે
લાભં વિધત્તે બહુમિત્રનાતમ્ ।
તસ્યૈવ ભાગે વનિતાસમુત્યં
વર્ગોત્તમસ્થઃ શુભકર્યલાભમ્ ॥ ૨૭॥

શત્વાશ્રયસ્થોઽર્કસુતસ્તુ લાભે
લાભં વિધત્તે બહુવિત્તજં ચ ।
તસ્યૈવ ભાગે કૃમિજં સદૈવ
મૂલત્રિકોણે સ્થિરધર્મજાતમ્ ॥ ૨૮॥

ઇતિ શ્રીવૃધ્દ્યવને લાભસ્થાનચિન્તા ॥

આધ્યાય ૩૫
વ્યાયસ્થાનચિન્તાધ્યાયઃ
વ્યયસ્થિતો વાસરપઃ સ્વતુઙ્ગે
વ્યયં વિધત્તે શ્રુ..........લો........સઙ્ગાત્ ।
તસ્યૈવ ભાગે ગુરુસેવકાનાં
ષડ્વર્ગશુધ્દ્રો દ્વિજદેવ.......... ર્યાત્ ॥ ૧॥

નીચારયસ્થો વ્યયગોદિનેશો
વ્યયં પ્રસૂતે કુજનાત્ કુસઙ્ગાત્ ।
તસ્યૈવ ભાગે વનિતાનિરોધાદ્
વર્ગોત્તમસ્થો નૃપસઙ્ગામાશ્ચ ॥ ૨॥

મિત્રાશ્રયસ્થો વ્યયગો દિનેશો

વ્યયં વિધત્તે બહુમિત્રકાર્યે ।
તસ્યૈવ ભાગે કુકલત્રતશ્ચ
પાપસ્ય વર્ગેઽન્ત્યજકારણેન ॥ ૩॥

શત્ર્વાશ્રયસ્થો વ્યયગો દિનેશો
વ્યયં વિધત્તે ગણિકાનુસઙ્ગાત્ ।
તસ્યૈવ ભાગે કુજનાનુરાગાન્
મુલત્રિકોણે જનતઃ સદૈવ ॥ ૪॥

ચન્દ્રો વ્યયસ્થો યદિ તુઙ્ગસંસ્થો
વ્યયં પ્રસૂતેઽક્ષવિદેવનેન ।
તસ્યૈવ ભાગે ક્રયવિક્રયાભ્યાં
ષડ્વર્ગશુદ્ધો દ્વિજસેવનાશ્ચ ॥ ૫॥

નીચાશ્રયસ્થઃ શશભૃદ્જયસ્થો
વ્યયં પ્રસૂતે પરમારિસઙ્ગાત્ ।
તસ્યૈવ ભાગે પરલોકસઙ્ગાત્
પાપસ્ય વર્ગે બહુપાપતશ્ચ ॥ ૬॥

મિત્રાશ્રયસ્થો વ્યયગઃ શશાઙ્કો
વ્યયં વિધત્તે સુહૃદાં પ્રસઙ્ગાત્ ।
ત્સ્યૈવ ભાગે નિજબન્ધુમાનાદ્
વર્ગોત્તમસ્થઃ પ્રિયસઙ્ગમાશ્ચ ॥ ૭॥

શત્ર્વાશ્રયસ્થો વ્યયગઃ શશાઙ્કો
વ્યયં વિધત્તે રિપુલોકતશ્ચ ।
તસ્યૈવ ભાગે બહુધા ચ સર્વં
મૂલત્રિકોણે નિજબન્ધુતશ્ચ ॥ ૮॥

ભૌમો વ્યયસ્થો યદિ તુઙ્ગસમ્સ્થો
વ્યયં વિધત્તે રણજૈર્વિકારૈઃ ।
તસ્યૈવ ભાગે પરવંચનેન
ષડ્વર્ગશુદ્ધો રણજાદ્વિકારાત્ ॥ ૯॥

નીચારયસ્થઃ ક્ષિતિજો વ્યયસ્થો
વ્યયં વિધત્તેઽન્ત્યજલોકસઙ્ગાત્ ।
તસ્યૈવ ભાગે વ્યસનૈરનેકૈઃ

પાપસ્ય વર્ગે ખલસઙ્ગમેન ॥ ૧૦॥

મિત્રાશ્રયસ્થઃ ક્ષિતિજો વ્યયસ્થો
વ્યયં સુવાતે વિતથં નરાણામ્ ।
તસ્યૈવ ભાગે પિતૃકર્મજાતં
વર્ગોત્તમસ્થઃ સુહૃદાનુરાગાત્ ॥ ૧૧॥

શત્વાશ્રયસ્થઃ ક્ષિતિજો વ્યયસ્થો
વ્યયં સુવાતે ચ ચતુષ્પદોત્થમ્ ।
તસ્યૈવ ભાગે બહુરોગાત..........
મૂલત્રિકોણે વરબન્દિતશ્ચ ॥ ૧૨॥

સૌમ્યો વ્યયસ્થો યદિ તુઙ્ગસંસ્થો
વ્યયં વિધત્તે બહુગીતવાદ્યૈઃ ।
તસ્યૈવ ભાગે ગુણિનાં પ્રસઙ્ગાત્
ષડ્વર્ગોદ્ધોઽગ્નિપરિગ્રહેણ ॥ ૧૩॥

નીચાશ્રયસ્થો વ્યયગશ્ચ સૌમ્યો
વ્યયં પ્રસૂતે ધનસઙ્ગમેન ।
તસ્યૈવ ભાગેઽધમલોકજાતં
પાપસ્ય વર્ગે નૃપલોકદાનાત્ ॥ ૧૪॥

મિત્રાશ્રથઃ શશિજો વ્યયસ્થો
વ્યયં સુવાતે ભુમિત્રસઙ્ગાત્ ।
તસ્યૈવ ભાગે નિજબાન્ધવાનાં
વર્ગોત્તમસ્થો વ્રતિનાં સદૈવ ॥ ૧૫॥

શત્વાશ્રયસ્થઃ શશિજો વ્યયસ્થો
વ્યયં સુવાતે સુતજં સદૈવ ।
તસ્યૈવ ભાગે સુતદારજં ચ
મૂલત્રિકોણે વરભોગતશ્ચ ॥ ૧૬॥

વીવો વ્યયસ્થો યદિ તુઙ્ગસંસ્થો
વ્યયં પ્રસૂતે ગુરુલોકદાનાત્ ।
તસ્યૈવ ભાગે ગુરુસેવકાનાં
ષડ્વર્ગશુદ્ધો નિજબાન્ધવાનામ્ ॥ ૧૭॥

નીચાશ્રિતો દેવગુરુર્વ્યયસ્થો
વ્યયં સુવાતે વ્યવહારજાતમ્ ।
તસ્યૈવ ભાગે તુ કુસીદજાતં
પાપસ્ય વર્ગે વણિજોત્થમેવ ॥ ૧૮॥

મિત્રાશ્રયસ્થો વ્યયગઃ સુરેજ્યો
વ્યયં વિધત્તે પરવાદતશ્ચ ।
તસ્યૈવ ભાગે પરદેશસઙ્ગાત્
વર્ગોત્તમસ્થઃ પ્રણયાનુરોધાત્ ॥ ૧૯॥

શત્ર્વાશ્રયસ્થો વ્યયગઃ સુરેજ્યો
વ્યયં સુવાતે વ્યસનૈર્વિચિત્રૈઃ ।
તસ્યૈવ ભાગે મતિવિભ્રમેણ
મૂલત્રિકોણે સુરતોપરોધાત્ ॥ ૨૦॥

શુક્રો વ્યયસ્થો યદિ તુઙ્ગસંસ્થો
વ્યયં પ્રસૂતે વ્રતજૈર્વિકારૈઃ ।
તસ્યૈવ ભાગે બહુશાસ્ત્રરગાત્
ષડ્વર્ગશુદ્ધઃ પ્રિયસઙ્ગમેન ॥ ૨૧॥

નીચાશ્રયસ્થો ભૃગુજો વ્યયસ્થો
વ્યયં વિધત્તે નૃપલોકસઙ્ગાત્ ।
તસ્યૈવ ભાગે પરરોષતશ્ચ
પાપસ્ય વર્ગે દસ્યતશ્ચ નિત્યમ્ ॥ ૨૨॥

મિત્રાશ્રયસ્થો ભૃગુજો વ્યયસ્થો
વ્યયં વિધત્તે બહુભક્ષણેન ।
તસ્યૈવ ભાગે બહુપાનયોગાદ્
વર્ગોત્તમસ્થઃ ક્ષિતિજૈર્વિકારૈઃ ॥ ૨૩॥

શત્ર્વાશ્રય ભૃગુજો વ્યયસ્થો
વ્યયં પ્રસૂતે રણકર્મયોગાત્ ।
તસ્યૈવ ભાગે જનવિપ્લવેન
મૂલત્રિકોણે વિતથોપચારૈઃ ॥ ૨૪॥

મન્દો વ્યયસ્થો યદિ તુઙ્ગસમ્સ્થો
વ્યયં સુવાતેઽધમકર્મજાતમ્ ।

તસ્યૈવ ભાગેઽધમ્મિત્રસઙ્ગાત્
ષડ્વર્ગશુદ્ધો નિજબન્ધુદોષાત્ ॥ ૨૫॥

નીચાશ્રિતઃ સૂર્યસુતો વ્યયસ્થો
વ્યયં પ્રસૂતેઽન્ત્યજમાન્તશ્ચ ।
તસ્યૈવ ભાગેઽદ્ભુતવાદસઙ્ગાત્
પાપસ્ય વર્ગે નિજબન્ધનેન ॥ ૨૬॥

મિત્રાશ્રયસ્થો રવિજઃ પ્રસૂતે
વ્યયં વિધત્તે બહુમિત્રરોધાત્ ।
તસ્યૈવ ભાગે સુતદાસદોષાદ્
વર્ગોત્તમસ્થઃ પ્રણયપ્રકોપાત્ ॥ ૨૭॥

શત્ર્વાશ્રયસ્થોઽર્કસુતો વ્યયસ્થો
વ્યયં સુવાતે કરણાનુરોધાત્ ।
તસ્યૈવ ભાગે બહુલૌલ્યદોષાન્
મૂલત્રિકોણે પ્રિયસઙ્ગમાશ્ચ ॥ ૨૮॥

ઇતિ શ્રીવૃદ્ધયવને વ્યાયસ્થાનચિન્તા ॥

---

આધ્યાય ૩૬

લગ્નદર્શનચારાધ્યાયઃ

લગ્નેઽર્કદૃષ્ટે સુનૃશંસચેષ્ટો
ભવેન્મનુષ્યઃ પુરુષસ્વભાવઃ ।
સદાભિમાની નતિધર્મસંસ્થો
રુજાન્વિતો દ્વેષરતઃ સુભીતઃ ॥ ૧॥

ચન્દ્રેક્ષિતે ધર્મપરો મનુષ્યો
ભવેદ્વિલગ્ને વરયાનભોગી ।
સ્ત્રીભોગભોગી પ્રભયા સમેતઃ
પ્રિયંવદઃ શાસ્ત્રકલાનુરક્તઃ ॥ ૨॥

કુજેક્ષિતે શ્લેષ્મવિકારદોષૈઃ
સમ્પીડ્યતે રક્તસમુદ્ભવૈશ્ચ ।
લગ્ને મનુષ્યઃ પરિભૂતદેહઃ
સદાતુરસ્ત્રાસસમન્વિતશ્ચ ॥ ૩॥

બુધેન દૃષ્ટે સુરસત્યભાગી..........
ભવેન્નરઃ સત્યપરઃ સુશીલઃ ।
નરેન્દ્રપૂજ્યઃ પ્રથિતઃ પૃથિવ્યાં
પ્રિયંવદો દાનપ્રોડલ્પકાયઃ ॥ ૪॥

લગ્ને સુરેજ્યેન વિલોકિતે ચ
ભવેન્નરો રત્નગજાશ્વભાજઃ ।
નાનાર્થલાભૈઃ સહિતઃ પ્રગલ્ભઃ
પ્રધાનસેવ્યો દ્વિજદેવભક્તઃ ॥ ૫॥

શુક્રેક્ષિતે સત્યપરો મનુષ્યો
ભવેન્નરઃ પુણ્યપરઃ કૃતજ્ઞઃ ।
યજ્યા વિવેકી સુદૃઢ્યપ્રતાપી
હન્તા વિપક્ષઃ પ્રણતઃ પ્રસન્નઃ ॥ ૬॥

સૌરેણ દૃષ્ટેડલ્પસુખો વિલગ્ને
ભવેન્મનુષ્યો ભયસઙ્કુલાત્મા ।
રોગાન્વિતઃ સ્વલ્પસુ.........
નીચાનુરક્તઃ સતતં કૃતઘ્નઃ ॥ ૭॥

ઇતિ સ્રીવૃધ્દ્ધયવને લગ્નદર્શનચારઃ ॥

---

આધ્યાય ૩૭

અનફાયોગાધ્યાયઃ

સૂર્યં વિના રાત્રિપતેર્વ્યયસ્થો
યદા ગ્રહઃ સ્યાદ્બહવોડથવા સ્યુઃ ।
સ્યાતામથ દ્વૌ ત્વનફાખ્યયોગ
ઉત્પદ્યતે રૂપગુણપ્રમાણઃ ॥ ૧॥

ભૌમે વ્યયસ્થે શશિનઃ પ્રચણ્ડો
ભવેન્મનુષ્યઃ પરવિત્તહારી ।
.......... પરેષમતિપુષ્તકાયઃ
સૌર્યાન્વિતઃ પ્રાણધરો ગુરુશ્ચ ॥ ૨॥

ચન્દ્રસ્ય સૌમ્યે વ્યયગે પ્રસન્નો

વિદ્યાધિકઃ શાસ્ત્રપરઃ સદૈવ ।
વિભુઃ પ્રતાપી પ્રમદાનુકુલઃ
પ્રભૂતમિત્રઃ પ્રણતારિપક્ષઃ ॥ ૩॥

ચન્દ્રસ્ય જીવે વ્યયગે વિનિતો
નરો ભવેદ્ધર્મપરઃ કૃતજ્ઞઃ ।
પ્રભાવયુક્તો લલનાસ્વભીષ્ટઃ
સુરૂપકાયો નૃપવલ્લભશ્ચ ॥ ૪॥

શુક્રે વ્યયસ્થે શશિનો નિરીહો
ગુણપ્રધાનઃ પ્રણયેન હૃષ્ટઃ ।
ભવેન્મનુષ્યઃ સુરતાનુકુલઃ
પ્રિયંવદઃ કામવિશારદશ્ચ ॥ ૫॥

કરોતિ ચન્દ્રાદ્વ્યયગોઽર્કપુત્રો
નરં નિતાન્તં પ્રકટસ્વભાવમ્ ।
સ્થૂલં પ્રભૂતાભરણૈઃ સમેતં
જિતારિપક્ષં ક્ષમયાન્વિતં ચ ॥ ૬॥

વ્યયસ્થિતૌ રાત્રિપતેર્જ્ઞભૌમૌ
નરં પ્રસૂતે પ્રણતં સુરૂપમ્ ।
વિદ્વેષહીનં સુતખિન્નયુક્તં
નયાનુરક્તં પ્રિયસઙ્ગમં ચ ॥ ૭॥

જીવાવનેયૌ કુરુતે મનુષ્યં
વ્યયસ્થિતો રાત્રિપતેઃ પ્રગલ્ભમ્ ।
સુવાજિસારં જિતશત્રુસંઘં
નતં ગુરૂણાં સતતં વિધિજ્ઞમ્ ॥ ૮॥

સૌરાવનેયૌ દધતો મનુષ્યં
વ્યયાશ્રિતૌ નૈ નૃપતેઃ ક્ષતારિમ્ ।
પ્રભૂતકોશં સુતસત્યયુક્તં
વિનીતવેષાભરણં સદૈવ ॥ ૯॥

ચન્દ્રાદ્વ્યયસ્થૌ યદિ જીવસસૌમ્યૌ
નરં દધાતે પ્રથિતં નૃલોકે ।
દયાધિકં શાસ્ત્રકથાનુરક્તં

સસંમતં સાધુજનસ્ય નિત્યમ્ ॥ ૧૦॥

ચન્દ્રાદ્વ્યયસ્થૌ યદિ શુક્રસૌમ્યૌ
નરં દધાતે પ્રિયવિપ્રકૃત્યમ્ ।
સ્વદારરક્તં નૃપમાનભાજં
જિતેન્દ્રિયં શૌચપરં સુવિજ્ઞમ્ ॥ ૧૧॥

ચન્દ્રાદ્વ્યયસ્થૌ યદિ સૌરસૌમ્યૌ
નરં પ્રસૂતે પ્રભુતાસમેતમ્ ।
પ્રભૂતમિત્રં પ્રથિતાભિમાન્
ગુણાધિકં દેવગુરુર્પ્રભક્તમ્ ॥ ૧૨॥

ચન્દ્રાદ્વ્યયસ્થૌ યદિજીવશુક્રૌ
નરં પ્રસૂતેઽદ્ભુતરૂપગાત્રમ્ ।
કૃતાનુરક્તં પિતૃમાતૃભકતં
શાસ્ત્રપ્રિયં પ્રાણભૃતં વરિષ્ઠમ્ ॥ ૧૩॥

ચન્દ્રાદ્વ્યયસ્થૌ યદિ જીવસૌરૌ
રનં દધાતે સુતવિત્તતુષ્ટમ્ ।
ગુણાનુરક્તં નૃપકાર્યદક્ષં
વિનીતવાક્યં રણકોવિદં ચ ॥ ૧૪॥

ચન્દ્રાદ્વ્યયસ્થૌ યદિ  શુક્રસૌરૌ
નરં પ્રસૂતે સ્થિરતાસમેતમ્ ।
પ્રભૂતદારં ગતરોગવિત્તં
મહાવ્યયં શાસ્ત્રપરં સદૈવ ॥ ૧૫॥

જીવારસૌમ્યા વ્યયગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્યુઃ પ્રણતં મનુષ્યમ્ ।
નૃપપ્રિયં સર્વકુલપ્રધાનં
પ્રજધિકં કીર્તિસમન્વિતં ચ ॥ ૧૬॥

શુક્રારસૌમ્યા વ્યયગા યદા સ્યુઃ
કુર્યુર્નરં સત્યપરં દયાલુમ્ ।
હસ્ત્યશ્વયાનાસન્ભોજનાઢ્યં
વિહીનશત્રું ગુણસઙ્ગ્રહં ચ ॥ ૧૭॥

સૌરારસૌમ્યા વ્યયગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્યુર્દૃઢતાસમેતમ્ ।
નરં પ્રશસ્તં નિતરાં પ્રગલ્ભં
ખ્યાતં પ્રિયં બાન્ધવવલ્લભં ચ ॥ ૧૮॥

શુક્રારજીવા વ્યયગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્યવ્રંતિનં મનુષ્યમ્ ।
માતાપિતૃભ્યાં પ્રણતં ચ શૂરં
નીરોગધં નૃપતેરભીષ્ટમ્ ॥ ૧૯॥

સૌરારજીવા વ્યયગા યદા સ્યુ-
ચન્દ્રય કુર્યુઃ કૃપયા સમેતમ્ ।
નરં સતાં પ્રીતિકરં વિધિજ્ઞં
પ્રભૂતસસ્યં દ્રવિણં સુસત્યમ્ ॥ ૨૦॥

સૌરારશુક્રા વ્યયગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્યુઃ સુભગં મનુષ્યમ્ ।
યગ઼્ ્યાનુરક્તં હયવાહનજ્ઞં
પ્રભૂતકીર્તિં સુતરાં સુરૂપમ્ ॥ ૨૧॥

શુક્રજ્ઞજીવા વ્યયગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્યુઃ સુતલાલસં ચ ।
નરં સદા દાનપરં હયાઢ્યં
પ્રિયાતિથિં સર્વસમં સુસત્યમ્ ॥ ૨૨॥

સૌરજ્ઞજીવા વ્યયગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્યુઃ પ્રવરં મનુષ્યમ્ ।
રોગૈર્વિહીનં શુભચક્ષુઃશ્રોત્રં
નાનાયુધાનાં પ્રવિચક્ષણં ચ ॥ ૨૩॥

સૌરગ઼્ ્યશુક્રા વ્યયગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્યુર્વિનયપ્રધાનમ્ ।
નરેન્દ્રયાનં વિવિધાન્નપાનં
ભોગાન્વિતં સર્વકલાસુ દક્ષમ્ ॥ ૨૪॥

સુરેજ્યશુક્રાર્કસુતા વ્યયસ્થાઃ
કુર્યુર્નરં ભૂરિધનં વિનીતમ્ ।

શ્રિયાન્વિતં પ્રાણપરં સલજ્જં
જિતેન્દ્રિયં વિપ્રપરં નયજ્ઞમ્ ॥ ૨૫॥

સુરેજ્યશુક્રગ્ઽ્યકુજા વ્યયસ્થા-
શ્ચન્દ્રસ્ય કુર્યુર્બહુવાહનાઢ્યમ્ ।
નરં પ્રસન્નં વિનયપ્રધાનં
સુસંમતં સર્વકલાસુ દક્ષમ્ ॥ ૨૬॥

સુરેજ્યસૌરજ્ઞકુજા વ્યયસ્થાઃ
કુર્યુર્નરં પુણ્યપ્રં ક્ષતારિમ્ ।
નૃપપ્રસાદેન સુતુષ્ટચિન્તં
વુખ્યાતક્રમાણમલોલુપં ચ ॥ ૨૭॥

સુરેજ્યશુક્રારદિનેશપુત્રા ..........
વ્યયસ્થિતા રાત્રિપતેર્યદા સ્યુઃ ।
કુર્યુસ્તદા ભૂરિસુતં મનુષ્યં
વિદ્યાધિકં રોગવિવર્જિતં ચ ॥ ૨૮॥

શુક્રારસૌમ્યાર્કસુતા વ્યયસ્થાઃ
કુર્યુઃ શશાઙ્કસ્ય સતામભીષ્તમ્ ।
નરં પ્રચણ્ડં પ્રભુતાસમેતં
ગજાશ્વવસ્ત્રાભરણૈઃ સમેતમ્ ॥ ૨૯॥

શુક્રગ્ઽ્યજીવાર્કસુતા વ્યયસ્થા-
શ્ચન્દ્રસ્ય કુર્યુર્વ્યસનૈર્વિમુક્તમ્ ।
નરં પ્રસૂતે પ્રિયવાક્યદક્ષં
વિદગ્ધનારીસહિતં સદૈવ ॥ ૩૦॥

સુરેજ્યશુક્રજ્ઞશનૈશ્ચરારા-
શ્ચન્દ્રાદ્વ્યયસ્થાઃ સતતં ચ કુર્યુઃ ।
પ્રભૂતભાવં હતશત્રુદર્પં
નરં નિતાન્તં જનસંમતં ચ ॥ ૩૧॥

ઇતિ શ્રીવૃધ્દ્ધયવનેઽનફાયોગાધ્યાયઃ ॥

આધ્યાય ૩૮

સુનફાયોગાધ્યાયઃ

સૂર્યં વિના રાત્રિપતેર્ધનસ્થો
યદા ગ્રહઃ સ્યાદ્બહવોઽથવા સ્યુઃ ।
સ્યાતાનય દ્વૌ સુનફાખ્યયોગ
હસ્યદ્યતે રૂપગુણૈઃ સદૈવ ॥ ૧॥

ચન્દ્રસ્ય ભૌમૌ યદિ વિત્તસંસ્થો
નરં પ્રસૂતે સુતરાં ધનાઢ્યમ્ ।
ધર્મધ્વજં પ્રાણભૃતાં વરિષ્ઠં
પ્રભૂતમિત્રં જનવલ્લભં ચ ॥ ૨॥

દ્વિતીયગઃ સોમસુતો યદા સ્યા-
શ્ચન્દ્રસ્ય ધત્તે સુભગં મનુષ્યમ્ ।
પ્રભૂતવિત્તં ધનધાન્યયુક્તં
ગુણાનુરક્ત જનસંમતં ચ ॥ ૩॥

ગુરુર્ભવેચ્છયદિ વિત્તસંથ-
શ્ચન્દ્રસ્ય ધત્તે પ્રણતં મનુષ્યમ્ ।
સ્વભાવશુધ્દં પ્રિયસાધુકૃત્ય
મહાજનૈઃ શંસિતમેવ નિત્યમ્ ॥ ૪॥

ચન્દ્રસ્ય શુક્રો યદિ વિત્તસંસ્થો
નરં વિધત્તેઽદ્ભુતકૃત્યદક્ષમ્ ।
જનાનુરક્તં વિભવૈઃ સમેતં
સુશંસિતં બ્રાહ્મણસંમતં ચ ॥ ૫॥

ચન્દ્રસ્ય સૌરો વિત્તસંસ્થો
નરં વિધત્તે બહુલાભભાજમ્ ।
પ્રભૂતહસ્ત્યગ્વગણૈઃ સમેતં
કુલપ્રધાનં શુભક્રમરક્તમ્ ॥ ૬॥

ધનસ્થિતૌ રાત્રિપતેર્ગ઼્યવક્રૌ
નરં સદા દમ્ભધૃતં કૃતઘ્નમ્ ।
વિદગ્ધવાક્યં બહુધર્મભાજં
ગતવ્યયં પાર્થિવવલ્લભં ચ ॥ ૭॥

સુરેજ્યવક્રૌ યદિ વિત્તસંસ્થૌ

ચન્દ્રસ્ય મર્ત્યં દધતઃ પ્રધાનમ્ ।
મનસ્વિનં શત્રુજનૈર્વિહીનં
સદા પ્રસુષ્ટં બહુધર્મભાજમ્ ॥ ૮॥

શુક્રાવનેયૌ યદિ વિત્તસંસ્થૌ
ચન્દ્રસ્ય વિત્તં દધતો નરાણામ્ ।
નરાક્રમં ભૂરિયશઃપ્રતાપં
શત્રુક્ષયં બાન્ધવસઙ્ગમં ચ ॥ ૯॥

સૌરાવનેયૌ યદિ વિત્તસંસ્થૌ
ચન્દ્રસ્ય ધત્તઃ સુભગં મનુષ્યમ્ ।
વિદ્યાવિવેકાગમશાસ્ત્રરક્તં
મહાપ્રભાવં પ્રચુરાર્થયુક્તમ્ ॥ ૧૦॥

સુરેજ્યસૌમ્યૌ યદિ વિત્તસંસ્થૌ
ચન્દ્રસ્ય પુંસાં દધતઃ પ્રતાપમ્ ।
ધર્માર્થસિદ્ધિં પ્રિયતાં ચ લોકે
પૂજ્યોત્તમાનાં જગતાં જનાનામ્ ॥ ૧૧॥

દૈત્યેજ્યસૌમ્યૌ યદિ વિ..........સ્થૌ
ધનં તદા સંદધતો નરાણામ્ ।
ચન્દ્રસ્ય મિત્રાશ્વગજૈઃ ..........એ........અં
સુસાધુવાદં નયસઙ્ગહ ચ ॥ ૧૨॥

શનૈશ્ચરજ્ઞૌ યદિ વિત્તસંસ્થૌ
ચન્દ્રસ્ય પુંસાં દધતઃ ક્ષમાં ચ ।
ધર્મસ્ય વૃદ્ધિં ગુરુદેવભક્તિં
જિતેન્દ્રિયત્વં બહુસસ્યલાભમ્ ॥ ૧૩॥

સુરેજ્યશુક્રૌ યદિ વિત્તસંસ્થૌ
..........પુંસાં દધતો મતિં ચ ।
સુસાધુસન્માનમરિપ્રણાશ..........
સુશીલતાં સાધુજનેન સખ્યમ્ ॥ ૧૪॥

સુરેજ્યસૌરૌ યદિ વિત્તસંસ્થૌ
ચન્દ્રસ્ય પુંસાં દ્ધતોઽદ્ભુતાનિ ।
સૌખ્યાનિ દારાત્મજસમ્ભવાનિ

સહાશ્વવસ્ત્રૌઘસુવર્ણસંઘૈઃ ॥ ૧૫॥

ધનસ્થિતૌ શુક્રદિનેશપુત્રૌ
ચન્દ્રસ્ય ધત્તો ધનપુત્રદારાન્ ।
ગુણાનુરાગં પ્રિયતાં ચ લોકે
સુશીલતાં ભૂરિપુરાધિપત્યમ્ ॥ ૧૬॥

જીવજ્ઞભૌમા યદિ વિત્તસંસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ વિભું ચ પુંસામ્ ।
પુરાધિપત્યં જનતાધિપત્યં
વિદ્વજ્જનિઃ સઙ્ગમમિષ્ટલાભમ્ ॥ ૧૭॥

શુક્રજ્ઞભૌમા યદિ વિત્તસંસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ સુખં નરાણામ્ ।
પ્રિયાતિથિત્યં જનતોપરોધં
વિદગ્ધતાં વીર્યવિશુદ્ધિમેવ ॥ ૧૮॥

સૌરશ્ચભૌમા યદિ વિત્તસંસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ નરં ધનાઢ્યમ્ ।
નિર્મુક્તવૈરં સુતબન્ધુમાન્યં
..........આભરણં વિદગ્ધમ્ ॥ ૧૯॥

જીવારશુક્રા યદિ વિત્તસંસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ નૃણાં પ્રહર્ષમ્ ।
ગુણાનુરાગં વિજયં પ્રમોદં
વિદગ્ધતાં વૈરિનિનાશનં ચ ॥ ૨૦॥

.......... ॥ ૨૧॥

મન્દારશુક્રા ધનગા યદા સ્યુ-
ર્નરં પ્રકુર્વન્તિ સુશીલચેષ્ટમ્ ।
જનાનુકૂલં વિભવૈઃ સમેતં
ધર્મધ્વજં ચારુવિશાલનેત્રમ્ ॥ ૨૨॥

જીવજ્ઞશુક્રા ધનગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્વન્તિ સદા પ્રભુત્વમ્ ।
કૃતજ્ઞતાં સાધુજરોન્દ્રિયત્વં

વિદ્વજ્જનૈઃ સઙ્ગમનં સદૈવ ॥ ૨૩॥

જીવજ્ઞસૌરા ધનગા યદા સ્યુ-
શ્ચન્દ્રસ્ય કુર્વન્તિ યશોર્થલાભમ્ ।
નરેન્દ્રસત્યં પ્રિયતાં ચ લોકે
કીર્તિં સદા સાધુસમાગમં ચ ॥ ૨૪॥

શુક્રજ્ઞસૌરા યદિ વિત્તસંસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ કલત્રભાજમ્ ।
નરેન્દ્રપૂજ્યં પ્રિયતાં ચ લોકે
તીર્થાનુરાગં સતતં નરાણામ્ ॥ ૨૫॥

જીવાર્કિશુક્રા યદિ વિત્તસંસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ ગજાશ્વલાભમ્ ।
મનોવિશુદ્ધિં સુકલત્રલાભં
વિવેકતાં તીર્થરતિ ..........અત્વમ્ ॥ ૨૬॥

સુરેજ્યશુક્રજ્ઞકુજા ધનસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ સુપાર્થિવેભ્યઃ ।
પ્રભૂતલાભં સ્મૃતિશાસ્ત્રસારં
સદા નરાણાં પ્રવિવેકમેવ ॥ ૨૭॥

સુરેજ્યસૌરજ્ઞકુજા ધનસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ બહુપ્રતાપમ્ ।
સુતાર્થલાભં સુજનપ્રહર્ષ-
મધ્યં ચ ભૂપાદિસમાગમં ચ ॥ ૨૮॥

સૌમ્યારશુક્રાર્કસુતા ધનસ્થા-
શ્ચન્દ્રસ્ય કુર્વન્તિ મહાધનાનિ ।
નૃણાં સુચેષ્ટા વિવિ..........
કલત્રપુત્રાર્થનિષેવણં ચ ॥ ૨૯॥

સુરેજ્યશુક્રારદિનેશપુત્રા-
શ્ચન્દ્રસ્ય કુર્વન્તિ ધનાશ્રિતાશ્ચ ।
ધનં પ્રભૂતં જનતાનુરાગં
પ્રસિદ્ધિમોજોદ્ભતલાભમેવ ॥ ૩૦॥

સુરેજ્યશુક્રગ઼્યદિનેશપુત્રા
..........આશ્રિતા રાત્રિપતેર્નરાણામ્ ।
કુર્વન્તિ રાજ્યં બહુવિત્તલાભં
સુસત્યતાં ભોગવિવૃદ્ધિમેવ ॥ ૩૧॥

ઇતિ શ્રીવૃધ્દ્યવને સુનફાયોગાધ્યાયઃ ॥

---

આધ્યાય ૩૯
દુર્ધારાયોગાધ્યાયઃ
સૂર્યં વિના દ્વાદ્શવિત્તસંથૈ-
શ્ચન્દ્રસ્ય યોગોઽત્ર હિ દુર્ધરાખ્યઃ ।
અશીતિયુક્તં સતમેવ તેષાં
પૃથક્ પ્રદિષ્ટ ઉશુભં સમગ્રમ્ ॥ ૧॥

બુધે વ્યયસ્થે ધનગે ચ ભૌમે
..........જાતોઽત્ર મનુશ્યધર્મઃ ।
ભવેદ્ધિ..........પ્રચુરપ્રતાપ........
ક્ષિતીજ્ઞરાણામતિવલ્લભશ્ચ ॥ ૨॥

ભૌમે વ્યયસ્થે શશૈજે ધનસ્થે
મર્ત્યઃ પ્રભવેદ્ધિનીતઃ ।
શાસ્ત્રાનુરક્તઃ પ્રણતઃ પ્રગલ્ભઃ
સદાનુરક્તઃ સુરસત્ત્વમાનામ્ ॥ ૩॥

જીવે વ્યયસ્થે .......... ક્ષિતિજે ધનસ્થે
ચન્દ્રસ્ય મર્ત્યોઽત્ર ભવેત્ સુરૂપઃ ।
શ્રિયાન્વિતઃ સત્યરતઃ કૃતજ્ઞઃ
પ્રિયંવદઃ શાસ્ત્રકથાનુરક્તઃ ॥ ૪॥

જીવે ધનસ્થે ક્ષિતિજે વ્યયસ્થે
ચન્દ્રસ્ય જાતોઽત્ર ભવેન્મનુષ્યઃ ।
કુલપ્રધાનો વિજેદેવભક્તઃ
સદા વિનીતો જનવલ્લભશ્ચ ॥ ૫॥

ભૌમે વ્યયસ્થે ભૃગુજે ધનસ્થે
ચન્દસ્ય જાતઃ સુભગો મનુષ્યઃ ।

ભવેદ્વિદગ્ધશ્ચ સભાસમેતઃ
પ્રભૂતવિત્તઃ સુતરાં શ્રુતશ્ચ ॥ ૬॥

શુક્રે વ્યયસ્થે ક્ષિતિજે ધનસ્થે
ચન્દ્રસ્ય જાતોઽત્ર ભવેન્મનુષ્યઃ ।
.......... રતુષ્ટઃ પ્રવરાશ્ચકોશો
દાક્ષિણ્યવિદ્યાવૌભોગભાજઃ ॥ ૭॥

સૌરે વ્યયસ્થે ક્ષિતિજે ધનસ્થે
નિશાપતેઃ પુણ્યપરો મનુષ્યઃ ।
ભવેન્નિરિહઃ ક્ષતશત્રુપક્ષઃ
પ્રિયાતિથિઃ કાન્તિપરઃ કૃતજ્ઞઃ ॥ ૮॥

સદા વિભોગી નૃપમોહનશ્ચ
નરેન્દ્રપૂજ્યઃ સુભગઃ પ્રતાપી ।
ભૌમે વ્યયસ્થેઽર્કસુતે ધનસ્થે
ચન્દ્રસ્ય જાતો મનુજઃ સદૈવ ॥ ૯॥

જીવે વ્યયસ્થે શશિજે ધનસ્થે
ચન્દ્રસ્ય જાતઃ પ્રિયવાન્ મનુષ્યઃ ।
સુસાધુવન્દ્યઃ શ્રુતિબુદ્ધિયુક્તઃ
કૃપાસમેતઃ સતતં સુભોગી ॥ ૧૦॥

જીવે ધનસ્થે શશિજે વ્યયસ્થે
ચન્દ્રસ્ય જાતઃ સુજનાનુયાયી ।
નરો ભવેદ્રોગવિમુક્તદેહઃ
સન્તુષ્ટચિત્તો વિનયાન્વિતશ્ચ ॥ ૧૧॥

સૌમ્યે વ્યયસ્થે ભૃગુજે ધનસ્થે
ચન્દ્રસ્ય મર્ત્યઃ પ્રભવેત્ સુદારઃ ।
પ્રિયાતિથિઃ સત્યદયાન્વિતશ્ચ
સમ્પૂજિતઃ શીલધનપ્રભાવાત્ ॥ ૧૨॥

સૌમ્યે ધનસ્થે ભૃગુજે વ્યયસ્થે
ચન્દ્રસ્ય જાતઃ પ્રથિતાભિમાનઃ
ભવેન્મનુષ્યઃ સુજનપ્રવીણો
ભોક્તા વિભાગી વિનયેન યુક્તઃ ॥ ૧૩॥

મન્દે વ્યયસ્થે શશિજે ધનસ્થે
ચન્દ્રસ્ય જાતઃ પતિતાગમશ્ચ ।
ભવેન્મનુષ્યઃ પ્રથિતોઽભિમાની
નીતિપ્રિયઃ પ્રાણભૃતાં વરિષ્ઠઃ ॥ ૧૪॥

.......... ॥ ૧૫॥

જીવે વ્યયસ્થે ભૃગુજે ધનસ્થે
ચન્દ્રસ્ય જાતોઽત્ર ભવેન્મનુષ્યઃ ।
સમ્પૂર્ણકાયઃ કૃતૈર્વિહીનો
સતામભીષ્ટો નૃપવલ્લભશ્ચ ॥ ૧૬॥

જીવે ધનસ્થે ભૃગુજે વ્યયસ્થે
સઙ્ગામદક્ષસ્તુ ભવેન્મનુષ્યઃ ।
ઝ્ન્દ્રસ્ય નાનાવિધહેમભાજો
જનપ્રધાનઃ પ્રથિતોઽભિમાની ॥ ૧૭॥

જીવે વ્યયસ્થેઽર્કસુતે ધનસ્થે
ચન્દ્રસ્ય જાતો બહુબુદ્ધિભાજઃ ।
ભવેન્મનુષ્યઃ શ્રુતિશાસ્ત્રરક્તઃ
કલાસુ દક્ષો ગુણસાગરશ્ચ ॥ ૧૮॥

જીવે ધનસ્થેઽર્કસુતે વ્યયસ્થે
મનસ્વનાં મુખ્યતમો નરઃ સ્યાત્ ।
ચન્દ્રસ્ય દાતા સુકૃપઃ પ્રગલ્ભઃ
સુશીલવિત્તાર્જનતત્પરશ્ચ ॥ ૧૯
શુક્રે વ્યયસ્થેઽર્કસુતે ધનસ્થે
ચન્દ્રસ્ય જાતો બહુપુણ્યસેવી
ભવેમનુષ્યઃ સતતં ગુણાઢ્યઃ
પ્રભૂતકોશઃ પ્રચુરપ્રગલ્ભઃ ॥ ૨૦॥

શુક્રે ધનસ્થેઽર્કસુતે વ્યયસ્થે
ભવેન્મનુષ્યો ભયતઃ સુવીરઃ ।
સદાન્યદેશાર્જિતવિત્તતુષ્ટઃ
ક્ષિતીશ્વરસ્યાભિમતઃ સુધામઃ ॥ ૨૧॥

ચન્દ્રસ્ય ભૌમો યદિ વિત્તસંસ્થો
વ્યયસ્થિતૌ જીવબુધૌ મનુષ્યઃ ।
ભવેત્ પ્રધાનઃ શુભકર્મરક્તઃ
પ્રભૂતલાભઃ સુતરાં સુભોગી ॥ ૨૨॥

ચન્દ્રસ્ય ભૌમો યદિ રિષ્ફસંસ્થો
ધનસ્થિતૌ જીવબુધૌ મનુષ્યઃ ।
ભવેન્નૃપાણાં કર્ણૈઃ કનિષ્ઠઃ
સુવસ્ત્રવિદ્યાગમસદ્યભાજઃ ॥ ૨૩॥

ચન્દ્રસ્ય ભૌમો યદિ વિત્તસંસ્થો
વ્યયસ્થિતૌ ભાર્ગવસોમપુત્રૌ ।
નરો ભવેન્નીતિપરસ્તથાઢ્યઃ
પ્રભૂતમિત્રાભરણૈશ્ચ દક્ષઃ ॥ ૨૪॥

ચન્દ્રસ્ય ભૌમો વ્યયગો યદા સ્યાદ્
ધનસ્થિતૌ ભાર્ગવસોમપુત્રૌ ।
ભવેન્મનુષ્યઃ પ્રણયપ્રધાનઃ
પ્રિયંવદઃ પાર્થિવવર્ધિતશ્ચ ॥ ૨૫॥

નિશાપતેર્ભૂતન્યો વ્યયસ્થો
ધનસ્થિતૌ મન્દશશાઙ્કપુત્રૌ ।
યદા તદા સત્યપરો મનુષ્યો
ભવેદ્વિદગ્ધો વનિતાસખશ્ચ ॥ ૨૬॥

ભૌમઃ શશાઙ્કસ્ય યદા દ્વ્સ્થો
વ્યયસ્થિતૌ સૌમ્યદિનેશપુત્રો ।
તદા પ્રગલ્ભઃ પ્રચુરાન્નપાનઃ
પ્રભૂતકોશઃ પ્રભવેન્મનુષ્યઃ ॥ ૨૭॥

નિશાપતેર્ભૂતનયો વ્યયસ્થો
ધનાશ્રિતૌ જીવભૃગૂ પ્રધાનઃ ।
નરો ભવેત્ સત્યપરોઽત્ર જાત
મુદારચેષ્ટઃ પ્રણતઃ પ્રસિધ્દઃ ॥ ૨૮॥

ભૌમો ધનસ્થે રજનીપતેશ્ચ
વ્યયસ્થિતૌ ભાર્ગવદેવપૂજ્યૌ ।

ભવેન્મનુષ્યઃ પ્રથિતાભિમાનો
રત્નાર્થસસ્યાદિહિરણ્યસારઃ ॥ ૨૯॥

વ્યયસ્થિતે ભૂમિસુતે હિમાંશો-
ર્ધનાશ્રયસ્થૌ યદિ જીવસૌરૌ ।
તદા મનુષ્યઃ પ્રભવેત્ સુશીલઃ
કલાસુ દક્ષઃ ક્ષતશત્રુપક્ષઃ ॥ ૩૦॥

ધનસ્થિતૌ ભૂતનયે હિમાંશૌ-
ર્વ્યયસ્થિતૌ સૌરૌરેશપૂજ્યૌ ।
સ્યાતાં તદા સ્યાત્ સુતદારવિત્તૈઃ
સન્તુષ્ટચિન્તઃ પ્રવરો મનુષ્યઃ ॥ ૩૧॥

હિમદ્યુતેર્ભૂતનયો વ્યયસ્થો
યદા ધનસ્થૌ ભૃગુસૂર્યપુત્રૌ ।
તદા ભવેત્ પુણ્યપરો મનુષ્યો
ગુણાનુરક્તઃ પ્રચિતાભિમાનઃ ॥ ૩૨॥

ધને યદિ સ્યાત્ ઇતિજો વ્યયસ્થૌ
શુક્રાર્કપુત્રૌ પ્રચુરપ્રતાપઃ ।
ભવેશ્ચ્ જાતઃ પરદેશકૃત્યો
વિખ્યાતકીર્તિઃ શ્રુતિસંયુતશ્ચ ॥ ૩૩॥

હિમદ્યુતે સોમસુતો વ્યયસ્થૌ
ધનસ્થિતૌ વક્રસુરેશપુજ્યૌ ।
તદા ભવેન્મુખ્યતમઃ સ્વવર્ગે
પ્રિયંવદઃ પ્રાજ્ઞત્મઃ પ્રભુત ॥ ૩૪॥

.......... ॥ ૩૫॥

ચન્દ્રસ્ય સૌમ્યો યદિ રિષ્ફસંસ્થો
હનસ્થિતૌ વક્રભૃગૂ પ્રધાનઃ ।
તદા મનુષ્યઃ સ્મૃતિવાક્યરક્તઃ
શ્રુતિપ્રધાનો નયનાભિરાતઃ ॥ ૩૬॥

હિમદ્યુતેઃ સોમસુતો ધનસ્થો
વ્યયસ્થિતૌ ભૌમભૃગૂ પ્રધાનઃ

નરો ભવેત્ સર્વસહઃ કૃતઘ્નઃ
સ્વદારસન્તુષ્ટમનાઃ સદૈવ ॥ ૩૭॥

સૌમ્યઃ શશાઙ્કસ્ય યદા વ્યયસ્થો
ધનસ્થિતૌ સૂર્યજભૂમિપુત્રૌ ।
નરોઽત્ર જાતઃ પ્રભવેત્ સુરૂપઃ
પ્રિયંવદોઽનલ્પમતિઃ સુધર્મઃ ॥ ૩૮॥

સૌમ્યો ધનસ્થો હિમગોર્યદા સ્યાત્
સ્યાતાં કુજાર્કિ યદિ રિષ્ફ્ગૌ તૌ ।
તદા ભવેદ્ભૂરિધનો મનુષ્યઃ
પ્રિયાતિથિઃ સત્યપરો દયાવાન્ ॥ ૩૯॥

સૌમ્યો વ્યયસ્થો યદિ શીતરશ્મે-
ર્ધનસ્થિતૌ શુક્રસુરેશપૂજ્યૌ ।
તદા નરઃ સ્યાદ્બહુવિત્તયુક્તો
વિવેકવિદ્યાગમશાસ્ત્રલુબ્ધઃ ॥ ૪૦॥

વ્યયસ્થિતૌ શુક્રસુરેશપૂજ્યૌ
હનસ્થિતો જ્ઞો રજનીપતેશ્ચ ।
તદા મનુષ્યઃ પ્રભવેત્ કૃતજ્ઞો
દેવદ્વિજાનાં સતતં પ્રસક્તઃ ॥ ૪૧॥

સૌમ્યો વ્યયસ્થો યદિ શીતરશ્મે-
ર્ધનસ્થિતૌ સૂરિશનૈશ્ચરૌ તુ ।
તદા વિનિતઃ પ્રણતારિપક્ષઃ
સુરૂપગાત્રઃ પ્રચુરાન્નપાનઃ ॥ ૪૨॥

સૌમ્યૌ ધનસ્થો યદિ શીતરશ્મે-
ર્વ્યયસ્થિતૌ જીવદિનેશપુત્રૌ ।
તદા મનુષ્યઃ સુકૃતાનુરક્તો
ભવેન્મહાત્મા બહુવિત્તભાજઃ ॥ ૪૩॥

ચન્દ્રસ્ય સૌમ્યો યદિ રિષ્ફસંસ્થઃ
શુક્રાર્કજૌ વિત્તગતૌ મનુષ્યઃ ।
તદા ભવેત્ સાધુસમાગ્મોક્તઃ
પ્રભૂતમિત્રો ઘૃણયાધિકશ્ચ ॥ ૪૪॥

ધનસ્થિતઃ સોમસુતો હિમાંશો-
ર્વ્યયસ્થિતૌ શુક્રશનૈશ્ચરૌ તુ ।
ભવેન્મનુષ્યઃ સુસુતઃ સુવિજ્ઞઃ
પ્રિયાસમેતઃ પ્રિયસાધુવાદઃ ॥ ૪૫॥

જીવો વ્યયસ્થો યદિ શીતરશ્મિ-
ર્ધનસ્થિતૌ ભૂમિજચન્દ્રપુત્રૌ ।
સુરૂપદારોઽત્ર ભવેન્મનુષ્યો
દૃઢ્યવ્રતજ્ઞઃ સુરતાનુકૂલઃ ॥ ૪૬॥

ચન્દ્રસ્ય જીવો યદિ વિત્તસંસ્થો
વ્યયસ્થિતૌ ભૂમિશશાઙ્કજૌ ચ ।
ભવેત્તદા વિજ્ઞતમો મનુષ્યઃ
પ્રભૂતશાસ્ત્રાર્થસમૃદ્ધબુદ્ધિઃ ॥ ૪૭॥

ચન્દ્રસ્ય જીવ્ યદિ રિષ્ફસંસ્થો
ધનસ્થિતૌ શુક્રધરિત્રિપુતૌ ।
તદા ભવેન્નાતિવિધાનદક્ષો
લજ્જાધિકઃ સ્નેહપરો મનુષ્યઃ ॥ ૪૮॥

ધનસ્થિતો દેવગુરુર્હિમાંશો-
ર્વ્યયસ્થિતૌ શુક્રકુજૌ મનુષ્યઃ ।
ભવેત્ પ્રજાતઃ સતતં નયશ્ચઃ
પ્રભૂતકોશો મખકર્મરક્તઃ ॥ ૪૯॥

હિમદ્યુતેર્દેવગુરુર્વ્યયસ્થો
ધનસ્થિતૌ વક્રશનૈશ્ચરૌ તુ ।
ભવેન્નરઃ પ્રાણભૃતાં વરિષ્ઠો
હસ્ત્યશ્વભાગી સુદૃઢ્યાઙ્ગયષ્ટિઃ ॥ ૫૦॥

ચન્દ્રસ્ય જીવો ધનગો યદા સ્યાદ્
વ્યયાશ્રિતૌ સૂર્યજભૂમિપુત્રૌ ।
ભવેન્મનુષ્યઃ સુતરાં સુકર્મા
જિતારિવર્ગો ગુણગૌરવશ્ચ ॥ ૫૧॥

હિમદ્યુતેર્દેવગુરુર્વ્યયસ્થો

ધનારયસ્થૌ સિતસોમપુત્રૌ ।
શૂરશ્ચ યુક્તો મતિમાન્ પ્રસિધ્દ્ધો
ભવેન્મનુષ્યઃ ખલતાવિહીનઃ ॥ ૫૨॥

પ્રાલેયરશ્મેર્ધનગઃ ઉરેજ્યો
વ્યયસ્થિતૌ શુક્રશશાઙ્કપુત્રૌ ।
ભવેન્નરો રોષકલિપ્રયુક્તઃ
પ્રિયાધિકઃ પ્રાપ્તધનઃ સદૈવ ॥ ૫૩॥

ચન્દ્રસ્ય જીવો યદિ રિષ્ફસંસ્થો
ધનસ્થિતૌ સૌમ્યશનૈશ્ચરૌ તુ ।
ભવેન્મનુષ્યઃ શ્રુતચિન્તયુક્તઃ
સત્યાન્વિતઃ પાર્થિવવલ્લભશ્ચ ॥ ૫૪॥

ચન્દ્રસ્ય જીવો યદિ વિત્તસંસ્થો
વ્યયસ્થિતૌ સોમસસૂર્યપુત્રૌ ।
તદા વિવેકી પ્રભવેન્મનુષ્યઃ
કલ્પઃ કવિઃ પાપવિવર્જિતશ્ચ ॥ ૫૫॥

નોવોઽન્ત્યસંસ્થો યદિ શીતરશ્મે-
ર્ધનથિતૌ શુક્રશનૈશ્ચરૌ તુ ।
તદાતિશૂરોઽત્ર ભવેન્મનુષ્યો
નીરોગદેહઃ સ્મિતપૂર્વવક્ત્રઃ ॥ ૫૬॥

જીવો ધનસ્થો યદિ શીતરશ્મે-
ર્વ્યયસ્થિતૌ ભાર્ગવસૂર્યપુત્રૌ ।
નયપ્ર..........વિત્તસારો
ભવેન્નૃપઃ સત્યશુચિઃ પ્રગલ્ભઃ ॥ ૫૭॥

ચન્દ્રસ્ય શુક્રો યદિ રિષ્ફસંસ્થો
ધનાશ્રિતૌ સોમજભૂમિપુત્રૌ ।
તદા ભવેન્માતૃપ્રભક્તઃ
શાસ્ત્રાનુરક્તો રણકર્મદક્ષઃ ॥ ૫૮॥

ચન્દ્રસ્ય શુક્રો યદિ વિત્તસંસ્થો
વ્યયસ્થિતૌ ભૌમશશાઙ્કપુત્રૌ ।
તદા ભવેદ્દાનપરો મનુષ્યઃ

પ્રક્ષીણપાપો બહુપુત્રપૌત્રઃ ॥ ૫૯॥

ચન્દ્રસ્ય શુક્રો વ્યયગો યદા સ્યાદ્
ધનસ્થિતૌ ભૌમસુરેજ્યસંજ્ઞૌ ।
તદા મનસ્વી નિજદારરક્તો
મહાકવિઃ સત્યશુચિઃ સદૈવ ॥ ૬૦॥

શુક્રો ધનસ્થો યદિ શીતરશ્મે-
ર્વ્યયસ્થિતૌ ભૂમિજદેવપૂજ્યૌ ।
તદા પ્રભૂતદ્રવિણસ્ય નાથો
ભવેત્ સુરૂપઃ સુતરાં મનુષ્યઃ ॥ ૬૧॥

નક્ષત્રનાથસ્ય સિતો વ્યયસ્થો
ધનસ્થિતૌ ભૌમદિનેશપુત્રૌ ।
તદા મનુષ્યઃ ક્ષિતિવિત્તનાથો
ભવેત્ પ્રસૂતશ્ચ સુતૈઃ સમેતઃ ॥ ૬૨॥

નક્ષત્રનાથસ્ય સિતો ધનસ્થો
વ્યયસ્થિતૌ સૌરિધરિત્રિપુત્રૌ ।
ભવેન્નરઃ શિલ્પકલાસુ દક્ષઃ
ક્ષમાધિકઃ કૃયપરઃ પ્રસન્નઃ ॥ ૬૩॥

નક્ષત્રનાથસ્ય સિતો વ્યયસ્થો
ધનસ્થિતૌ સૌમ્યસુરેશપૂજ્યૌ ।
ભવેન્મનુષ્યઃ ક્ષતજાતિપક્ષો
દક્ષઃ ક્ષમી પ્રાણસમન્વિતશ્ચ ॥ ૬૪॥

નક્ષત્રનાથસ્ય ઇતો ધનસ્થો
વ્યયસ્થિતૌ સૌમ્યસુરેશપૂજ્યૌ ।
ભવેન્મનુષ્યઃ સતતં સુશીલઃ
સભાવશુદ્ધઃ પ્રિયધર્મકૃત્યઃ ॥ ૬૫॥

શુક્રો વ્યયસ્થો યદિ શીતરશ્મે-
ર્ધનસ્થિતૌ સૂર્યજસોમપુત્રૌ ।
ભવેન્મનુષ્યઃ પ્રિયસાહુકૃત્યો
માયાવિહીનઃ સ્ફુટવાક્યવક્તા ॥ ૬૬॥

શુક્રો ધનસ્થો યદિ શીતરશ્મે-
ર્વ્યયસ્થિતૌ મન્દશશાઙ્કપુત્રૌ ।
નરો ભવેદ્ભૂરિયશોનિધાનો
નાનાશ્વસંઘાધિપતિઃ પ્રગલ્ભઃ ॥ ૬૭ ॥

શુક્રઃ શશાઙ્કસ્ય યદા વ્યયસ્થો
ધનસ્થિતૌ સૌરસુરેન્દ્રપૂજ્યૌ ।
નરો ભવેત્ પ્રીતિપરઃ પ્રસન્નઃ
સતામભીષ્ટઃ સુરતાનુરક્તઃ ॥ ૬૮ ॥

શુક્રઃ શશાઙ્કસ્य् યદા ધનસ્થો
વ્યયાશ્રિતૌ જીવદિનેશપુત્રૌ ।
તદા મનુષ્યઃ પરપક્ષહન્તા
ભવેનિરીહો હતકમષશ્ચ ॥ ૬૯ ॥

મન્દઃ શશાઙ્કસ્ય યદા વ્યયસ્થો
ધનાશ્રિતૌ ભૂમિજસોમપુત્રૌ ।
[તદા મનુષ્યઃ પરપક્ષહન્તા]
સતુષ્ટચિન્તઃ પ્રબલો વિશઙ્કઃ ॥ ૭૦ ॥

મન્દઃ શશાઙ્કસ્ય યદા ધનસ્થો
વ્યયસ્થિતૌ ભૂમિજસોમપુત્રૌ ।
તદા મનુષ્યઃ પ્રભુતાસમેતો
મખાંશભુક્ શાસ્ત્રકલાસુ દક્ષઃ ॥ ૭૧ ॥

શનિર્વ્યયસ્થો યદિ શીતરશ્મેઃ
સુરેજ્યભૌમૌ ધનગૌ ભવેતામ્ ।
તત્રાભિજાતઃ પ્રથિતઃ સ્વવર્ગે
સતામભીષ્ટઃ સુતસૌખ્યભાજઃ ॥ ૭૨ ॥

શનિર્નસ્થો યદિ શીતર્શ્મે-
ર્વ્યયસ્થિતૌ ભૌમૌરેન્દ્રપૂજ્યો ।
ભવેન્નરઃ શાસ્ત્રપરઃ પ્રસિદ્ધિઃ
સદા સુશીલઃ કૃપયા સમેતઃ ॥ ૭૩ ॥

શનૈશ્ચરો રાત્રિપતેવ્યયથો
ધનસ્થિતૌ ભાર્ગવમઙ્ગલાસ્યૌ ।

ભવેન્મનુષ્યઃ સતતં મનસ્વી
પ્રસન્નમુર્તિનજનાનુરક્તઃ ॥ ૭૪॥

શનૈશ્ચરો રાત્રિપતેર્ધનસ્થો
વ્યયસ્થિતૌ ભાર્ગવભૂમિપુત્રૌ ।
ભવેન્નરશ્ચારૂવિશાલનેત્રો
ગમ્ભીરવાક્યો મલિમાનૃ.......... ॥ ૭૫॥

નિશોપતેઃ સૂર્યસુતો વ્યયસ્થો
ધનસ્થિતૌ સૌમ્યસુરેન્દ્રપૂજ્યૌ ।
ભવેન્મનુષ્યઃ કૃષિલબ્ધવિત્તો
વાનિજ્યદક્ષઃ કાલદોષમુક્તઃ ॥ ૭૬॥

ચન્દ્રસ્ય સૌરો યદિ વિત્તસંસ્થો
વ્યયાશ્રિતૌજીવશશાઙ્કપુત્રૌ ।
તદા નરો ભોગવિવૃદ્ધગાત્રઃ
સદા સુભક્તો વિજદેવતાનામ્ ॥ ૭૭॥

ચન્દ્રસ્ય સૌરો યદિ રિષ્ફસંસ્થો
ધનસ્થિતૌ શુક્રબુધૌ તદા સ્યાત્ ।
નરોઽતિમાન્યઃ પ્રભુતાસમેતઃ
સુધર્મશીલઃ સતતં વિનીતઃ ॥ ૭૮॥

ચન્દ્રસ્ય સૌરો યદિ વિત્તસંસ્થો
વ્યયસ્થિતૌ ભાર્ગવસોમપુત્રૌ ।
ભવેત્ સુશીલઃ પશુમુખ્યવૃત્તિઃ
પ્રસન્નમૂર્તિર્મનુજઃ સુસત્યઃ ॥ ૭૯॥

શનૈશ્ચરો રિષ્ફગતો હિમાંશો-
ર્ધનાશ્રિતૌ જીવસિતૌ યદા ચ ।
નરો ભવેત્ પ્રીતિપરઃ પ્રજાનાં
સદૈવ ભક્તો દ્વિજપુઙ્ગવાનામ્ ॥ ૮૦॥

શનશિચરો વિત્તગતો હિમાંશો-
ર્વ્યયસ્થિતૌ જીવસિતૌ યદા ચ ।
તદા પ્રસૂતઃ પ્રબલઃ પ્રસિદ્ધો
નરો ભવેન્નીતિપરઃ સુલજ્જઃ ॥ ૮૧॥

ઇતિ દ્વિવિકલ્પઃ ॥

ચન્દ્રસ્ય ભૌમો યદિ વિત્તસંસ્થો
વ્યયસ્થિતાઃ સૌમ્યસુરેજ્યશુક્રાઃ ।
તદા ભવેદ્ભૂમિપતિર્મનુષ્યો
હતારિપક્ષો હતકલ્મષશ્ચ ॥ ૮૨॥

ભૌમો વ્યયસ્થો યદિ શીતરશ્મે-
ર્ધનસ્થિતાઃ સૌમ્યસુરેજ્યશુક્રાઃ ।
ભવેદસત્યૢઃ પુરુષોઽત્ર જાતઃ
કુલપ્રધાનઃ સુવિશારદશ્ચ ॥ ૮૩॥

ચન્દ્રસ્ય ભૌમો યદિ રિષ્ફસંસ્થો
ધનાશ્રિતાઃ સૌરસુરેજ્યસૌમ્યાઃ ।
તદા ભવેચ્છૌચપરો મનુષ્યઃ
પ્રભૂતવિત્તઃ પ્રભુતાસમેતઃ ॥ ૮૪॥

ચન્દ્રસ્ય ભૌમો યદિ વિત્તસંસ્થો
વ્યયસ્થિતો જીવબુધાર્કપુત્રાઃ ।
તદા સુરૂપઃ સુભગો મનુષ્યો
ભવેત્ સુદાન્તઃ સુતરાં વિવેકી ॥ ૮૫॥

વ્યયસ્થિતો ભૂતનયો હિમાંશો-
ર્ધનસ્થિતાઃ શુક્રબુધાર્કપુત્રાઃ ।
વિદગ્ધચેષ્ટઃ પ્રભવેન્મનુષ્યઃ
શ્રુતિપ્રિયઃ પ્રાજ્ઞતમઃ પ્રધાનઃ ॥ ૮૬॥

ધનસ્થિતો ભૂતનયો હિમાંશો-
બુધાર્કપુત્રાસ્ફુજિદો વ્યયસ્થાઃ ।
ભવેન્નરઃ પ્રાપ્તિધનાતિભવ્યો
વિયાધિકઃ કીર્તિસમન્વિતશ્ચ ॥ ૮૭॥

ચન્દ્રસ્ય ભૌમો યદિ રિષ્ફસંસ્થો
ધનસ્થિતાઃ શુક્રસુરેજ્યસૌરાઃ ।
ભવેદ્વિનીતઃ પ્રથિતોઽભિમાની
નરો વિધિજ્ઞઃ પ્રણતઃ પ્રસિદ્ધઃ ॥ ૮૮॥

ચન્દ્રસ્ય ભૌમો યદિ વિત્તસંસ્થો
વ્યયસ્થિતો જીવસિતાર્કપુત્રાઃ ।
ભવેત્ સતામિષ્ટતમોઽભિરામઃ
શાસ્ત્રાનુરક્તઃ કૃપયાધિકશ્ચ ॥ ૮૯॥

ચન્દ્રસ્ય સૌમ્યો યદિ રિષ્ફસંસ્થો
ધનસ્થિતા ભૌમસિતામરેજ્યાઃ ।
સુસત્યચેષ્ટઃ પ્રભવેન્મનુષ્યો
નીરોગગાત્રસ્ત્રપયાધિકશ્ચ ॥ ૯૦॥

બુધો હિમાંશોર્યદિ વિત્તસંસ્થો
વ્યયસ્થિતાઃ શુક્રકુજામરેજ્યાઃ ।
ભવેત્ સુભક્તો નિજબન્ધુવર્ગે
સતામભીષ્ટઃ પ્રચુરાન્નપાનઃ ॥ ૯૧॥

સૌમ્યો વ્યયસ્થો યદિ શીતરશ્મે-
ર્ધનસ્થિતા વક્રસુરેજ્યસૌરાઃ
વિખ્યાતકર્મા સુભગો મનુષ્યો
ભવેત્ પ્રતાપી ગુણસાગરશ્ચ ॥ ૯૨॥

સૌમ્યો ધનસ્થો ય્દિ શીતરશ્મે-
ર્વ્યયસ્થિતા મન્દૌરેજ્યવક્રાઃ ।
મહાધનો બુદ્ધિયુતો મનુષ્યો
ભવેત્ પ્રધાનો નિયમૈઃ સમેતઃ ॥ ૯૩॥

વ્યયસ્થિતઃ સોમસુતો હિમાંશો-
ર્ધનસ્થિતાઃ શુક્ર્કુજાર્કપુત્રાઃ ।
ભવેન્મનુષ્યો નિતરાં વિદગ્ધઃ
પ્રિયાતિથિઃ શાસ્ત્રપરઃ કૃતજ્ઞઃ ॥ ૯૪॥

ધનસ્થિતઃ સોમસુતો હિમાંશો-
ર્વ્યયશ્રિતાઃ સૌરસિતાવનેયાઃ ।
ભવેદભીષ્ટઃ પ્રણતઃ પ્રિસિદ્ધો
હતારિપક્ષઃ સતતં સુધર્મઃ ॥ ૯૫॥

ચન્દ્રસ્ય સૌમ્યો વ્યયગો યદા સ્યાદ્

ધનસ્થિતા જીવસિતાર્કપુત્રાઃ ।
ભવેદ્વિનીતઃ સુતદારયુક્તઃ
પ્રસન્નમૂર્તિઃ પ્રથિતાભિમાનઃ ॥ ૯૬॥

ચન્દ્રય સૌમ્યો ધનગો યદા સ્યાદ્
વ્યયસ્થિતાઃ સૌરિસિતામરેજ્યાઃ ।
ભવેન્મનુષ્યો અદ્ભુતાવિત્તરૂપ
ઉદારચેષ્ટઃ સતતં વિધિજ્ઞઃ ॥ ૯૭॥

વ્યયસ્થિતો દેવગુરુર્હિમાંશો-
ર્ધનસ્થિતાઃ સૌમ્યસિતાવનેયાઃ ।
નરો ભવેદત્ર સલજ્જકર્મા
વિશેષશાસ્ત્રાર્થયુતઃ સદૈવ ॥ ૯૮॥

ધનસ્થિતો દેવગુરુર્હિમાંશો-
ર્વ્યયસ્થિતા ભાર્ગવવક્રસૌમ્યાઃ ।
ભવેન્નરઃ શત્રુવધાનુરક્તઃ
ક્રિયાપરઃ પુણ્યસમન્વિતશ્ચ ॥ ૯૯॥

જીવો વ્યયસ્થિતો યદિ શીતરશ્મે-
ર્ધનસ્થિતા મન્દબુધાવનેયાઃ ।
ભવેન્મનુષ્યો બહુગોવૃષાઢ્યો
હસ્ત્યશ્વભાગી મતિમાનુદારઃ ॥ ૧૦૦॥

જીવો ધનસ્થો યદિ શીતરશ્મે-
ર્વ્યયસ્થિતાઃ સૌમ્યકુજાર્કપુત્રાઃ ।
તદા મનુષ્યો યશસા સમૃદ્ધો
વક્ષન્નભાગ્રોગવિવર્જિતશ્ચ ॥ ૧૦૧॥

.......... ॥ ૧૦૨॥

ચન્દ્રય જીવો યદિ વિત્તસંસ્થો
વ્યયસ્થિતા ભાર્ગવસૌરભૌમાઃ ।
તદા મનુષ્યઃ પ્રણયાનુરક્તક્તો
વિવેકયુક્તઃ પ્રમદાપ્રિયશ્ચ ॥ ૧૦૩॥

ચન્દ્રસ્ય જીવો યદિ રિષ્ફસંસ્થો

ધનસ્થિતાઃ સૌમ્યસિતાર્કપુત્રાઃ ।
તદા મનુષ્યઃ પરમાપ્તભાવો
ભવેત્ સુધામા વિજિતારિસંઘઃ ॥ ૧૦૪॥

જીવઃ શશાङ्कસ્ય યદા ધનસ્થો
..........સૌમ્યસિતાર્કપુત્રાઃ ।
તદા મનુષ્યઃ સુભગગ઼ૃ સુશીલઃ
કૃતી વિદગ્ધઃ સતતં પ્રગલ્ભઃ ॥ ૧૦૫॥

શુક્રો યદા રાત્રિપતેર્વ્યયસ્થો
ધનસ્થિતા ભૌમબુધામરેજ્યાઃ ।
તદા મનુષ્યઃ સુચિરપ્રસન્નઃ
પ્રભૂરસત્ત્વઃ સુજનાનુરક્તઃ ॥ ૧૦૬॥

શુક્રો યદા રાત્રિપતેર્ધનસ્થો
વ્યયસ્થિતા ભૌમબુધામરેજ્યાઃ ।
તદા મનુષ્યો નૃપતેરભીષ્ટઃ
સદા સુભોગી રણકર્મ .......... ॥ ૧૦૭॥

શુક્રો યદા રાત્રિપતેર્વ્યયસ્થો
ધનાશ્રિતા ભૌમબુધાર્કપુત્રાઃ ।
તદા મનુષ્યઃ સુતવિક્રમાઢ્યઃ
પ્રભૂતભૃત્યઃ પરમપ્રભાવઃ ॥ ૧૦૮॥

શુક્રો યદા રશ્મિર્ધનસ્થો
વ્યયસ્થિતા મન્દબુધાવનેયાઃ ।
ભવેન્મનુષ્યઃ પ્ર..........ઇતાભિમાનઃ
સન્તુષ્ટચિન્તઃ પ્રચુરપ્રભાવઃ ॥ ૧૦૯॥

શુક્રો યદા રાત્રિપતેર્વ્યયસ્થો
ધનસ્થિતા જીવકુજાર્કપુત્રાઃ ।
ભવેન્નરો ધર્મપચાનુગમી
પ્રિયાશ્રમો બાન્ધવસંમતશ્ચ ॥ ૧૧૦॥

શુક્રો યદા રાત્રિપતેર્ધનસ્થો
વ્યયસ્થિતાઃ સૌરિકુજામતેજ્યાઃ ।
ભવેન્નરઃ સર્વકલાસુ દક્ષો

નરઃ પ્રતાપી પરદર્પડા ચ ॥ ૧૧૧॥

શુક્રો યદા રાત્રિપતેર્વ્યયસ્થો
ધનસ્થિતા જીવબુધાર્કપુત્રાઃ ।
ભવેત્ પ્રજાતો મતિસૌખ્યદાયી
નરઃ પ્રધાનઃ પરહીનપક્ષઃ ॥ ૧૧૨॥

શુક્રો યદા રાત્રિપતેર્ધનસ્થો
વ્યયસ્થિતા મન્દબુધામરેજ્યાઃ ।
ભવેજ્જયી વિવજ્ઞવિધાનદક્ષો
નરો નિતાન્તં પ્રભુતાસમેતમ્ ॥ ૧૧૩॥

મન્દો વ્યયસ્થો યદિ શીતરશ્મે-
ર્ધનસ્થિતા ભૌમબુધામરેજ્યઃ ।
ભવેવિનીતઃ પ્રથિતો ..........
પ્રભૂતપુત્રસ્ત્રપયા સમેતઃ ॥ ૧૧૪॥

મન્દો ધનસ્થો યદિ શીતરશ્મે-
ર્વ્યયસ્થિતા ભૌમબુધામરેજ્યાઃ ।
તદાર્થભાગી સુભગો ..........
ભવેત્ સુદાન્તો દ્વિજવલ્લભશ્ચ ॥ ૧૧૫॥

ચન્દ્રસ્ય સૌરો યદિ રિષ્ફસંસ્થો
ધનસ્થિતાઃ શુક્રબુધાવમેયાઃ ।
પ્રભૂતતામન્ત્રસુતાર્થભાગી
તદા નરઃ સ્યાદ્બહુશાસ્ત્રસવી ॥ ૧૧૬॥

ચન્દ્રસ્ય સૌરો યદિ વિત્તસંસ્થો
વ્યયાશ્રિતા ભાર્ગવસૌમ્યભૌમાઃ ।
ભવેત્તદા દમ્ભરુષાવિહીનઃ
સત્વાધ્કઃ કાવ્યકરો મનુષ્યઃ ॥ ૧૧૭॥

ચન્દ્રસ્ય સૌરો વ્યયગો યદા સાદ્
ધનાશ્રિતાઃ શુક્રકુજામરેજ્યાઃ ।
તદા વિપક્ષક્ષયુકૃન્મનુષ્યો
ભ્વેત્ સુમેધા નૃપતેરભીષ્ટઃ ॥ ૧૧૮॥

સૌરો ધનસ્થો યદિ શીતરશ્મે-
ર્વ્યયશ્રિતા ભૌમસિતામરેજ્યાઃ ।
નાનાર્થભાગી પ્રિયવાઙ્મનુષ્યો
ભવેત્ સદા દાન્દયાસમેતઃ ॥ ૧૧૯ ॥

સૂર્યાત્મજો રિષ્ફગતો હિમાંશો-
ર્ધનસ્થિતાઃ સૌમ્યસિતામરેજ્યાઃ ।
ભવેત્ પ્રતાપઃ જનતાસુતાઢ્યો
નરઃ ..........ઉ........ ર્હઃ પ્રિયદઃ પ્રજાનામ્ ॥ ૧૨૦ ॥

સૂર્યાત્મજો વિત્તગતો હિમાંશો-
ર્વ્યયસ્થિતાઃ શુક્રાબુધામરેજ્યાઃ ।
નરો ભવેન્મનુષ્યતમઃ કુલસ્ય
સ્વદારરક્તઃ પરવર્જિતશ્ચ ॥ ૧૨૧ ॥

એવં ત્રિવિકલ્પઃ ॥

વ્યયસ્થિતો ભૂમિસુતો હિમાંશો-
ર્ધનસ્થિતાઃ સૌરસિતજ્ઞજીવાઃ ।
ભવેન્નરઃ પાર્થિવવંશજાત્યો
જાતોऽત્ર યોગે સચિવઃ સમૃ.......... ॥ ૧૨૨ ॥

ધનસ્થીતો ભૂમિસુતો હિમાંશો-
ર્વ્યયસ્થિતાઃ સૌરૈતજ્ઞજીવાઃ ।
ભવેદ્ધનાનામધિપઃ સુરૂપઃ
પ્રભૂતમિત્રઃ સતતં સુશીલઃ ॥ ૧૨૩ ॥

ચન્દ્રસ્ય સૌમ્યો યદિ રિષ્ફસંસ્થો
ધનસ્થિતાઃ સૌરસિતારજીવાઃ ।
ભવેન્મનુષ્યઃ ક્ષતશત્રુપક્ષો
વિદગ્ધનારિરતલબ્ધસૌખ્યઃ ॥ ૧૨૪ ॥

ચન્દ્રસ્ય સૌમ્યો યદિ વિત્તસંસ્થો
વ્યયસ્થિતાઃ સૌરસિતાર્જીવાઃ ।
ભવેત્ સદા પ્રિતિપરો મનુષ્યઃ
પ્રભૂતકોશઃ સુભગો મનોજ્ઞઃ ॥ ૧૨૫ ॥

વ્યયસ્થિતો દેવગુરુર્હિમાંશો-
ર્ધનસ્થિતા ભૌમસિતજ્ઞસૌરાઃ ।
તદાર્થસસ્યાશ્વગજપ્રધાનો
ભવેન્મનુષ્યો વિવિધપ્રમોદઃ ॥ ૧૨૬॥

ધનસ્થિતો દેવગુરુર્હિમાંશો-
ર્વ્યયસ્થિતા વક્રસિતજ્ઞસૌરાઃ ।
નરો ભવેત્ પ્રાજ્ઞતરઃ સલજ્જઃ
સતામભીષ્ટઃ સુધનઃ સુદારઃ ॥ ૧૨૭॥

શુક્રઃ શશાઙ્કસ્ય યદા વ્યયસ્થો
ધનસ્થિતા ભૌમગુરુજ્ઞસૌરાઃ ।
સુપુણ્યશીલોઽત્ર ભવેન્મનુષ્યઃ
પ્રિયાત્મજો। દીક્ષિતલોકભક્તઃ ॥ ૧૨૮॥

શુક્રઃ શશાઙ્કસ્ય યદા ધનસ્થો
વ્યયસ્થિતા ભૌમગુરુજ્ઞસૌરાઃ ।
પ્રભૂતવિત્તોઽત્ર ભવેન્મનુષ્યઃ
પ્રધાનમિત્રઃ કૃષિકર્મસક્તઃ ॥ ૧૨૯॥

સૌરઃ શશાઙ્કસ્ય યદા વ્યયસ્થો
ધનસ્થિતા ભૌમસિતજ્ઞજીવાઃ ।
તદા વિવેકાગમશાસ્ત્રરક્તઃ
ક્રિયાસુ દક્ષઃ સતતં વિધિજ્ઞઃ ॥ ૧૩૦॥

સૌરઃ શશાઙ્કસ્ય યદા ભનસ્થો
વ્યયસ્થિતા ભૌમસિતજ્ઞજીવાઃ ।
તદા સુતારામતહાગકર્મ-
ક્રિયાસમેતઃ પ્રિયસાહસશ્ચ ॥ ૧૩૧॥

એવં ચતુર્વિકલ્પઃ ॥

સૌમ્યાવનેયૌ યદિ રિષ્ફસંસ્થૌ
ધનસ્થિતૌ ભાર્ગવદેવપૂજ્યૌ ।
સુરેજ્યપૂજાનિરતો મનુષ્યઃ
કુલપ્રધાનઃ પ્રણતઃ સુધામઃ ॥ ૧૩૨॥

.......... ॥ ૧૩૩॥

યધાવ..........યૌ યદિ રિષ્ફસંસ્થૌ
હનરિપતૌ જીવદિનેશપુત્રૌ ।
તદા મનુષ્યઃ સુતદારતુષ્ટો
ભવેન્મહાત્મા ગુરુદેવભક્તઃ ॥ ૧૩૪॥

બુધાવનેયૌ યદિ વિત્તસંથૌ
વ્યયસ્થિતૌ જીવદિનેશપુત્રૌ ।
ભવેદરોગઃ શુભકા..........
પ્રિયંવદો નીતિપરો મનુષ્યઃ ॥ ૧૩૫॥

બુધાવનેયૌ યદિ રિષ્ફસંસ્થૌ
શુક્રાર્કપુત્રૌ ધનગૌ હિમાંશોઃ ।
જનાનુરાગર્જિતભૂમિવિત્તઃ
ઉસંમિતઃ સત્યરુચિર્મનુષ્યઃ ॥ ૧૩૬॥

બુધાવનેયૌ યદિ વિત્તસંસ્થૌ
શુક્રાર્કપુત્રૌ વ્યયગૌ હિમાંશોઃ ।
સુરૂપગાત્રઃ પ્રભવેન્મનુષ્યઃ
સૌભાગ્યવિદ્યાસહિતઃ સદૈવ ॥ ૧૩૭॥

ભૌમામરેજ્યૌ યદિ રિષ્ફસંસ્થૌ
સિતેન્દુપુત્રૌ ધનગૌ હિમાંશો ।
ભવેન્મનુષ્યઃ સતતં પ્રગલ્ભઃ
પ્રભૂત વિત્તાન્નચતુષ્પદાઢ્યઃ ॥ ૧૩૮॥

ભૌમામરેજ્યૌ યદિ વિત્તસંસ્થૌ
સિતેન્દુપુત્રૌ વ્યયગૌ હિમાંશોઃ ।
ભવેન્મનુષ્યઃ પ્રથિતાભિમાનો
નયપ્રધાનઃ સતતં સુધીરઃ ॥ ૧૩૯॥

સુરેજ્યભૌમૌ યદિ રિષ્ફસંસ્થૌ
સૌરેન્દુજૌ વિત્તગતૌ સુધાંશોઃ ।
ભવેન્મનુષ્યો બહુભોગભાગી
નરેન્દ્રપૂજ્યઃ કૃતનિશ્ચયશ્ચ ॥ ૧૪૦॥

સુરેજ્યભૌમૌ યદિ વિત્તસંસ્થૌ
સરેન્દુજૌ રિષ્ફગતૌ સુધાંશોઃ ।
જ્ઞાનશીલઃ ક્રમમાર્ગામી
જિતેન્દ્રિયઃ સ્યાર્ સુભગો મનુષ્યઃ ॥ ૧૪૧ ॥

જીવાવનેયૌ યદિ રિષ્ફસંસ્થૌ
ધનાશ્રિતૌ સૂર્યજદૈત્યપૂજ્યૌ ।
ભવેન્મનુષ્યઃ પિશુનાધિનાથઃ
પ્રભૂતકોશઃ પ્રચુરપ્રતાપઃ ॥ ૧૪૨ ॥

જીવાવનેયુ યદિ વિત્તસંસ્થૌ
રિષ્ફાશ્રિતૌ સૂર્યજદૈત્યપૂજ્યૌ ।
ભવેન્મનુષ્યઃ સુતરાં પ્રસૂતો
નયાનુકૂલઃ સુમનોજ્ઞરૂપઃ ॥ ૧૪૩ ॥

ચન્દ્રસ્ય શુક્રાવનિજૌ વ્યયસ્થૌ
ધનાશ્રિતૌ જીવશશાઙ્કપુત્રૌ ।
યદા તદા સત્યપરો મનુષ્યઃ
શુચિર્ભવેત્ પુણ્યપરઃ સદૈવ ॥ ૧૪૪ ॥

ચન્દ્રસ્ય શુક્રાવનિજૌ વિત્તસંસ્થૌ
વ્યયસ્થિતૌ જીવશશાઙ્કપુત્રૌ ।
યદા તદા મુખ્યતમઃ સુરૂપો
ગુણાનુરક્તઃ પ્રથિતઃ સુસત્યઃ ॥ ૧૪૫ ॥

ચન્દ્રસ્ય શુક્રાવનિજૌ વ્યયસ્થૌ
ધનાશ્રિતૌ સૌમ્યદિનેશપુત્રૌ ।
નરોઽત્ર જાતઃ કૃતભૂરિદાનઃ
કુલપ્રધાનઃ પ્રચુરાન્નપાનઃ ॥ ૧૪૬ ॥

ચન્દ્રસ્ય શુક્રાવનિજૌ ધનસ્થુ
વ્યયસ્થિતૌ સૌમ્યદિનેશપુત્રો ।
નરોઽત્ર જાતઃ પ્રભુતાસમેતો
ભવેત્ સુરૂપઃ પ્રમદાપ્રિયશ્ચ ॥ ૧૪૭ ॥

શુક્રાવનેજૌ વ્યયગૌ હિમાંશો-
ર્ધનાશ્રિતૌ સૌરસુરેન્દ્રપૂજ્યૌ ।

નરોઽત્ર જાતઃ કમલાયતાક્ષઃ
કુલપ્રધાનઃ પ્રિયસૌહૃદશ્ચ ॥ ૧૪૮॥

શુક્રાવનેયૌ ધનગૌ હિમાંશો-
ર્વ્યયાશ્રિતૌ સૌરસુરેન્દ્રપૂજ્યૌ ।
ભવેન્મનુષ્યઃ સુતસૌખ્યયુક્તઃ
.......... ॥ ૧૪૯॥

ભૌમાર્કપુત્રૌ વ્યયગૌ હિમાંશો-
ર્ધનસ્થિતૌ જીવશશાઙ્કપુત્રૌ ।
નરોઽત્ર જાતો વિનયપ્રસન્નઃ
કુલાધિકઃ કાવ્યરતો દયાલુઃ ॥ ૧૫૦॥

ભૌમાર્કપુત્રૌ ધનગૌ હિમાંશો-
ર્વ્યયાશ્રિતૌ જીવશશાઙ્કપુત્રૌ ।
ભવેન્મનુષ્યઃ શુભબુદ્ધિવિત્તઃ
સતામભીષ્ટઃ સદયઃ સુશીલઃ ॥ ૧૫૧॥

ચન્દ્રસ્ય ભૌમાર્કસુતુ વ્યયસ્થૌ
ધનાશ્રિતૌ ભાર્ગવસોમપુત્રૌ ।
ભવેન્નરઃ સાધુતમઃ સુરમ્યઃ
પ્રભૂતકીર્તિર્જયમાનભાજઃ ॥ ૧૫૨॥

ચન્દ્રસ્ય ભૌમાર્કીઅતુ ધનસ્થૌ
વ્યયાશ્રિતૌ ભાર્ગવસોમપુત્રૌ ।
પ્રભવેદ્વિનીતોઽત્ર નરઃ કૃપાલુ-
શ્ચતુષ્પદાછાદનભોજનાઢ્યઃ ॥ ૧૫૩॥

ચન્દ્રસ્ય સૌરક્ષિતિજૌ વ્યયસ્થૌ
ધનાશ્રિતૌ ભાર્ગવદેવપૂજ્યૌ ।
નરો વિનીતો હતશત્રુવિત્તઃ
સદાન્નદો ધર્મસમન્વિતશ્ચ ॥ ૧૫૪॥

ચન્દ્રસ્ય સૌરક્ષિતિજૌ ધનસ્થૌ
વ્યયાશ્રિતૌ ભાર્ગવદેવપૂજ્યૌ ।
ભવેદ્વિનીતોઽત્ર પુમાન્ વિદગ્ધઃ
પ્રભૂતસૌખ્યઃ પ્રવિભક્તગાત્રઃ ॥ ૧૫૫॥

જીવેન્દુપુત્રૌ વ્યયગૌ હિમાંશો-
ર્ધનસ્થિતૌ શુક્રદિનેશપુત્રૌ ।
ભવેત્ પુમાન્ નીતિપરઃ સુકામી
પુતાધિકારઃ પરપક્ષમારઃ ॥ ૧૫૬ ॥

જીવેન્દુપુત્રૌ ધનગૌ હિમાંશો-
ર્વ્યયસ્થિતો શુક્રદિનેશપુત્રૌ ।
જનાનુરક્તઃ સુરદેવભક્તો
ભવેન્નરઃ શાસ્ત્રવિશાર્દશ્ચ ॥ ૧૫૭ ॥

શુક્રેન્દુપુત્રૌ વ્યયગૌ હિમાંશો-
ર્ધનાશ્રિતૌ મન્દસુરેન્દુપૂજ્યૌ ।
જાતોઽત્ર ભોગી સુનયપ્રધાનો
ભવેન્મનુષ્યઃ ..........મપ્રભાવઃ ॥ ૧૫૮ ॥

શુક્રેન્દુપુત્રા ધનગૌ હિમાંશો-
ર્વ્યયસ્થિતૌ સૌરસુરેન્દુજ્યૌ ।
ભવેદ્વિધિજ્ઞઃ સતતં નયજ્ઞઃ
પ્રજાનુરક્તઃ પુરુષઃ પ્રગલ્ભઃ ॥ ૧૫૯ ॥

.......... ॥ ૧૬૦ ॥

.......... ॥ ૧૬૧ ॥

એવં વિવેકલ્પઃ
સૌમ્યાવનેયૌ વ્યયગૌ સુધાંશો-
ર્ધનસ્થિતા શુક્રસુરેજ્યસૌરાઃ ।
ભવેન્નરઃ શિલ્પકલાસુ દક્ષો
ભૂપાલલાભૈઃ સતતં સુપૂજ્યઃ ॥ ૧૬૨ ॥

વ્યયસ્થિતાઃ શુક્રૌરેજ્યસૌરા
ધનાશ્રિતૌ ભૌમબુધૌ હિમાંશોઃ ।
ભવેત્ પ્રભૂતાશ્વગજાધિનથો
નરો વિવેકી જિતશત્રુપક્ષઃ ॥ ૧૬૩ ॥

જીવાવનેયૌ વ્યયગૌ હિમાંશઓ-

ર્ધનસ્થિતાઃ શુક્રબુધાર્કપુત્રાઃ ।
ભવેન્મનુષ્યો દ્વિજદેવભક્તઃ
પ્રસન્નચેતાઃ પ્રણતો નયજ્ઞઃ ॥ ૧૬૪॥

શુક્રજ્ઞસૌરા વ્યયગા હિમાંશો-
ર્ધનસ્થિતૌ ભૌમસુરેન્દ્રપૂજ્યૌ ।
.......... ॥ ૧૬૫॥

વ્યયસ્થિતૌ ઉક્રધરિત્રિપુત્રૌ
ધનસ્થિતા મન્દબુધામરેજ્યૈઃ ।
નરોઽત્ર જાતઃ પ્રભવેત્ સુવિજ્ઞઃ
સતામભીષ્ટઃ પ્રિયદર્શનશ્ચ ॥ ૧૬૬॥

વ્યયસ્થિતા ..........
.......... રિત્રિપુત્રૌ ।
ત્રજ્ઞાધિકઃ પુણ્યજનઃ સદૈવ
ભવેન્મનુષ્યઃ શુભકર્મરક્તઃ ॥ ૧૬૭॥

વક્રાર્કપુત્રૌ વ્યયગૌ હિમાંશો-
ર્ધનસ્થિતા શુક્રબુધામરેજ્યાઃ ।
ભવેન્મનુષ્યો નૃપમાનપુષ્ટઃ
શૌર્યાન્વિતઃ શ્વસવિવર્જિતાઙ્ગઃ ॥ ૧૬૮॥

વક્રાર્કપુત્રૌ ધનગૌ હિમાંશો
ર્વ્યયસ્થિતાઃ શુક્રબુધામરેજ્યાઃ ।
ભવેન્મનુષ્યઃ કૃષિકર્મભોગી
ગુણાધિકઃ કલ્પતરુસ્વરૂપઃ ॥ ૧૬૯॥

ત્રીવેન્દુપુત્રૌ વ્યયગૌ હિમાંશો-
ર્ધનસ્થિતા મન્દસિતાવનેયાઃ ।
ભવેન્મનુષ્યઃ પ્રચુરાન્નપાનઃ
સ્મિતાભિભાષી દૃઢસૌહૃદશ્ચ ॥ ૧૭૦॥

વ્યયસ્થિતા મન્દ્સિતાવનેયા
ધનસ્થિતૌ જીવશશાઙ્કપુત્રૌ ।
નરોઽત્ર જાતઃ સુતરાં વિવેકી
મહાનુરાગી ગુણસંયુતશ્ચ ॥ ૧૭૧॥

સિતેન્દુપુત્રૌ વ્યયગૌ હિમાંશો-
ર્ધનસ્થિતા મન્દકુજામરેજ્યાઃ ।
ભવેધનાપ્તિયુતઃ સદૈવ
નરોઽત્ર જાતો વનિતાનુરાગઃ ॥ ૧૭૨॥

વ્યયસ્થિતા મન્દકુજામરેજ્યા
ધનસ્થિતૌ શુક્રશશાઙ્કપુત્રૌ ।
ભવેન્નરઃ સ્ત્રીદયિતઃ શુભજ્ઞઃ
કૃતજ્ઞતાવિષ્કૃતમાનસશ્ચ ॥ ૧૭૩॥

સૌમ્યાર્કપુત્રૌ વ્યયગૌ હિમાંશો-
ર્ધનસ્થિતા ભૌમસિતામરેજ્યાઃ ।
શુચિઃ પ્રગલ્ભોઽત્ર ભવેન્મનુષ્યઃ
શુભાકૃતિસ્તીર્થરતઃ સુસૌમ્યઃ ॥ ૧૭૪॥

વ્યયસ્થિતા ભૌમસિતામરેજ્યા
હનસ્થિતૌ મન્દશશાઙ્કપુત્રૌ ।
નરો ભવેત્ સદ્વિભવૈઃ સમૃદઃ
પ્રિયાતિર્થિબ્રાહ્મણસંમતશ્ચ ॥ ૧૭૫॥

શુક્રામરેજ્યૌ વ્યયગૌ હિમાંશો-
ર્ધનસ્થિતા મન્દબુધાવનેયાઃ ।
ભવેન્મનુષ્યઃ પ્રથિતાભિમાનઃ
સતામભીષ્ટઃ કૃતકોપચારઃ ॥ ૧૭૬॥

વ્યયસ્થિતા મ્ન્દબુધાવનેયા
ધનાશ્રિતૌ જીવૈતૌ હિમાંશોઃ ।
ભવેન્નરઃ કીર્તિસુખૈઃ સ..........
પ્રભૂતમિત્રો દ્રવિણસ્વભાવઃ ॥ ૧૭૭॥

સૌરામરેજ્યૌ વ્યયગૌ હિમાંશો-
ર્ધનસ્થિતા ભાર્ગવ્ભૌમસૌમ્યઃ ।
નરોઽત્ર જાતઃ સુતરાં કૃતજ્ઞો
ભવેદ્બહુદ્રવ્યસમૃદ્ધિભાગી ॥ ૧૭૮॥

સૌરામરેજ્યૌ ધનગૌ હિમાંશો-

ર્વ્યયસ્થિતા ભાર્ગવભૌમસૌમ્યાઃ ।
ભવેચ્ચ જાતો નૃપતેરભીષ્ટઃ
શુભપ્રિયઃ સ્યાત્ સુમતિઃ કૃતજ્ઞઃ ॥ ૧૭૯॥

શુક્રાર્કપુત્રૌ વ્યયગુ હિમાંશો-
ર્ધનસ્થિતા જીવબુધાવનેયાઃ ।
ભવેત્ સુધામા પુરુષોઽત્ર જાતઃ
..........મૂર્તિઃ પ્રિયસાધુમાની ॥ ૧૮૦॥

શુક્રાર્કપુત્રૌ ધનગૌ હિમાંશો
ર્વ્યયસ્થિતા જીવબુધાવ્રેયાઃ ।
નરોઽત્ર જાતઃ પ્રભવેત્ સુચિત્તઃ
સુદારપુત્રાર્થચ્તુષ્પદાઢ્યઃ ॥ ૧૮૧॥

ઇતિ શ્રીવૃદ્ધયવને દુર્ધરાયોગાધ્યાયઃ ॥

Enchoded and proofread by Radu Canahai clradu at yahoo.com

*mInarAja shrIvRiddhayavanajAtaka pUrvakhaNDa*
pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*